Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमद्-अजितसागरसूरिविरचितः—

# लघुस्तोत्ररत्नाकरः

संशोधको मुनिर्हेमेन्द्रसागरः

प्रकाशक—

श्रीबुद्धिसागरसूरिजैनज्ञानमन्दिरम्-( बीजापुर )

प्रथमं संस्करणम्

मूल्यं ०-१२-०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीअजितसागरसूरिजैनग्रन्थमालाङ्कः १८

श्रीमद्-अजितसागरसूरिविरचितः

# लघुस्तोत्ररत्नाकरः

संशोधको मुनिहेमेन्द्रसागरः

प्रकाशकं—

श्रीबुद्धिसागरसूरिजैनज्ञानमन्दिरम्-( वीजापुर )

प्रथमं संस्करणम्

वि० १९[illegible] [illegible], ई० १९३५

प्रति १०००

मूल्यं ०-१२-०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशक—
श्रीबुद्धिसागरसूरिजैनज्ञानमन्दिर.
वीजापुर (गुजरात)

मुद्रकः—
शेठ देवचंद दामजी,
आनंद प्रीन्टींग प्रेस-भावनगर.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# निवेदन

आजे अमे आ 'श्री लघु स्तोत्ररत्नाकर प्रथम भाग' नामना ग्रंथने 'श्री अजितसागरसूरि ग्रन्थमाला' ना अढारमा अंक तरीके प्रसिद्ध करी जनताना करकमलमां समर्पित करीए छीए। आ ग्रन्थमालानुं कार्य अमारा हस्तक आव्युं तेथी त्रण-चार वर्ष पूर्वे ज्यारे आचार्यश्री हयात हता त्यारे आ ग्रंथ छपाववाने तेनुं मेटर प्रेस पर मोकलवामां आव्युं हतुं, पण अनेक कारणोने लइने ते अटकी पड्युं हतुं। 'जिनस्तुतिचतुर्विंशतिका' मुद्रित थया बाद आ पुस्तकनुं मुद्रण मुनिश्री हेमेन्द्रसागरजीनी सूचनानुसार अमारा हाथमां आव्युं, अने आ पुस्तकनी राह जोनाराओ माटे जो के मोडुं थयुं छे तो पण छेवटे ते कार्य उपरोक्त मुनिश्रीनी कृपाथी पार पड्युं छे।

अमारी भावना छे के अमारा तरफथी बहार पडती आ ग्रंथमालाने जेम बने तेम वधारे सस्ती बनावीए पण अमारी पासे तेवुं आर्थिक साधन न होवाने लीधे अमारे तेनी कीम्मत मात्र बार आना राखवी पडी छे अने ते कीम्मत आ पुस्तकना खरीदनार महाशयो जाणी शकशे के तेना अढार फरमाना कद प्रमाणे पडतरथी पण कांइक ओछी ज छे।

आजकाल पूर्वाचार्योए रचितस्तोत्रोना संग्रहरूप अनेक पुस्तक बहार पडी रह्यां छे अने ते भिन्न भिन्न रुचिवाळा वांचक-पाठक भक्तजनोने माटे आदरणीय तथा पाठ्य छे। प्रत्येकमां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कांइने कांइ विशेषता अवश्यमेव होय छे ज; तेवी ज रीते आ 'लघु स्तोत्ररत्नाकर प्रथम भाग' मां संग्रहीत स्तोत्रो पण तेनी विशेषताने लइ जरूर तेनो उपयोग करनाराओ माटे आदरणीय अने पाठ्य थइ पडशे. एवी अमने खात्री छे। आ पुस्तकमां अनेक संस्कृत-प्राकृत ग्रंथोना कर्ता तथा केटलाक प्राचीन ग्रंथोना भाषान्तरकार अने विविध विषयो परत्वे कवितामां गानार आचार्य श्रीमद्-अजितसागरसूरिजीनां रचित स्तोत्रो तथा तेमना शिष्य साहित्यरसिक मुनिश्री हेमेन्द्रसागरजीनां रचित केटलांक स्तोत्रो-अष्टको साथे अर्बुद-आबूवर्णन विगेरे छे। उपरांत आमां प्राचीन आचार्योनां पण पूर्वधर श्रीभद्रबाहुसूरि-रचित-'मंत्रगर्भित उवसग्गहर स्तोत्र' 'उवसग्गहरपादपूर्ति' प्राचीन पद्मावती अष्टक, बप्पभट्टिसूरिकृत 'सरस्वती स्तोत्र' प्रतिष्ठाकल्प आदिमां वर्णन करायेल श्री शासनरक्षक 'घंटाकर्ण वीरस्तोत्र मंत्रकल्प' विगेरे बहु महत्त्वभर्यां केटलांक चमत्कारिक स्तोत्रो छे, के जेनो वांचको पाठादिथी उपयोग करी लाभ लेशे अने ते द्वारा अमे आ अमारो प्रयास सफळ थयो मानीशुं।

आ पुस्तकनुं संशोधन कार्य मुनिराज श्री हेमेन्द्रसागरजी महाराजे करी आप्युं छे ते माटे अमे तेओश्रीनो आभार मानीए छीए।

ता. १४-१०-३५
वीजापुर-(गुजरात)

प्रकाशक—
बुद्धिसागरसूरि जैन ज्ञानमंदिर.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रस्तावना

पुंसामेकमपिस्तोत्रं, स्वर्गापवर्गसम्पदम् ।
जनयत्येव लोकेस्मिन्, जिनानां पावनं परम् ॥ १ ॥

श्रीमद्विद्यादेव्युपासकानां भूतार्थवादिनामनल्पतत्त्ववेदिनामनपेक्षिताऽनर्हद्वादानां सहृदयहृदयानां विद्वद्वराणामेतन्नाऽविदितम्, यत्स्तोत्ररत्नमालिकाग्रथनमनर्थहारि, सद्भक्तिप्रधानानां विश्वस्तचेतसां पिपठिषूणां वाचकानां संस्मर्त्तृणाञ्च। यद्यपि श्रीमद्भद्रबाहुप्रभृतिभिः पूर्वाचार्यैर्विविधसिद्धिप्रदानि बहूनि स्तोत्राणि नैकार्थाऽलङ्कारघटितानि रचितानि विद्यन्ते जैनशासने, तथाप्येष 'लघुस्तोत्ररत्नाकरः' योगनिष्ठजैनाचार्यश्रीमद्-बुद्धिसागरसूरीश्वरशिष्यरत्नश्रीमद्-अजितसागरसूरिभिः प्रणोतस्तस्याऽयं प्रथमो भागः सरलभाषार्थः सम्यग्वैराग्यभक्तिरसोपेतः प्रकटीकृतः। यस्मिन् जिनेन्द्राणांगणभृच्छ्रीमद्गौतमस्वामिनः, आचार्यश्री हरिभद्रसूरिश्रीमद्धेमचन्द्राचार्यनिजगुरुप्रभृतीनां महामुनीनाञ्च स्तवस्तुतिस्तोत्राष्टकानि च सन्दृब्धानि। स्तवाः स्तुतयः स्तोत्राण्यष्टकानि चाभिन्नार्था एव व्युत्पत्त्या रूढिवशाच्च। कश्चिद्विशेषोऽप्येतेषां विद्यते-तथाचोत्तराध्ययनबृहद्वृत्तौ " तत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तवाः-देवेन्द्रस्तवादयः, स्तुतयः- एकादिसप्तश्लोकान्ताः, यत उक्तम्-एगदुगति सिलोका (थुइओ) अन्नेसि जाव हुंति सत्तेव। देविंदत्थवमादी तेण परं थुत्तआ होंति " । व्यवहारभाष्ये च उ० ७ गाथा १८३ ।

"एगदुगतिसलोया, थुतिओ अन्नेसि होइ जा सत्त । देविंदत्थयमादी तेणं तु परं थया होइ" ॥ श्रीमद्मलयगिरिकृतवृत्तौ- एक श्लोका-द्विश्लोका-त्रिश्लोका वा स्तुतिर्भवति, परतश्चतुः श्लोकादिकः स्तवः। अन्येषामाचार्याणां मतेनैकश्लोकादिसप्तश्लोक-पर्यन्ता स्तुतिः । ततः परमष्टश्लोकादिकाः स्तवाः । यथा देवेन्द्रस्तवादयः । आदिशब्दात्कर्मस्तवादिपरिग्रहः " "गंभीर-महुरसद्दं, महुरसद्दं, महत्थजुत्तं हवइ थुत्त ॥५८॥ " (देवेन्द्र-सूरिप्रणीतचैत्यवन्दनभाष्ये) "सक्कयभासाबद्धो, गंभीरत्थो थवोत्ति विक्खाओ । पाययभासाबद्धं, थोत्तं विविहेहिं छंदेहिं ॥८५१॥ " ( चेइयवंदणभाष्ये श्रीशान्तिसूरिः ) अद्यावधि मुद्रितामुद्रित-स्तोत्रादिषु प्रायः पूर्वोक्तलक्षणानि न घटन्ते, इति नासमञ्जसम्। चूलिकास्तुतिस्तोत्रापेक्षया स्यादियं रूढिः। सर्वेष्वपि प्राचीनतराः कथ्यन्तेऽहर्निशं जैनशासने प्रतिक्रमणादिक्रियाविशेषेषु दण्डक-रूपाः स्तवाः पञ्च-तद्यथा—

" सक्कत्था ओ य चेइय-थओ य चउविसईथओ चेव ।
सुत्तत्थओ य सित्थत्थओ य नामाइं दंडाणं ॥ "

एतेषामेवावश्यकवृत्त्युत्तराध्ययनादौ कुत्रचित् स्तवत्वं क-चिच्च स्तुतित्वं संप्राप्यते तद् व्युत्पत्त्यनुरोधात्, किंवा गोबलीव-र्दन्यायमवलम्ब्य सामान्यतः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्मिन् ग्रन्थे पद्मावतीदेव्याः-सरस्वत्याः-घण्टाकर्णवीरस्य च सम्यक्त्वधारित्वात् प्राचीनाचार्यैस्तदाराधनसंमतत्त्वाच्च सबीजमन्त्रगर्भितानि तेषां स्तोत्राणि संगृहीतानि । स्वविरचितस्तोत्राष्टकानिकियन्ति जिज्ञासुजनप्रेरणया विनिवेशितानि च ।

कियन्ति च प्राचीनाऽऽचार्यैरचितानि संगृहीतान्यत्र । अनेन सूरिणा विनिर्मितान्यपराणि स्तोत्राणि सबीजमन्त्रकाणि, तथैव प्राचीनसूरिपुङ्गवप्रणीतान्यमुद्रितानि संगृहीतानि सन्ति तान्यपि यथोपयोगं यथासमयञ्च प्रकटयिष्यन्ते । केषुचित्स्तोत्रेषु संवत्सरादिनामोल्लेखा विहितः कुत्रचिदप्रदर्शितश्चैव, ग्रन्थकर्त्रा स्वतीर्थ्यश्रीमदमृतसागरस्य स्मृतये "सुधासिंधु"रिति काव्यंविरचितम् । तदपि संगृहीतम् । ग्रन्थप्रणेतुरस्य विद्वत्त्वं कवित्व शक्तिश्चैतद्ग्रन्थावलोकनैव ज्ञास्यते वाचकवरैः । इत्याशास्ते ।

वि॰ सं. १९९२
बु.सं. ११ मार्गशीर्ष शुक्लपञ्चम्याम्
मु. विद्यापुर (वीजापुर)
विद्याशाला

मुनिहेमेन्द्रसागरः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शुद्धिपत्रकम् ।

| पृष्ठ. | पंक्ति. | अशुद्धिः | शुद्धिः |
| --- | --- | --- | --- |
| २ | १३ | जिनश्वरो | जिनेश्वरो |
| ३ | ३ | भूभिजा | भूमिजा |
| ५ | १३ | विराजित । | विराजित ! । |
| १० | १२ | ध्यान | ध्यान |
| १३ | ३ | सूनं | सूनुं |
| १३ | ६ | भजेद्वि | भजेद् वि |
| १४ | ६ | दत्तनश्चः | दत्तश्च ॥ |
| १६ | १० | ऽर्चनीयः सततं | ऽर्चितपारस |
| २१ | ४ | द्धतञ्जयाऽ | द्धनञ्जयाऽ |
| २८ | २ | श्रयतु | श्रयति |
| ३१ | १० | मनधा | मनघा |
| ३१ | १८ | मद्ये | मध्ये |
| ३३ | ४ | योगन्द्रि | योगीन्द्र |
| ३४ | १८ | श्रेष्टायुधं | श्रेष्ठायुधं |
| ३७ | —४ | मानबानां | मानवानां |
| ३८ | ७ | नायातीत | मायातीत |
| ४२ | ६ | निभ | निभं |
| ४८ | १४ | मनक— | मनेक |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | | | |
|---|---|---|---|
| ४८ | १६ | तिप्त | तप्त |
| ५१ | २० | श्रयत्स | श्रयेत्स |
| ५२ | २ | श | शं |
| ५२ | २ | मिदं | इदं |
| ५२ | ४ | सर्वदेहिनाम् | सर्वदेहिनां |
| ५२ | १२ | शितांशुः | शीतांशुः |
| ५५ | ८ | सद वृषभं | सद् वृषभं । |
| ५६ | १५ | हाटकराजतरन्त– | रत्नाऽष्टापदरूप्य |
| ५७ | १८ | महोज्वलां | महोज्ज्वलां |
| ५८ | ८ | भासे | मासे |
| ५९ | ५ | ख लोक– | स्वलोक |
| ५९ | ६ | पदाबली | पदावली |
| ५९ | १५ | तद्विलोकी | यद्विलोकी |
| ६१ | १५ | सत्यवर्त्मः | सत्यवर्त्म |
| ६४ | ५ | ऽद्ब | ऽब्द |
| ६४ | ६ | नाथचरणेः | नाथचरणे |
| ६५ | १ | मूत्ति | मूर्त्ति |
| ६७ | ५ | ताऽङ्घ्रि, ” | ताऽङ्घ्रिं, |
| ८४ | १४ | रमलां | उचितां |
| ८८ | १४ | प्रोघ्धूत– | प्रोद्धूत |
| ८९ | १८ | पोतय | पोताय |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | | | |
|---|---|---|---|
| ९७ | १५ | सस्तु | संस्तु |
| १०५ | ६ | सर्वंकाले | सर्वकाले |
| १०८ | ११ | प्रभूतवर | प्रबलवर |
| ११० | ८ | शशीः | शशी |
| १२४ | ९ | क्क्तुमुप | वक्तुमुप |
| १४६ | १० | स्वर्गौ– | स्वर्गौ |
| १४८ | ३ | जलजेक्षणं | पद्मेक्षणं |
| १४८ | ५ | मोक्षदम्– | शर्मदम् |
| १४९ | ३ | विमित्र | विभिन्न |
| १५० | ३ | पुंजम् | पुञ्जम्– |
| १५१ | ५ | भ्रकूर्टि | भ्रुवश्च |
| १५१ | ८ | वन्दो | वृन्दो |
| १५३ | २ | विभतु | विभर्त्तु |
| १६३ | ११ | गुणामु | गुणानु |
| १६३ | १४ | भूवि | भुवि |
| १७० | ४ | विङ्क | विहङ्क |
| १८२ | ११ | पुण्याः | पुण्या– |
| १८४ | ६ | तद्दरव | तद्दस्व |
| २०१ | १९ | द्विमुखा– | पराङ्मुखा– |
| २०२ | .... | न्वद्ध्यान– | त्वद्ध्यान |
| २०४ | २० | गिगै | गिरौ |
| २०९ | ९ | पगमा | परमा |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | | | |
|---|---|---|---|
| ,, | ९ | वशिष्टा | वशिष्ठा |
| २११ | १४ | र | रम् |
| २१२ | १९ | हेम | सुहेम |
| २१३ | २० | वाकूसुधा | वाक्कला |
| ,, | २१ | नाऽनुमोदपराः | नाऽन्वमोदन्तहि |
| २१८ | १८ | सूरि | सूरिं |
| २१९ | १४ | सुमदाम् | सुमुदाम् |
| २२० | १२ | स्वभक्त्या | सुभक्त्या |
| २२१ | ९ | दायिनी | दायिनीं |
| २२२ | १७ | निरूपम | निरुपम |
| २२३ | ९ | कुत्रः | कुत्र |
| २२४ | २ | निरूपम | निरुपम |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# जैनाचार्य श्रीमद्-अजितसागरसूरिवृत्तान्तम्

**प्रणम्य पद्मप्रभपद्मनाथं, संक्षेपतोऽहं कथयामि किञ्चित् ।**
**गुरुप्रसादाद् गुरुजीवनस्य, शुभं चरित्रं गुणवृद्धिहेतुम् ॥ १ ॥**

विविधवैभवशालिनि चारुतर( चरोतर )देशे पेटलाद-पत्तनसन्निधौ प्रधानतो वैश्यजनमण्डितोऽन्वर्थनामा नार( नर-समूह)इत्यभिधानं दधानो ग्रामः प्रसिद्धः समस्ति । यस्मिन्वीत-रागधर्मोपासकाः कियन्तः स्वेष्टदेवता उपासते, यैर्धर्मसन्तानकराः कतिपयाऽर्भकाः सद्गुरुभ्यः समर्पिताः, दीक्षिताश्च ते धर्मोन्नतिं विदधति, एतस्मिंश्च ग्रामे विशुद्धप्रकृतिः परमात्मिकधर्मनिष्ठो वैश्य (लेउआपाटीदार)कुलविभासकः ( लल्लुभाई ) इत्याख्याख्यापको-ऽभवत्, धर्मपत्नी च तस्य शीलवतीनां प्रशंसनीया( सोनबाई )-नामाऽऽसीत्, दम्पती तौच समानशुभशीलौ विनीतस्वभावौ प्रभु-भक्तिपरायणौ शुद्धदेवगुरुभक्तिभाजावुदारमानसौ प्रेमाङ्कुरपोषकौ सततं बभूवतुः । यस्याः कुक्षौ शुभस्वप्नसूचितोऽयं गर्भत्वेन समवातरत । वि. सं. द्विचत्वारिंशदधिकैकोनविंशतितमे हायने पोषशुक्लपञ्चम्यां सा बालमजीजनत्, द्वादशेऽह्नि पित्रा ( अंबालाल ) इत्यभिधानमकारि । क्रमेण बालशशाङ्क इव स वृद्धिमगमत्, प्रकृत्यैवासौ निजपितृगुणानुसारी शुभलक्षण-सूचितो भविष्यद्भाग्योदयवशात् सामुद्रिकलक्षणैः कियद्भिरुपल-क्षितोऽभूत्, आद्यवयस्येव तं वाग्मित्वं बुद्धिवैशद्यञ्चाशिश्रियत् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत एवासावचिराद् गुर्जरगिरां रहस्यमवेदीत् । स च स्वयमेव वाक्चातुर्यबुद्धिप्रभावं सफलीकर्त्तुं व्यचिन्तयत् । तस्मिन्समये दैवनियोगात्तन्मातापितरौ पञ्चत्वं गतौ, भवस्वरूपमेतादृशमेव—

उत्पद्यते कर्मनिबद्धजन्तु–र्विलीयतेऽसौ किल कर्मयोगात् ।
सुखं च दुःखञ्च चलस्वभावं, प्रकीर्त्तितं चक्रवदत्र लोके ॥१॥
संसारवासः खलु सारहीनो,–निःसारसेवो बहुदुःखखानिः ।
एकस्य दुःखस्य न यावदन्त– स्तावद् द्वितीयं निपतत्यकाण्डम्

इत्थं संसारस्थितिं परिभाव्य षट् पञ्चाशदधिकैकोनविंशतितमे वैक्रमाब्दे स्थानकवासिसाधूनां समागमं प्राप्य, विरक्तमनाः स तेषां सन्निधौ दीक्षामङ्गीकृतवान् । अमीऋषेति नामनिर्देशं जग्मिवान् । ततो गुरुभिः सह तेन महाराष्ट्र-खानदेश-कर्णाटक—मालव—मध्यहिन्दुस्तानप्रभृतिषु देशेषु विहारो व्यधायि, तत्रत्यजनाः प्रबोधिताश्च निजबुद्धिवैभवेन । अमीऋषिणा-भाण्डारकररचितपुस्तकद्वयं पुराऽपाठि, ततस्तपागच्छीयदीक्षा-मङ्गीकृत्य सिद्धान्तचन्द्रिकासिद्धहेमकाव्यन्यायादि विषयाः सम्यगालोकिताः इति तदीयमुद्रितामुद्रितग्रन्थश्रेण्या विज्ञायते-मतिमद्भिः स्वयमेव।

अनेकधा धर्मशास्त्राणां विविधभाषाणां चाभ्यासस्तेन विहितः । ततोऽनेकविदुषां मुनीनां महात्मनाञ्च समागमं कुर्वाणः स सम्यग् ज्ञानाऽनुभवं प्रापत् । ततस्तस्य स्थानकवासिमुनीनां परिचयो जातस्तन्मते मूर्त्तिपूजनं सर्वथा न्यषेधि, तच्च तस्मै निज-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञानाऽनुभवान्नारोचत, शास्त्रैर्कैतिहासिकप्रमाणैश्च तेन विज्ञातम्—यद् द्वात्रिंशत्सूत्रसूत्रितमेव माननीयं नान्यदितिमर्यादा भ्रमजनका तैर्मूर्त्तिपूजा खण्डयितुञ्चाङ्गीकृताऽस्ति द्वात्रिंशत्सूत्रेष्वपि मूर्त्तिपूजा प्रतिपादिता, पञ्चचत्वारिंशत्सूत्रान्तर्गतानितान्यपि । तथापि संस्कृतभाषाऽनभिज्ञेन लुम्पकमतोत्पादकेनाष्टाधिकपञ्चदशशताब्द्यां मूर्तिपूजा न्यषेधि, मूर्तिपूजा प्राचीनैः सर्वैः संमतास्ति । तत्सम्बन्धिशङ्कासमाधानं तन्मतावलम्बिना तेन नाऽऽसादि । केचित्तन्मतानुयायिनस्तदीयशङ्काः श्रुत्वा हास्यास्पदीचक्रुः, केचित्तूष्णीं बभूवुः, अपरे च मिथ्याश्रद्धाशालिनत्वेनैव जीवनं निर्वाहयितुं उपादिदिशुः । तेन सत्यशोधकः स नातुष्यत् ।

ततस्तेन विजिज्ञासुना—अध्यात्मज्ञानदिवाकरयोगनिष्ठाचार्यश्रीमद्बुद्धिसागरसूरीश्वरैः साकं पत्रव्यवहारः प्रारभ्यत, क्रमेण च प्रश्नोत्तरसन्तानेन बहुधा शङ्कासमाधानमजनिष्ट, ततः स्वयमेव स समागत्य सूरीश्वरदर्शनमकार्षीत्, तैश्च साकं तेन भक्ष्याऽभक्ष्याचारसमाचारीजीवदया—प्राकृतसंस्कृतभाषा—सूत्ररचना—मूर्त्तिप्राचीनत्वावश्यकताप्रभृतीनां प्रभुता ऊहापोहा विहिताः, मीमांसाऽप्यकृत । ततो निश्चितं तेन—यत् स्थानकवासिमत आधुनिक एव, तेऽपि रूपान्तरेण गुप्ततया तत्सदृश (स्थापना) स्वरूपेण मूर्त्तिं मन्यमाना अज्ञजनान् भ्रान्तान् कुर्वाणास्तेषां स्वस्य चात्मिकहितं नाशयन्ति । इत्थं तेन (अभिरुचि) मुनिना सुपरीक्षां विधाय-पञ्चषष्ठ्युत्तरैकोनविंशतितमे (१९६५) वि. संवत्सरे गृहीतमतम-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नादृत्य पूर्वोक्तसूरीश्वरपादान्ते श्वेताम्बरसाम्प्रदायिका संवेगिदीक्षा स्वीकृता। अजितसागर इत्यभिधया ख्यातिमभजत्तस्मिन् सम्प्रदाये, यद्यपि स्थानकवासिमतं वितथं विज्ञाय त्यक्तवान् तथाऽपि परमत-सहिष्णुत्वात् सोऽन्यमतानिव तन्मतमपि समानभावेनाऽपश्यत्।

बहुशस्तेन स्थानकवासिसाधुभिः समं प्रसिद्धभाषणादिप्रवृत्तयो विहिताः, अत एव निश्चीयते, तन्मनसि क्वचिदपि केनाऽपि सार्द्धं तिरस्कारो द्वेषबुद्धिश्च न प्रादुरभवत्। सर्वैः सह प्रमोद-भावेन वर्तितव्यं सत्यधर्मो न परित्याज्यमिति तज्जीवनस्य प्रधानताऽऽसीत्। अथ स मुनिराजः प्रत्यहं ज्ञानवृद्धिं विधातुं प्रावर्त्तत, संस्कृतप्राकृतवाङ्मयतत्त्वानि सम्यग् ज्ञातवान्। तदन्वा-गमिकभावान् पुनरवलोकितवान्। तत्तट्टीकानिर्युक्तिभाष्यचूर्णि-कापर्यालोचनत आगमिकगौरवं तेन प्रत्यक्षीकृतम्। प्राथमिक-वक्तृत्वशक्तिप्रभावेण सञ्जातप्रसिद्धिसन्मानोऽसौ विशेषतः स्वाग-मज्ञानपूर्वकं निजगुरुसकाशात्प्रत्यहं संप्राप्ताध्यात्मज्ञानादिना व्य-स्फुरत्। विज्ञानतपसा वपुरपि सविषयं कृशतामभजत्। अष्टाह्नि-कादितपश्चर्या बहुशः परिचिता तेन, योगोद्वहनतप आराध्य ज्ञानाद्याराधितम्। ततः सानन्दनगरे तस्मै महोत्सवपूर्वकं पंन्या-सश्रीमद्वीरविजयेन पंन्यासपदं गणिपदं च प्रदत्तम्। मेघगम्भी-रनादेन सततं देशनाप्रदानेन लोकोपकारकारिणा पंन्यास श्रीमद् अजितसागरगणिना जीवनं परहितायैव व्ययितम्। संस्कृत-प्राकृतभाषायां तेन बहवो लेखाः प्रादुष्कृताः, संस्कृत-प्राकृतप्र-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्थार्थाः देशभाषया प्रकटीकृताश्च। तद्विरचितग्रन्थाश्चेमे भीमसेनचरित्रं, अजितसेनचरित्रं, तरङ्गवतीकथा ( पद्यात्मका ) चन्द्रराजचरित्रं, स्तुतयः, श्रीशोभनस्तुतेष्टीका, धर्मशर्माऽभ्युदय–नेमिनिर्वाण–तिलकमञ्जरी–शान्तिनाथचरित्रादिमहाकाव्यानां टीकाः, शब्दसिन्धुः, बुद्धिप्रभाव्याकरणं, सुभाषितसाहित्यं, बुद्धिसागरसूरिचरित्रं, श्रीकल्पसूत्रसुखबोधिका चेति संस्कृतगिरा गुम्फिताः सन्ति। कृतिश्चैषां मनोहारिणी सुगमा रसमयी च। वेदान्ततत्त्वञ्च तेन ग्रन्थद्वाराऽव्यक्तीकृतम्। वेदान्तरहस्यं च काव्यप्रबन्धेन गुर्जरगिरा बहुधा विशदीकृत्य प्रकाशितम्। तच्च समयोचितभावमयं ह्लासकं जनानानन्दयति। सुपार्श्वनाथचरित्र–सुरसुन्दरी–कुमारपालचरित्रादीनां भाषान्तराणि तद्रचितानि मुद्रितानि वर्त्तन्ते। इत्थं तेन मुनिना साहित्यप्रमुखप्रवृद्धिर्विशेषतो विहिता।

तेषामीदृशीं प्रखरशक्तिमनेकधाऽपरयोग्यतां च निरीक्ष्य तस्मै योगनिष्ठाध्यात्मज्ञानदिवाकरश्रीमदाचार्यबुद्धिसागरसूरिभिः ( प्रांतिज ) पत्तने अशित्युत्तरैकोनविंशतितमेऽब्दे आचार्यपदं प्रदत्तं सागरसंघाटकस्यधूश्च समर्पिता। ततोऽसौ कियत्कालं सूरिपदं व्यभूषयत्, तदन्तरेऽपि ग्रन्थविलेखने देशनादाने च तेन सर्वथा समयो व्ययितः। महात्मनां क्षणोऽपि जगज्जनानाममूल्य इति को न विजानाति ?। धार्मिकसामाजिकोन्नतिकारकप्रवचनप्रदानेन सह कानिचिद्धार्मिकक्षेत्राणि गुरुकुलविद्यानिकेतनानि च साहाय्यदानद्वारासजीवनानि विहितवान् सः। अभ्यस्तयो-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गविद्यः स गुरुभक्तिमेव मुख्यतोऽमन्यत । इति तदुपदेशेन निर्मापितानि श्रीमद्बुद्धिसागरसूरीश्वरस्य गुरुमन्दिराणि सूचयन्ति । आर्यसमाजिसनातनधर्मिख्रिस्तिपारसिकयवनानां धर्मस्थानेष्वपि गत्वा स्वयं व्याख्यानानि धर्मप्रवृत्तयेऽदात् । तेन च नरेशाननेकधा प्रबोधयता राज्यस्थानेषु सदुपदेशेनाहिंसाधर्मः प्रतिष्ठितः सततं विहारप्रियः स सूरिः क्रमेण श्रीनगर ( अहमदावाद ) सुरत–मुम्बापुरी–पट्टण–राजधन्यपुर ( राधनपुर )–विजयपुर ( विजापुर–विद्यापुर )–सानंद–प्रान्तिक ( प्रांतिज )–वटपल्ली ( वडाली )–प्रल्हादनपुर ( पालनपुर )–महेशान ( महेसाणा ) उमापुर (ऊंझा)–पादलिप्त (पालीताणा)–यामनगर (जामनगर)– अमदावाद–प्रांतीज–पेथापुर–विजापुर–महानसादिपत्तनेषु चातुर्मासीः कृतवान् । इत्थं स महानपि समाजकार्याणि धर्मबुद्ध्या साधयन् महत्त्वमानं मनसाऽपि नाऽचिन्तयत्. अन्यान् प्रभावशालिनो विधातुं सदैव स प्रमुदितोऽभूत् । अतस्तेन सतीर्थ्याभ्यां मुनिश्रीऋद्धिसागर–मुनिश्रीकीर्तिसागराभ्यां मुनिश्री दुर्लभविजय–मुनिश्री रंगविमल–अञ्चलगच्छीय मुनिश्री दानसागरेभ्यश्च गणिपदं पंन्यासपदञ्च व्यतीर्यत ।

ततः पञ्चाशीत्युत्तरैकोनविंशतितमे वैक्रमसंवत्सरे चाश्विन–शुक्लतृतीयायां स्वर्गस्थोऽभूत् । येनाऽऽत्मकल्याणं साधयता जगदुद्धारायाऽनल्पः परिश्रमः सेवितः, यतोऽधुना सोऽसन्नपि विद्यमानतां भजति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मयापि तज्जीवनपरिचयेन, 'निजात्मकल्याणं शासन-जगद्धितं च यथास्यात्तथा यतितव्य'मिति भावनया तत्संक्षिप्त-जीवनं पूर्णयता विरम्यते ।

सूरीशस्य मुनीन्द्रस्य, विस्तृतं चरितं गुरोः ।
विद्यते विदुषां मान्यं, दयाधर्मनिकेतनम् ॥ १ ॥
संक्षेपात्सारमुद्धृत्य, जनसन्तुष्टिहेतुकम् ।
प्रकटीकृतवानस्मि, जीवनाचरितं कियत् ॥ २ ॥
समयं योग्यमासाद्य, व्यलेख्यनवकाशतः ।
यथाज्ञातमनल्पार्थं, गुरुभक्तिवशादिदम् ॥ ३ ॥
महानसे पुरे रम्ये, रमणीयतरोदये ।
अभ्यर्थनेन भव्यानां, श्राद्धानां गुरुसेविनाम् ॥४॥
चन्द्राङ्कनिधिभूयुक्ते, वैक्रमे वत्सरे शुभे ।
ऊर्जमासि सितेपक्षे, पञ्चम्यां तिथिवासरे ॥ ५ ॥

माणसा–कार्तिक-
शुक्लपञ्चम्याम्
सं. १९९२

तत्पादपङ्कजालिर्मुनि—
हेमेन्द्रसागरः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीमहावीरस्मरणम् ।

भज महावीरं भज महावीरं महावीरं भज मूढमते !
मरणे संनिहिते संयाते, नहि नहि रक्षति भोगविलासः ।
भज महा० ध्रुवपदम् ॥

दाराः कारागारा असारा-श्चित्रचरित्राश्चित्तलवित्राः ।
पुत्रा मित्रजनाः सुखजननाः, सर्वेऽप्येते शिवसुखहननाः ॥
भज महा० ॥ १ ॥

भवपाथोधौ भ्रमणं कृत्वा, सम्यग्धर्मरतिं ननु हित्वा ।
रे मनुज ! त्वं मिथ्या धर्मं, किं न जहासि कुकर्मनिदानम् ?
भज महा० ॥ २ ॥

कायः प्रायः कर्मनिकायो—न्यायः प्रायो नास्ति विमायः ।
परिवारोऽयं निजसुखरक्तः, परहितकरणे क्वाऽपि न शक्तः ॥
भज महा० ॥ ३ ॥

नायं देहो दीव्यविलासः, स्थाताऽस्थिरतरकल्पितवासः ।
माता भ्राता पुत्रकलत्रं, सर्वंभ्रश्यत्यचिरान्मित्रम् ॥
भज महा० ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुरु तत्कर्म यतः शिवशर्म, धृतमतिवर्मा निश्चितधर्मा ।
येन विना मानवभवलाभो–मिथ्या भाति कुरङ्गजलाभः ॥
भज महा० ॥ ५ ॥

इह संसारे खलु दुस्तारे, धर्मस्त्राताऽवितथोऽपारे ।
विज्ञायेति समाचर धर्मं, सर्वज्ञप्रतिपन्नमपूर्वम् ॥
भज महा० ॥ ६ ॥

भुजगाभोगसमाना भोगा–विद्युद्दामसमाना माया ।
रायः सर्वाः क्षणवासिन्यो–मत्वेत्याशु समाचर धर्मम् ॥
भज महा० ॥ ७ ॥

दुष्टाशां सर्वस्वविनाशां, त्यजत विमूढधियः सततम् ।
सुकृतपथं परिपालयताऽरं, जयत विकारं वारं वारम् ॥
भज महा० ॥ ८ ॥

गुणवद्गुरुष्वतिभक्तिप्रीति–र्दत्ते सत्यशुभङ्कररीतिम् ।
त्यक्त्वा पूज्यप्रणतिं प्रवरां, कलयसि केवलदुःखमपारम् ॥
भज महा० ॥ ९ ॥

गुणवद्गुरुचरणाम्बुजलीनो–ज्ञानसुधारसवारिधिमीनः ।
कुरु सत्कर्मरतिं गतभीति–स्त्वं त्यज निन्द्यमतान्तररीतिम् ॥
भज महा० ॥ १० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालः क्रीडति गच्छत्यायु-र्भ्राम्यसि किं भवदावे व्यर्थम् ? ।
चेतय चेतन ! चित्ते चिन्तय, भवपाथोधिं दुस्तरमेतम् ॥
भज महा० ॥ ११ ॥

दन्ताश्चलिताः पलिताः केशा-गतिरप्याशु स्खलिताऽशेषा ।
तदपि न तृष्णा दासी क्षीणा, सत्याऽसत्यविवेकविहीना ॥
भज महा० ॥ १२ ॥

द्रव्यं दुःखनिदानमशेषं, भावय संसृतिदुःखमनन्तम् ।
मूढमते ! त्वं निर्भयचेताः, शेषे किं ज्वलदग्न्यागारे ॥
भज महा० ॥ १३ ॥

शास्त्रमधीतं ध्येयं ध्यातं, गीतं गानं दानं दत्तम् ।
शीलं शीलितमक्षतमेत-च्छान्तिर्नोचेद् व्यर्थमशेषम् ॥
भज महा० ॥ १४ ॥

क्लेशग्रस्तं जगदतिकष्टं, सृष्टं स्वार्जितकर्मविपाकाद् ।
स्वात्मध्यानरतो भव विद्वन् ! येन तदन्तं द्रक्ष्यसि नूनम् ॥
भज महा० ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ॥ श्रीजिनेन्द्रस्तोत्रम् ॥

( वैतालीयवृत्तम् )

जय तीर्थपते ! दयानिधे ! सुरसार्थाधिपसेवितक्रम ! ।
कलिकालजदोषहारक ! सदसद्भेदविचारदायक ! ॥ १ ॥

सदुपायविचारशून्यतां, भजमानो हृदि पीडितो भृशम् ।
शरणं ननु यामि तावकं, जिनदेव ! क्षुभितैकपालक ! ॥ २ ॥

हृदि नाशय मे स्थितं तमो–रविणाच्छेद्यमिदं गुणापहम् ।
दिननाथविभा विभो ! कुत–स्तव रेखांशमपि क्षितौ भजेत् ॥३॥

भगवन् ! पदवीं तवेक्षितुं, प्रभुरस्म्येव न चर्मचक्षुषा ।
कृपया प्रविलोकयस्व मां, दिश मे दीव्यविकासमीक्षणम् ॥ ४ ॥

स्मरणं तव पावनं प्रभो ! किमु वाच्यं स्तवनेन संयुतम् ।
मधुरा प्रकृतिर्हि पायसी, अधिका शर्करया भवेन्न किम् ? ॥५॥

विषमोऽपि समो भवेत्प्रभो ! तव पादान्तिकमागतो जनः ।
विषवानपि चाऽमृतायते, भवरागोऽपि विरागतां श्रयेत् ॥ ६ ॥

हृदये स्मृतिमात्रतो हितं, कुरुषे त्वं किल कल्पपादपः ।
भवतारक ! वीक्षितं तव, क्रमयुग्मं वितरत्यभीष्टताम् ॥ ७ ॥

सहसा दययोज्झितः शठो–विनिगृह्णाति न मां यमः प्रभो !
अभयं कुरु तावदेव मे, गतजीवस्य सृतं महोषधैः ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहवो मुनयस्त्वयोद्धृताः, करुणावारिनिधे ! त्वदाश्रिताः ।
भवपारगतं कुरुष्व मा–मपरं नैव विलोकये क्षमम् ॥ ९ ॥

तव पादसरोरुहं प्रभो ! प्रणमाम्यप्रतिमप्रभावदम् ।
जगदण्डमिदं त्वदाश्रितं, प्रतिजानेऽक्षरमात्मविद्यया ॥ १० ॥

भवतापहरस्त्वया विना, भुवनेऽस्मिन्नहि दृश्यतेऽपरः ।
भव मेऽक्षयशर्मदायक–स्त्वमिदानीं न विलम्बनं कुरु ॥ ११ ॥

क्व नु यामि विलोकयामि कं, क्व च तिष्ठामि नमामि कं विभो ! ।
परिपालय मां कृपानिधे ! भवकान्तारभयाकुलं सदा ॥ १२ ॥

शरणं जिनराज ! तावकं, शरणं मेऽस्तु सदा शिवप्रदः ।
शरणं गिरिराजभूषणं, शरणं नान्यदहं समाश्रये ॥ १३ ॥

शरणं भवतः शुभावहं, सुमतिः कः प्रविहाय संभजेत् ।
विफलं भवदायकं प्रभो !, विविधापत्तिनिदानमन्वहम् ॥ १४ ॥

सुरपादप उन्नतिप्रदः, प्रददात्येव मनोविकल्पितम् ।
जिनकल्पतरुस्त्वनल्पद–स्त्रिषु लोकेषु मनोतिगं हितम् । ॥१५॥

अथवा किमु याचनेन मे, प्रभुभक्तिर्जनयत्यसंशयम् ।
सफलं जनुरङ्गिनामिह, क्षपितक्रूरकषायमण्डली ॥ १६ ॥

विदितं तव वर्त्तनं विभो !, परमार्थैकपरायणं जने ।
किमु नाऽस्मि कृपाकटाक्षतः, समवेक्ष्यः समयेक्षिणा त्वया ॥१७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वदलङ्कृतमेतकज्जगत्, प्रविभाति प्रथुलश्रियोर्जितम् ।
प्रभुता प्रथिता तव प्रभो ! क्षपितक्षोभपरम्परा नृणाम् ॥१८॥

विधिनैव तवार्हणाऽङ्गिनां, शुभभावेन विभो ! प्रकल्पिता ।
परिपूरयते मनोरथान्, बहिरन्तश्च विशुद्धिदायिनी ॥ १९ ॥

जिननाथ ! तव क्रमाब्जयोः, पतितं मां परिपालयोत्सुकम् ।
नहि चित्रमिदं जनिष्यति, परकार्यैकरतस्य साम्प्रतम् ॥ २० ॥

कलिकालकरालदुःखतः, कुरु मां दूरतरं जिनेश्वर ! ।
नहि शक्तिरिहास्ति कस्यचिद्, भवतः कार्यमिदं सुनिश्चितम् ॥२१॥

जिननाथ ! तव प्रभावतो—बहवः सिद्धपदं हि भेजिरे ।
मम किं नहि तत्र योग्यता?, शुभभक्ति तव कुर्वतोऽधुना ॥ २२ ॥

मम पूर्वभवाऽनुसारतो—जनिता दोषगणास्त्वया प्रभो ! ।
न मनागपि मानसे शुभे, स्मरणीयाः कृपया कृपानिधे ! ॥ २३॥

विदधातु सुखं सुखार्थिनो—मम लोकोत्तरशर्मसेवधे !
जिननाथ ! भवन्तमन्तरा, नहि याचेऽन्यमनन्यरागतः ॥२४॥

विषमस्थितिमानहं प्रभो !, समतासद्मनि त्वं सदा स्थितः ।
अत एव ममोपरि क्षमा, करणीया भवता भवापहा ॥ २५ ॥

भववारिधिरेष दुस्तर—स्तवभक्त्योज्झितकर्मणां नृणाम् ।
गुणिनां स तु गोष्पदायते, गुणदोषैकवशं शुभाऽशुभम् ॥ २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणिनस्तव कीर्त्तनात्सदा, शुभधाम प्रति यान्ति यत्नतः ।
किमहं न तवान्तिकस्थितः, कलयिष्यामि विभूतिमत् पदम् ॥२७॥

किमपेक्ष्य जना इमेऽर्थिनः, परिधावन्ति पिपासिता इव ।
अबुधा भवता समर्थितं, नहि जानन्ति तदेवकारणम् ॥ २८ ॥

अबुधा अपि केचनस्तव—स्मरणाद् भावतया भवाम्बुधिम् ।
तव तेरु रनन्यसाधनाः, प्रभुभक्तिर्न करोति किं नृणाम् ॥ २९ ॥

परिणामसुखप्रदे भव—चरणाब्जे रतिरस्तु मे सदा ।
इतरन्न मया समीक्ष्यते, भवपाथोधिनिपातनक्षमम् ॥ ३० ॥

क्षणभङ्गुरदेह उच्यते, तदलं तत्प्रतिबन्धनेन मे ।
सुखदात्मनिबन्धनं सदा, रुचये मेऽस्तु दिवानिशं प्रभो ! ॥३१॥

तव मूर्त्तिविलोकनेन मे, नयनं निर्वृतिमेति नाऽन्यथा ।
हृदयश्च मदीयमुत्सुकं, गुणगाने भवभेदिनः प्रभो ! ॥ ३२ ॥

श्रवणौ च सदा विभूषितौ, सततं तत्त्वविधारणेन मे (ते) ।
किमिहान्यविभूषणैः परै—रतिभाराय मतानि तानि वै ॥ ३३ ॥

करयुग्ममिदं तवाऽर्हणां, कुरुते चेत्सफलं निगद्यते ।
कुत एव सकामकर्मणि, सततोद्योगपरं प्रशस्यते ॥ ३४ ॥

विधिकल्पितमेव शर्मदं, श्रुतधर्मस्य निषेवणं वरम् ।
त्वदनुग्रह एव केवलः, सुखसंपत्ति विधायकः प्रभो ! ॥ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भववारिधिरस्ति दुस्तर–स्तवभक्तिं न विजानते यके ।
परदोषगृहीतचेतसां, बत तेषां परभावभेदिनीम् ॥ ३६ ॥

न भवार्णवमीश ! दुस्तरं, तव मन्ये चरणाम्बुजं श्रितः ।
कुत एव भयं महात्मनां, विषयव्याधिविमुक्तचेतसाम् ॥ ३७ ॥

प्रपठिष्यति भावतः स्तवं, रचितं हेमपयोधिनाऽनिशम् ।
य इदं कृपया कृपानिधेः, स इयर्त्येव विभूतिमक्षयाम् ॥ ३८ ॥

भवभीतिमभीतमानवः, परिहायैव निजेष्टसेवया ।
लभतेऽन्तकमूर्ध्नि धारयन्, पदमुच्चैःपदसम्पदं सदा ॥ ३९ ॥

सभयो विभयः प्रजायते, धनरिक्तश्च धनीयते यतः ।
विभवेच्छुरजस्रवैभवः, सुखकामः सुखसम्पदान्वितः ॥ ४० ॥

परितुष्यति येन केन चित्, स्तवनेनाऽऽशु जिनेश्वरप्रभुः ।
इति चेतसि निश्चयन्नरो–विधुरं नैव कदापि पश्यति ॥ ४१ ॥

---

## गुरुजयन्तीस्तोत्रम् ।

( भुजङ्गप्रयातवृत्तम् )

जयन्तीं मुनीनां जने जायमाना–
ममानानि सौख्यानि संपादयन्तीम् ।
सदा कुर्वते भव्यभक्तिप्रभावा—
ल्लभन्ते जयं तद्गुणोत्कीर्तनात्ते ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सदा विद्यमाना दयाधर्ममुख्यं,
प्रबोधं दिशन्तः सुधासारवाचः ।
यथा लाभतृप्ताश्चरन्तः पृथिव्यां,
न केषां मुनीन्द्रा महानन्दहेतुः ॥ २ ॥

जिताऽक्षप्रचारो विचारे विशुद्धः,
शुभे शासनीये विकारैर्विहीनः ।
विशालप्रभावः श्रिताऽनेकवादोऽ—
जितः सूरिवर्यः क्षमी पूज्यपादः ॥ ३ ॥

मुधावादवाताहतक्षोभहारी,
महाशीलरत्नप्रभाऽऽनन्दकारी ।
कलिक्लेशलेशं तृणं मन्यमानोऽ—
जिताऽब्धिः सुधीः सूरिरक्रोधमानः ॥ ४ ॥

प्रभावप्रमेया कृता नैकभावा,
वरा ग्रन्थकोटी यकेन स्वभावात् ।
अचिन्त्यं प्रकाशं प्रदत्तेऽत्र लोके,
सदौचित्यमेतत्किमन्यद्धि लोके ॥ ५ ॥

प्रकाशचरित्रं यदीयं जनानां,
मनःसद्मनि स्थानमाराधकानाम् ।
विधायोन्नतिं सद्गुणानां विधत्ते,
किमन्यत्प्रियं प्रार्थनीयं विशेषात् ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणाः पूजिता येन सद्भावहेतो—
गुरोः शुद्धिमूला हि सद्बुद्धिकेतोः ।
अतस्तेन निःसीमतत्त्वप्रकाशः,
प्रपन्नस्तमोमोहहारी निराशः ॥ ७ ॥

विकासद्रहस्यप्रवेदी प्रभास्व–
ज्जिनेन्द्रागमानामितस्वाऽन्यभावः ।
सुविद्यारतानां मनोमन्दिरस्थोऽ–
जिताऽब्धिः सदा सूरिरिष्टार्थदोऽस्तु ॥ ८ ॥

कृताऽनेकधा ग्रन्थना पुस्तकानां,
सुधासोदरस्वर्गिभाषाप्रबन्धात् ।
स्वदेशे विदेशे प्रचारात्प्रकामं,
प्रबुद्धास्तु तेषां कियन्तो विधिज्ञाः ॥ ९ ॥

सुचारित्रिणां सेवनीयक्रमाब्जः
प्रशान्तस्वभावः सदाराधनीयः ।
शुभैः साधनैरात्मतत्त्वैकनिष्ठः,
प्रबोधप्रदानप्रधानप्रभावः ॥ १० ॥

क्षतानिष्टवस्तुप्रयोगः प्रकामं,
प्रयुक्तेष्टसंयोग आत्मानुयोगात् ।
निदानं सदानन्दताया मुनीन्द्रः,
शुचित्वं दधानो विशुद्धात्मभावात् ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृताऽनेकभव्योद्धृतिश्चोत्तमश्रीः
सुधासोदरोक्तिप्रचारः प्रसिद्धः ।
गुणानां महासागरः सूरिवर्योऽ–
जिताब्धिः सतामिष्टयोगार्थदोऽस्तु ॥ १२ ॥

निवृत्तिप्रचारप्रवीणैकधीरः,
प्रचुरप्रजाऽधर्मकक्षे समीरः ।
कुवादिप्रलापप्रभेदैकवीरोऽ–
जिताब्धिः सतां सूरिरिष्टार्थदोऽस्तु ॥ १३ ॥

परात्मप्रदेशाऽनुरागाऽन्वितानां,
जनानां वितानं सदा पालिताऽलम् ।
विवेकाङ्गहीनाङ्गिनां बोधदाताऽ–
जिताब्धिः सतां सूरिरिष्टार्थदोऽस्तु ॥ १४ ॥

सुविद्याऽवदातस्वभावः सुविज्ञो—
धिया राजितोऽनल्पया दीर्घदृष्टिः ।
जने जैनतत्त्वप्रपञ्चप्रणेताऽ–
जिताब्धिः सतां सूरिरिष्टार्थदोऽस्तु ॥ १५ ॥

हेमेन्द्रसागरकृतेयमनन्यभावाद्–
शुद्धा स्तुतिर्निजगुरोरखिलार्थखानिः ।
स्तोतुः प्रपाठकगणस्य च सिद्धिदाऽस्तु,
स्वर्गाऽपवर्गसुखवृद्धिकरी क्रमेण ॥ १६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीमज्जगद्‌गुरुविजयहीरसूरीश्वर गुणाष्टकम्

( ललित—भद्रिका वृत्तम् )

विजयहीरकं सूरिपुङ्गवं, भवभयापहं तत्त्वबोधदम् ।
निखिलदेहिनां शान्तिदायकं, स्मृतिपथं नये श्रीजगद्‌गुरुम् ॥१॥
शिवपथार्थिनं सार्थवाहकं, सकलकामदं कर्महारकम् ।
जिनमताम्बुधौ चञ्चदिन्दुकं, स्मृतिपथं नये श्रीजगद्‌गुरुम् ॥२॥
तपनतेजसं शान्तभावनं, निकटवर्तिनां तापवारकम् ।
करुणयाश्रितं कोमलश्रियं, स्मृतिपथं नये श्रीजगद्‌गुरुम् ॥ ३ ॥
अकबराधिपो बोधितः क्षणात्—शमवताऽवता येन देहिनाम् ।
मुनिगणार्चितं तं तपस्विनं, हृदि विचिन्तये श्रीजगद्‌गुरुम् ॥४॥
विपदनेकधा दारिताऽऽदराद्—भुविजना घना येन तारिताः ।
जगति मारणं वारितं तकं, हृदि विचिन्तये श्रीजगद्‌गुरुम् ॥५॥
वदनवारिजे यस्य भास्वरे, जनमनोऽलयो लीनतामगुः ।
सुरभिसंगतास्तं प्रभाविनं, हृदि विचिन्तये श्रीजगद्‌गुरुम् ॥६॥
कति विबोधिता भूपतिव्रजाः—नयपथाश्रिता येन सूरिणा ।
विमलविद्यया तं मुनीश्वरं, हृदि विचिन्तये श्रीजगद्‌गुरुम् ॥७॥
वितथवादिनां सत्यवादतो—विजितवान्व्रजं यो बुधाग्रणीः ।
तमजितं जगज्जीवतारकं, हृदि विचिन्तये श्रीजगद्‌गुरुम् ॥ ८ ॥
गुरुगुणाष्टकं हेमवज्रिणा, रचितमद्‌भुतश्रीप्रदायकम् ।
पठति यो जनः शान्तमानसो—जननमृत्युतोऽसौ विमुच्यते ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# जगत्पूज्ययोगनिष्ठश्रीमद् बुद्धिसागरसूरि-स्मरणाष्टकम् ।

विबुधवन्दितं तत्त्ववेदिनं, वृषधुरन्धरं योगपारगम् ।
समयकोविदं सूरिशेखरं, स्मरत सद्गुरुं बुद्धिसागरम् ॥ १ ॥
क्षुभितदेहिनां संसृतेर्भयाद्–विशददेशनादायिनोद्धृतिः ।
अकृत येन तं सूरिशेखरं, स्मरत सद्गुरुं बुद्धिसागरम् ॥ २ ॥
विमलवाचनां यन्मुखाम्बुजाच्छ्रवणगोचरीकृत्यभावतः ।
अमरतां गताः सूरिपुङ्गवं, स्मरत तं गुरुं बुद्धिसागरम् ॥ ३ ॥
स्मरणमुत्तमं यस्य भूतले, सुखविधायकं शान्तपावनम् ।
शरणमङ्गिनां सूरिशेखरं, स्मरत तं गुरुं बुद्धिसागरम् ॥ ४ ॥
समतया मनोवृत्तिरद्भुताऽ–भवदखण्डिता यस्य कोमला ।
समजनेषु तं सूरिशेखरं, स्मरत सद्गुरुं बुद्धिसागरम् ॥ ५ ॥
चयनमक्षयं शास्त्रसंपदां, विहितमुत्कटं येन धीमता ।
विकसति स्वयं सर्वदाक्षितौ, स्मरत तं गुरुं बुद्धिसागरम् ॥ ६ ॥
विजितकामनः शुद्धमानसः, सततमुन्नतश्रीसुधाकरः ।
दलितदुर्मदः सूरिशेखरं, स्मरत तं गुरुं बुद्धिसागरम् ॥ ७ ॥
कलिमलाविलोऽप्यर्थिनां गण–श्चरणपङ्कजं यस्य संश्रितः ।
स तु गतापदः सूरिशेखरं, स्मरत तं गुरुं बुद्धिसागरम् ॥ ८ ॥
सुखनिधिप्रदं स्तोत्रमेतक–त्पठति यो जनो हेमसंस्कृतम् ।
सुरवरार्चितः पुण्यवानह–र्निशमनल्पधी राजतेतराम् ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# शास्त्रविशारदश्रीमद्–अजितसागरसूरि-स्मरणाष्टकम् ।

जगति शर्मदं धर्मनायकं, जनिमतां सदा क्षोभहारकम् ।
नमत भावतो भव्यमानवा–अजितसागरं सूरिशेखरम् ॥ १ ॥
मृदुवचस्ततिश्रेणिराजितं, मुखसिताम्बुजं भ्राजतेतराम् ।
जनमनोहरं दिव्यशान्तिदं, भुवि नमाम्यहं सूरिपुङ्गवम् ॥ २ ॥
जनगणाऽर्चितं सत्त्वतारकं, गुरुदयाकरं तत्त्वदेशकम् ।
कलिमलापहं क्लेशवारकं, शुभतपःक्रियाध्यानधारकम् ॥ ३ ॥
विविधवाचनादानकारकं, विकटकर्म्मणां मूलहारकम् ।
भवभवाऽर्त्तिहं श्रीगुरुं जन ! अजितसागरं सूरिमानम ॥ ४ ॥
जननमृत्युतो मोचनं नवै, गुरुकृपां विना देहिनामिह ।
गुरुपदाश्रिता ये भवाम्बुधिं, भुवि तरन्ति ते निर्मलश्रियः ॥५॥
उपकरोत्यसौ सर्वदा गुरु–र्वचनविस्तरात्सर्वदेहिनाम् ।
गुरुमिमं प्रभुं स्तोतुमक्षमः ! शिवसुखंकरं स्वर्गसिद्धिदम् ॥ ६ ॥
विजितकामनं दमितमानसं, पतितपावनं शान्तभावनम् ।
विदितसन्मतं शुद्धचेतसं, भजत सद्गुरुं सूरिशेखरम् ॥ ७ ॥
दुरितवार्दलश्रेणिमारुतं, सुरगणार्चितं भूरिभावतः ।
नमत सर्वदा मानवोत्तमाः ! अजितसागरं सूरिशेखरम् ॥ ८ ॥
विमलभावतो गीतमष्टकं, निजगुरोरिदं नम्रचेतसा ।
शिवदयानिधेर्हेमसागरै–र्जयतु शान्तिदं सर्वभूतले ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ' वैराग्यभावना '

( वैतालीयवृत्तम् )

संसारमसारमज्ञधीः, समवेक्ष्यैष हिताय केवलम् ।
विषमार्चिमनुक्षणं जनो–भजते कर्मनियन्त्रितो भुवि ॥ १ ॥
विदितश्रुततत्त्वमानवो–वचसातीतविरागभावनाम् ।
प्रतिपद्य यथाक्रमं तर–न्परांस्तारयितुं क्षमो भवेत् ॥ २ ॥
विधिरेव विधातुमीश्वरः, सततं प्राणभृतां सुखादिकम् ।
वितथं वदति द्विषद्गणो–विषमं पीडयतीति मां मुधा ॥ ३ ॥
सुखसंपदतीव धर्मिणं, श्रयतेऽनन्यधिया धरातले ।
विमुखा हि भवन्ति दुर्धियो–निजधर्मादतिसङ्कटच्छिदः ॥ ४ ॥
विचरन् विषमाध्वनि प्रियं, सुगमं मार्गमतीत्य मानवः ।
विधुरं लभतेऽविचारतः, प्रतिहर्तुं न तदस्ति शक्तिमान् ॥ ५ ॥
परमार्थसुखप्रदायको–यतिधर्मो जिनराजभाषितः ।
विधिना समुपासितः सितः, परलोकैकसुखस्य साधनम् ॥६॥
विभवा दयया विराधिताः, शुभया दुःखकराः प्रमादिनाम् ।
अत एव सुखार्थिभिर्जनैः, सदयः साधयितव्य एष वै ॥ ७ ॥
कलुषात्मनि धर्मभावना, न हि तिष्ठत्यकलङ्किता जने ।
निजकल्पितदुष्टचिन्तनं, जनयत्याशु विकारमुत्कटम् ॥ ८ ॥
समतोदधिरेष सर्वदा, सुखमत्यन्तमवाप्य मोदते ।
विकृतिं कलयन्न कश्चन, शिवशर्मैति नराधमः क्वचित् ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# विषयानुक्रमः


| | |
|---|---|
| निवेदन .... .... .... .... | ३ |
| प्रस्तावना .... .... .... .... | ५ |
| शुद्धिपत्रकम् .... .... .... .... | ८ |
| श्रीअजितसागरसूरिवृत्तान्तम् .... .... | १२ |
| श्रीमहावीरस्मरणम् .... .... .... | १६ |
| श्रीजिनेन्द्रस्तोत्रम् .... .... .... | २२ |
| गुरुजयन्तीस्तोत्रम् .... .... .... | २७ |
| श्रीमद्जगद्गुरुगुणाष्टकम् .... .... .... | ३० |
| श्री बुद्धिसागरसूरिस्मरणाष्टकम् .... .... | ३१ |
| अजितसागरसूरिस्मरणाष्टकम् .... .... | ३२ |
| ' वैराग्यभावना ' । ... .... ... | ३३ |
| मङ्गलम् .... .... .... .... | १ |
| श्रीचतुर्विंशतिजिनस्तवनसंग्रहः .... .... | २ |
| प्रशस्तिः .... ... .... .... | २४ |
| श्रीचतुर्विंशतिजिनस्तुतिसंग्रहः .... .... | २५ |
| श्रीमद्वीरजिनस्तुतिः .... ... .... | ४६ |
| प्रशस्तिः .... .... ... .... | ४७ |
| श्रीसुखसागरसद्गुरुस्तुतिः .... .... | ४८ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | |
|---|---|
| श्रीकेसरीयातीर्थस्तोत्रम् .... .... | ५० |
| ,, संखेश्वरपार्श्वनाथजिनस्तोत्रम् .... .... | ५२ |
| श्रीमदर्बुदाचलजिनेशस्तोत्रम् .... .... | ५४ |
| ,, चारुपतीर्थ स्तोत्रम् .... .... .... | ५६ |
| ,, उपर्यलातीर्थ स्तोत्रम् .... .... .... | ५८ |
| ,, मातरतीर्थस्तोत्रम् । .... .... .... | ६० |
| ,, शेरीशातीर्थस्तोत्रम् .... .... .... | ६२ |
| श्रीमद्गाशीतीर्थस्तोत्रम् .... .... .... | ६४ |
| ,, झघडियातीर्थस्तोत्रम् .... .... .... | ६६ |
| ,, झघडियातीर्थस्तोत्रम् .... .... .... | ६८ |
| श्रीमदिलादुर्गतीर्थस्तोत्रम् .... .... .... | ७० |
| ,, पञ्चासरपार्श्वनाथस्तोत्रम् .... .... | ७६ |
| ,, युगादीश्वरजिनस्तोत्रम् .... .... .... | ७८ |
| ,, सङ्खेश्वरपार्श्वनाथचैत्यवन्दनम् .... .... | ७६ |
| ,, सिद्धचक्र चैत्यवन्दनम् .... .... .... | ८० |
| ,, पर्युषणापर्वस्तुतिः .... .... .... | ८२ |
| ,, ऋषभदेवजिनस्तुतिः ( प्राचीना ) .... .... | ८३ |
| ,, महावीरजिनस्तुतिः ,, .... .... | ८४ |
| ,, शान्तिनाथजिनस्तुतिः ,, .... .... | ८५ |
| ,, पार्श्वनाथजिनस्तुतिः ,, .... .... | ८६ |
| ,, पार्श्वजिनस्तुतिः ,, .... .... | ८७ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




,, नेमिनाथजिन ( ज्ञानपञ्चमी ) स्तुतिः .... ८८
,, ऋषभजिनस्तुतिः .... .... .... ८६
,, महावीरजिनस्तुतिः .... .... .... ९०
,, सत्यस्मरणम् .... ... ... ९१
,, शत्रुञ्जयमण्डनश्रीऋषभदेवजिनस्तुतिः .... ९२
,, शान्तिनाथजिनस्तवनम् .... .... ९३
,, महावीरजिनस्तवनम् .... .... .... ९४
श्रीमद्वीरजिनस्तवनम् .... .... .... ९५
,, महावीरजिनस्तवनम् .... .... .... ९६
,, श्रीमहावीरस्तोत्रम् ... .... .... ९७
अथाऽऽनन्दमन्दिरनाममङ्गलस्तवनम् .... .... ९९
अथ मङ्गलस्तवनम् .... .... .... १०३
अथ चतुर्विंशतिजिनस्तोत्रम् .... .... ... ११४
अथ श्री पञ्चपरमेष्ठिस्तवनम् ... .... ११६
अथ जिनस्तवनं प्रारभ्यते .... .... .... ११८
अथार्हज्जिन स्तोत्रं प्रारभ्यते .... .... ... १२०
अथ श्रीमहावीरजिनस्तवनं प्रारभ्यते .... ... १२१
अथार्हत्स्तोत्रं प्रारभ्यते .... ... .... १२८
अथ सिद्धाष्टकं प्रारभ्यते .... .... .... १३०
अथाचार्यस्तोत्रं प्रारभ्यते .... .... ... १३२
अथोपाध्यायस्तोत्रं प्रारभ्यते.... .... .... १३४
अथ साधुस्तोत्रं प्रारभ्यते ... .... .... १३६


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ चतुर्विंशतिजिन स्तोत्रं समारभ्यते .... .... १३८
अथ श्री जिनवाणी स्तवनं प्रारभ्यते .... .... १४१
अथ श्री गौतमप्रशस्तिः .... .... ... १४२
श्रीमन्महावीराष्टकम् .... .... .... १४३
श्रीमहावीरजिन स्तवनम् .... .... .... १४५
,, सिद्धाचलाष्टकम् .... .... .... १४६
,, तारङ्गतीर्थाष्टकम् .... .... .... १४८
,, मल्लीनाथाष्टकम् .... .... ... १५०
( श्री पानसर ) श्रीमहावीराष्टकम् .... .... १५२
श्रीमद्गौतमस्वामिस्तोत्रम् .... .... .... १५४
गुरुगुणगीतम् .... .... .... .... १५८
श्रीसद्गुरु स्मरणम् .... .... ... १६०
गुरुविरहाष्टकम् .... .... .... .... १६२
गुरुस्मरणाष्टकम् .... .... .... .... १६३
श्रीमद्धरिभद्रसूरीश्वरगुणाष्टकम् ... .... १६५
कलिकालसर्वज्ञश्रीमद् हेमचन्द्राचार्याष्टकम् .... १६८
श्री बप्पभट्टिसूरिविरचितं शारदास्तोत्रम् .... ... १७०
,, तारङ्गातीर्थकोटीशिलास्तुतिः ... .... १७२
,, जिनवरस्तोत्रम् .... .... .... १७४
,, पार्श्वनाथस्तोत्रं ( मन्त्रगर्भितं प्राचीनम् ) .... १७६
श्रीमद्भद्रबाहुप्रणीतं मन्त्रगर्भितमुपसर्गहरस्तोत्रम् ) .... १७७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




,, उपसर्गहरस्तोत्रं ( पादपूर्त्तिरूपम् ) .... .... १८०
पूर्वाचार्यप्रणीतं पद्मावत्यष्टकम् .... .... १८४
घण्टाकर्णमहावीरमूलमहामन्त्राः ... ... १८६
श्री घण्टाकर्णमहावीरमन्त्रस्तोत्रम् .... .... १८६
श्री अर्बुदाचलवर्णनम् .... .... .... १९७
श्री आदिनाथजिनस्तवनम् ... ... १९८
श्री अर्बुदाचलश्री शान्तिनाथस्तवनम् .... ... २००
श्री नेमिजिन स्तवनम् .... ... .... २०२
अर्बुदस्थविशेषवर्णनम् .... .... .... २०३
अम्बिकास्तोत्रम् .... .... .... २०९
गुरुस्तोत्राणि ( अष्टकानि ) .... .... .... २११
सुधासिन्धुकाव्यम् .... .... .... २२२


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# लघुस्तोत्ररत्नाकरः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

# स्तोत्ररत्नाकरः ।

卐

( राग भैरवी—त्रिताल )

हे ! जनपालक ! शिवसुखदायक !
हे ! भवतारक ! दीव्यतनो !
आनन्दसिन्धो ! दुःस्थितबन्धो !
कर्मकलङ्कनिवारक ! हे ! ध्रुवपदम् !
नित्यनिरामय ! शांतिनिकेतन !
ब्रह्माऽनन्त ! सनातन ! हे !
जगदीश्वर ! जगदीश ! अनादे !
निरुपम ! देव ! निरञ्जन ! हे !
प्राणसमानसुधर्मनिधानक !
जीवनवल्लिसुधारक ! हे ! ॥ १ ॥

परमकृपालुचिदानन्दमूर्त्ते !
कर्मलताऽऽलिकुठारक ! हे !



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमहावीर ! जिनेश्वर ! नश्वर—
सुखसम्पत्परिहारक ! हे !
शुद्धसमाधिविधारक ! देहि—
मुक्तिपदं शिवदायक ! हे ! ॥ २ ॥

# चतुर्विंशतिजिनस्तवनसंग्रहः ।

प्रणम्य पादाम्बुजमन्तिमप्रभो-र्गुरोश्च शुद्धां श्रुतदेवतां तथा ।
तनोमि सम्यक् जिनभक्तिसंभृतो-जिनेश्वराणां स्तुतिमात्मसिद्धये॥

## श्रीमदादिनाथस्तवनम् ॥ १ ॥

( शार्दूलविक्रीडितम् )

श्रीमद्देववरानतोत्तमपदा-म्भोजद्वयः सिद्धिदः,
श्रीसर्वार्थविमानतोऽद्भुतसुख-श्च्युत्वाऽऽगतो भूतले ।
श्रद्धाध्याननिदानमानवगणः शर्मावलीसद्गृहं,
श्रीनाभेयजिनेश्वरोऽस्तु सुखदो धर्मार्थिनां प्राणिनाम् ।१।

त्रैलोक्यं कलयन्करामलकव-द्योनिं श्रितोनाकुलीं,
सर्वज्ञः पुरुषोत्तमोजिनवरः शान्तः समाधिस्थितः ।
सद्बोधाश्रितहृद्यहृत्सरसिजः सत्प्रेमराजन्मना-
भव्याम्भोजविभावसुर्विजयतां, श्रीमारुदेवप्रभुः ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्यग्ज्ञानकलान्विता विदधता प्रौढप्रतापश्रियो—
येनाऽज्ञानतमस्ततिर्विनिहता चेतःस्थिता प्राणिनाम् ।
सोऽयंमानसभूभिजाऽऽर्त्तिविरुधां संघातमुन्मूलयन्-
माङ्गल्यं घनराशिमाँस्तनुमतां कुर्याद्युगादीश्वरः ॥ ३ ॥

सर्वज्ञानमयोजगत्त्रयगुरु-र्यः संश्रिता यं जना-
येन श्रीरचला वृताऽमरगणा-यस्मै नमस्कुर्वते ।
यस्माद्दूरगतं विमोहतिमिरं, यस्याऽस्ति सेव्यंवचो-
यस्मिन्गौरवतास्थिताजिनवरं, वन्दे तमादीश्वरम् ॥४॥

श्रीसिद्धाचलसानुरत्नविलस-न्मूर्त्ते ! कृपावारिधे !
भव्यांभोजविबोधनैकतरणे ! राजत्प्रभाभास्वर ! ।
दुर्ध्यानाऽनलतप्तमेघपटल ! ग्लानाऽर्त्तिहानिप्रिय !
त्वं क्रीडस्व मदीयमानसवराऽऽ-रामे युगादीश्वर ! ॥५॥

---

## श्रीमदजितनाथस्तवनम् ॥ २ ॥

( मालिनीवृत्तम् )

वरविजयविमानं पुण्यवान्प्रोज्झ्यसद्यो-
हतभवमनुजाङ्गं, प्राप्तवान्प्राप्तरेखः ।
क्षपितभवभयारि-र्ध्येयमूर्तिप्रभावो-
ऽजितजिनवृषराशि-र्मङ्गलं वोददातु ॥ १ ॥

सकलभुवनसौख्य-श्रेणिदाताऽवदात-
चरितगुणगणेनोद्भासमानाङ्गयष्टिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगतिसकलमान्यो--मव्यमुद्रास्वरूपः,
स जयति यतिपूज्योवायुभुग्योनिरीशः ॥ २ ॥

विलसति शिवशान्ति-र्यस्य पादाऽरविन्दे,
अघविततिरजस्रं दूरतः संस्थिता च ।
नरपतिजितशत्रो-रन्वयाऽब्धिचन्द्रपेशः,
स विभुरजितनाथ-स्त्रायतां भूतसंघान् ॥ ३ ॥

कलितकलिगुणानां मानवानां नतानां,
निजपदमतिशोकं दानदक्षोददानः ।
प्रवरमहिमभर्त्ता तारकोयःश्रिताना-
मजितजिनवरोऽसौ पातु मां तीर्थनाथः ॥ ४ ॥

जननमरणशान्ति-र्यत्क्रमाऽम्भोजयुग्मं,
सकृदपिमनुजानां जायते पश्यतां द्राग् ।
कृतनिजकृतिशान्ति-र्भग्नतान्तिप्रकारः,
स जगदखिलसिद्धिं, तीर्थनाथोददातु ॥ ५ ॥

---

## श्रीसंभवनाथस्तवनम् ॥ ३ ॥

( उपजातिवृत्तम् )

ग्रैवेयकात्सप्तमतोऽतिपुण्य-श्च्युत्वाऽतिशस्तान्मृगशीर्षजन्मा ।
नमाम्यहं संभवनाथमीशं, तं मोक्षदं देवगणं वरेण्यम् ॥१॥

निधानमक्षीणममन्दसंपदां, निदानमचव्यगुणाव्रजानाम् ।
पात्रं परं ज्ञानवचोऽमृतानां, ध्यानाऽधिरूढं कुरु युग्मराशिम् ।२।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्भक्त्यधीनीकृतमानसाब्जाः, सद्योबभूवुर्भवभीतिमुक्ताः ।
सद्भावनोल्लासगुणानुरक्ता–स्तं देवदेवाधिपतिं भजन्तु ॥३॥

सुखप्रदं पन्नगयोनिमन्तं, योनिप्रभेत्तारमनल्पवीर्यम् ।
जगत्रयाधारमखण्डभावं, जिनेश्वरं संभवमाश्रयामि ॥ ४ ॥

श्रीमान् प्रतापाश्रयसंभवेशो–विश्वोपकाराय कृतप्रवृत्तिः ।
स सेव्यतामक्षयसंपदायै,दीव्यानुभावो भुवि भव्यलोकाः! ।५।

## श्रीमदभिनन्दनस्तवनम् ॥ ४ ॥

( द्रुतविलम्बितम् )

विकसदम्बुजलोचनरोचनो–विशदशारदचन्द्रसमाननः ।
विमलतत्त्वगुणोऽस्त्वभिनन्दनो-जयकरोजगति क्षमतानिधिः१

मिथुनराशिगतःसुगतिप्रदो–मुषकभोजनयोनिरयोनिकः ।
जयजयाऽर्थिगणेष्टविधायको-निखिलभक्तजनाऽर्त्तिहराग्रणीः।२

हरिणराजसुलाञ्छनभूषित–क्रमसरोरुहकान्तिविराजित ।
जगति शाश्वतसिद्धिविधायकं, त्वदतिरिक्तमहं न विलोकये ।३।

प्रवरसंवरभूमिपतेःसुत !, स्तुत सुराऽसुरमानवभूमिपैः ।
शरणमस्तु पदं तव निर्मलं, मम सुभक्तिरसोर्जितचेतसः ।४।

सकरुणं करुणाऽऽलय ! ते पदं, विभवदायकमस्खलितप्रभम् ।
भवभयाऽभयकारकमञ्जसा, वयमनन्यधिया तदुपास्महे ।५।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीसुमतिनाथस्तवनम् ॥ ५ ॥

( स्रग्धरावृत्तम् )

शुद्धस्वान्तारविन्दे-ऽनवरतयतना भव्यभावा यदीयं,
ध्यायन्तःपादपद्मा-म्बुजयुगलमिह क्षेमभावं प्रपन्नाः ।
सन्तोषस्वादुभोज्यं श्रुतरसनतया स्वादयन्तः प्रकामं,
शुद्धां बुद्धिं प्रदद्या-त्सुमतिजिनवरो-भक्तिराजज्जनेभ्यः ॥१॥

वैमानं भूरिमानं प्रवरगुणयुतो-निर्गुणश्रीजयन्तं,
सन्त्यज्य स्फीतकीर्त्तिः स्थितिमभयकरीं योभुवि स्वीचकार ।
विख्यातो यस्य तीर्थ-ङ्करसुमतिविभो-राक्षसाख्यो गणश्च,
तद्ध्यानं सिद्धिकारं जनशुभमतिदं केवलं राधनीयम् ॥२॥

तीर्थाधीशः समस्ति क्षपितपररातिर्मेघभूपाऽऽत्मजोमे,
जीमूताभासमानः समसुहृदसुहृ-न्मानसे मानहीने ।
तस्मात्त्वां द्वेषवन्हे ! प्रशमनमनघो-नेष्यति क्रूरकर्मन् !
सद्यः संसारदावाऽ-नलगतजनताऽऽ-नन्दसन्दोहदायी ॥३॥

नक्षत्रक्षेत्रवृद्धि-र्भवति भुवनगा यद्पदाम्भोजलक्ष्म्या,
शान्ता दुर्दान्तभावाः, परमपटुतर-ज्ञानभास्वत्प्रभावात् ।
योनिं संप्राप्त आखो-र्व्यरुचदतिविभां, वर्द्धयन् वृद्धशील-
स्तं देवंदेववन्द्यं सुमतिजिनमहं प्रार्थये प्रार्थनाभिः ॥४॥

भ्राजत्सौवर्णवर्णो-गजरिपुतुलनां धारयन्मामकीने-
चित्ताऽऽरामे विशाले निवसति सुमतिः सर्वदा सर्वपूज्यः।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्मात्त्वं दुष्टराग–द्विप ! कुरु गमनं देशमन्यं विचिन्त्य,
सन्तास्तिष्ठन्ति यत्र क्षणमपि वसतिर्नोऽसतामेव शस्या ॥५॥

---

## श्रीपद्मप्रभस्तवनम् ॥ ६ ॥

( भुजंगप्रयातं वृत्तम् )

प्रधानप्रभाराशिभिर्भ्राजमानः, प्रभिन्नातिदुर्दान्तमोहप्रमादः ।
सुसीमाऽऽत्मजश्रीपतिर्मेऽर्चनीयः, सदा त्वं सुरेन्द्राऽभिवन्द्य-
क्रमाब्जः ।१।

स कन्यारन्यराशिं दधानोऽत्रपद्म-प्रभोर्भूतले भूतलोकप्रकाशी ।
करोतु क्रियाज्ञानरक्ते मदीये, निवासं हृदि श्रेष्ठभावे सदैव ।२।

मनःपङ्कजं नित्यमेव त्वदीयं, स्वरूपं स्मरत्यक्षयं देव ! यस्य ।
तमेवाऽतिधन्यं नरं पुण्यवन्तं, त्रिलोकाऽधिनाथाऽत्र जानामि
लोके ।३।

वरेण्यं शरण्यं त्वदङ्गप्रभावं, प्रकामं स्मराम्यक्षताऽक्षप्रकाण्डैः।
कृपाधीश ! पद्मप्रभ ! क्षेमधाम, महायोगिगम्यं मनोवागतीतम् ४

त्वदीयप्रभाभासुरोवासरेशो–जगज्जीवपद्माकरं सावधानः ।
सदा सत्वरं स्वक्रियायां विबुद्धं,करोतीशपद्मप्रभ ! क्षोभहारिन् ! ५

---

## श्रीसुपार्श्वनाथस्तवनम् ॥ ७ ॥

( तोटकवृत्तम् )

गुणवन्तमनन्तकलानिचितं, पृथिवीतनुजं तनुताराहितम् ।
स्वयमेव सदा सुखदानरतं, परमोत्तमरूपविभानिरतम् ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिवृन्दसमानकरं प्रवरं, हृदयेप्सितसिद्धिवितानकरम् ।
भवभीतिदवाऽनलशान्तिकरं, करदीकृतधर्मरिपुप्रकरम् ॥२॥

अतिमर्दितमोहनकर्मबलं, सुरनाथगणाऽर्चितपत्कमलम् ।
कृतधर्मरताऽखिलरूढखलं, प्रभया वरयाऽश्रितहस्ततलम्॥३॥

तुलराशिविराजितमाराजितं, वृकयोनिभृतं निभृताऽऽत्मव्रतम् ।
गतरागमदं शिवशर्मपदं, शरदिन्दुसमाननवारिरुहम् ॥४॥

कनकोत्तमकान्तसुकान्तिधरं, वरपार्श्वसुपार्श्वजिनप्रवरम् ।
विनयाश्रितमानसकोऽहमिह,प्रणमामि मुदाऽमितभावयुजा ॥५॥

---

## श्रीचन्द्रप्रभस्तवनम् ॥ ८ ॥

( उपजातिवृत्तम् )

त्वत्पादपद्माऽर्चनतोविधाय, प्राचीनजन्माऽर्जितकर्मराशेः ।
निःशेषमन्तं भववारिराशेः, प्रयान्ति पारं भवतःप्रभावात् ॥१॥

चन्द्रप्रभ ! त्वां शरणं प्रपद्ये, निर्भिन्नमायाऽतितमःप्रकाण्ड ! ।
सन्तस्तरन्त्येव तव प्रभावा–दनन्यभावेन हि गेयकीर्ते ! ॥२॥

अनन्तकान्तिप्रभवःसदाशीः, सदाशिवः सौम्यवपुःप्रभावः ।
चन्द्रप्रभोनिर्मलमानसाय, ददातु शं चन्द्रविभःप्रभुर्मे ॥३॥

उद्दामचारित्रकलानिधान !, त्वदाननाऽम्भोजविलोकिनोमे ।
गताऽऽपदुद्भूतमनन्तशर्म, चन्द्रप्रभ ! प्रौढमहोधिराज ! ॥४॥

स्तोतृव्रजस्तुत्यगुणप्रकारः, प्रकामसंभूतिविभासमानः ।
तनोतु सौख्यं समविश्वलोकः, पद्मप्रभोवृश्चिकराशिभर्ता ॥५॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीसुविधिनाथस्तवनम् ॥ ९ ॥

( वसन्ततिलकावृत्तम् )

लोकत्रयाऽभिनमनीयपदारविन्द !,
 लक्ष्मीपते ! मकरलाञ्छितपादपद्म ! ।
संसारसागरभयाद्विकरालरूपा-
 त्त्रायस्व मां सुविधिनाथ ! जगत्प्रभो ! त्वम् ॥१॥

सेवापरेषु सकलेषु जनेषु नित्यं,
 देवा भवन्ति सकला अपि सौम्यभावाः ।
लोकत्रयेऽविषमभाववता त्वयैव,
 संजातमस्तु नमनं तव पादयोर्मे ॥ २ ॥

सुग्रीवराजतनय ! प्रथितप्रभाव !,
 भव्याऽऽत्मनां त्वमसि तारक उत्तमौजाः ।
तस्मात्त्वदीयभजनं प्रबलं वदन्ति,
 सत्याऽश्रितातिवचना विदितप्रभावाः ॥ ३ ॥

भव्याःश्रयन्ति भवतारक ! शान्तिसद्म,
 संप्रेक्षणात्सुविधिनाथ ! भवत्सुमूर्त्तेः ।
सावद्यशान्तिजननोत्तमभूमिमीश !,
 किं चिन्तयाऽन्यसुरपादपकामधेन्वोः ॥ ४ ॥

मत्वा भवन्तमनघं सुदयानिधान-
 मभ्यर्थयामि सुतरां धनराशिग ! त्वाम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं त्वदीयचरणाऽम्बुजरक्तचित्त-
स्तिष्ठामि शश्वदखिलेश ! तथा कुरुष्व ॥ ५ ॥

## श्रीशीतलनाथस्तवनम् ॥ १० ॥

( भद्रिका [ललित] छंदः )

जयतु शीतलः शान्तभावनो-जनमनोहरोऽरिष्टनाशकः ।
अघनिवारको मुक्तिदायको-गुरुगुणः सदा भाविताऽऽत्मनाम् १
शिवशुभाङ्कुरोवृद्धिकारणे, जलधरोपमं विश्वतायिनम् ।
अखिलसंपदां हेतुमीश्वरं, जिनवरं स्तुवे शीतलं सदा ॥२॥
दृढरथक्षितीन्द्राऽऽत्मनन्दनं, सकलनन्दनं नाकिसंस्तुतम् ।
नमत देहिनोभूरिभूतये, कलिमलक्षतिर्जायते ततः ॥३॥
सुरतपत्तने निश्चलस्थितं, विदधदर्हतामीश्वरः सताम् ।
हृदयपङ्कजे ध्यानकारिणां, शिवकरः स्मृतःशीतलःप्रभुः ॥४॥
अजनि सर्वदा व्याधिहारकं, तव सुदर्शनं मादृशां नृणाम् ।
जननमृत्युतो नास्ति मेऽधुना,भयमहो ? क्षितौ शीतलप्रभो !॥५॥

## श्रीश्रेयांसस्तवनम् ॥ ११ ॥

( मन्दाक्रान्तावृत्तम् )

दुष्टादृष्टि-श्चिरपरिगता स्वात्मनिष्ठाऽतिमत्ता,
गाढव्याप्ता निजबलपरिस्फुर्त्तितश्चण्डभावा ।
दूरं सद्यो-व्यपगतवती यस्य दृष्टिप्रभावात् ,
तं श्रेयांसं शिवसुखकरं नौमि नित्योत्सुकोऽहम् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विष्णोर्वंशे-ऽतुलगुणनिधेर्भूपते-र्भास्कराभो-
दानेदक्षो-ऽमरगणनतो-ध्वस्तदुष्टप्रचारः ।
प्रादुर्भूता-ऽनवमविरति-स्तत्त्वराशिप्रणेता,
श्रीश्रेयांसः प्रभुरनुदिनं लोकरक्षाकरोऽस्तु ॥ २ ॥

संसारेऽस्मि-न्विविधविधुरे मोहभूपाऽभिभूते-
विश्वस्तानां, विमतिदलनः कल्पनातीतसत्त्वः ।
लोकाऽलोक-प्रशमजनको-ध्यानगम्यस्वरूपः,
श्रीश्रेयांसो जिनगणवरो-ऽभ्यर्चनीयोन केषाम् ? ॥३॥

योगक्षेमं जनयति सतां यत्पदाम्भोजरेणु-
र्निर्भिन्नार्त्तिः सकलवसुधा-चारिणां चोत्तमाभः ।
शान्ताऽनङ्गः सुखपरिगतः प्रेक्षणीयोत्तमाङ्गः,
स श्रेयांसः शरणमचलं जायतां मे दयालुः ॥४॥

निर्मोहारिः प्रवरमकरा-ख्यातराशिप्रचारी,
निर्भावारि-र्विषमविषय-क्षोभकारी सुचारी ।
सख्याधारी-सदयवचन-स्तोमवृष्टिप्रसारी,
श्रीश्रेयांसः, सततमचलं, शं विदध्याज्जनानाम् ॥ ५ ॥

---

## श्रीवासुपूज्यस्तवनम् ॥ १२ ॥

( वसन्ततिलकावृत्तम् )

पूर्णेन्दुसुन्दरकलारमणीयकान्ति-
कान्ताऽऽननं प्रथितदेहविभावितानम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्यक् पवित्रचरितं परिशान्तदृष्टिं,
श्रीवासुपूज्यमनिशं नमतेष्टसिध्यै ॥ १ ॥
शिष्टाङ्गिसंघपरिवेष्टितसन्निवेशं,
कुम्भाऽऽख्यराशिविलसन्तमजस्रबोधम् ।
विश्वेश्वरं प्रवरशीलकलाऽभिरामं,
लोकास्स्तुवीध्वमनघं वरवासुपूज्यम् ॥ २ ॥
दुर्मानवा अपि विभावमनुश्रयन्त-
स्त्वत्पादपद्मभजनानुमता जिनेश ! ।
प्रक्षीणमोहततयस्तव सत्यरूप-
मासेदुरुच्चविभवा जगदेकनाथ ! ॥ ३ ॥
भूताऽधिनाथवसुपूज्यनरेशगेहे,
संप्राप जन्म सुखदं जगतीगतानाम् ।
यः सर्वदः शमनको विपदां जनानां,
तं वासुपूज्यपरमेशमहं स्तवीमि ॥ ४ ॥
सत्यात्मलब्धिजननोत्तमहेतुमन्यं,
त्वामन्तरेण भवतारक ! नैव मन्ये ।
तस्मात्त्वदीयचरणाऽम्बुजदर्शनं मे,
शान्तिप्रदायि सततं जिनपुङ्गवाऽस्तु ॥ ५ ॥

---

## श्रीविमलनाथस्तवनम् ॥ १३ ॥

( हरिणीप्लुतवृत्तम् )

उपकृतमतिं, संसारेऽस्मि-न्महत्यधिदैवत-
मखिलसुकृति-श्रेणीसेव्यं, विनाशितविप्रियम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विपुलविलस–त्सत्यज्ञान–प्रदायिनमीश्वरं,
विमलमरि–हन्तारं नित्यं, नमामि विभूतये ॥१॥

प्रशमसुखदं, श्यामाङ्गं, विचित्रकलाऽन्वितं,
भवरतिहरं, शुद्धाऽऽनन्दं, सदाऽऽत्मरुचिप्रदम्।
कुमतिदलनं, स्वाऽऽत्मारामं, परार्थपरायणं,
सुमतिसदनं, भग्नक्षोभं, भजेद्विमलाऽधिपम् ॥ २ ॥

कुमतिपिहित–स्फारोद्बोधा–विमूढजनास्तव,
विमलविभवां, मूर्त्तिं रम्यां, निरीक्ष्य मनागपि।
विमलजिन! ये द्वेषातीता–भवन्ति न तादृशां,
गतशुभदृशां, दुश्चेष्टानां, गतिर्बत कीदृशी ॥ ३ ॥

अभयपदवी, धीराधीना, यदीयमुखोद्गता,
भववनगत–क्षोभक्षान्तिं, विधापयति क्षणात्।
अनुपममहा–ऽऽनन्दाऽऽत्मानं, सुरेश्वरपूजितं,
तमतिविमलं, देवं वन्दे, प्रधानपदस्थितम् ॥ ४ ॥

विमलभगवन्! शस्याचाराः, सदैव वचस्तव,
मनसि विमले, भव्याऽऽत्मानो–विचिन्त्य जिनेश्वर!,
विकासितधिय–स्त्वामाराध्यं, भजन्ति महोत्सुकाः,
सुकृतसुभगा–धन्याऽऽत्मान–स्त एव विचक्षणाः ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीअनन्तनाथस्तवनम् ॥ १४ ॥

( भुजंगप्रयातं वृत्तम् )

सुभव्याऽऽत्मनो यस्य दीव्याऽऽत्मगेहे,
सदा द्योततेऽनन्तचिन्तामणिर्याः ।
स्वयं तस्य दुष्टाऽपदो यान्ति दूरे,
सुसंपद्विलासो भवेदच्चतश्चः ॥ १ ॥
समस्ति प्रभा मानहीना यदङ्गे,
मृगाङ्कोष्णरश्मिविभा भासयन्ती ।
नतं देवदेवाऽसुरेन्द्रैर्नृनाथै-
रनन्तप्रभुं तं मुदाऽहं स्मरामि ॥ २ ॥
स्वरूपस्थितं सर्वलोकप्रकाशं,
जनो योगतःसिंहसेनाऽऽत्मजातम् ।
निरीक्षेत तं नेत्रवन्तं जनेषु,
सुधन्यं भवोच्छेदकारं हि मन्ये ॥ ३ ॥
समाराधतेऽनन्तनाथं विनाथं,
जनः सज्जनाऽऽनन्ददायी सुधीर्यः ।
तदीयाऽखिला वांछिता कार्यसिद्धिः,
सदा सन्निधित्वं जना ! नोजहाति ॥ ४ ॥
सुखाऽऽधारकं मीनराशिप्रतीत-
मनन्तं जिनेशं कृपावारिराशिम् ।
भवोत्तारकं तं नमन्तु प्रसन्नं,
जना इष्टलब्धिप्रदातारमीशम् ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीधर्मनाथस्तवनम् ॥ १५ ॥

( कामक्रीडाछन्दः )

सत्यज्ञानं भास्वद्रूपं धर्माऽऽत्मानं ध्यातॄणां,
ध्यानीयाङ्कं सिद्धिक्षेत्रं प्रेमाऽमत्रं नक्षत्रम् ।
चिन्तारत्नं नष्टायत्नं वन्दे प्रत्नं दुःखघ्नं,
धर्मेशानं वृत्यालानं सन्नामानं भूमानम् ॥ १ ॥
संतप्तानां सम्यक्त्राता मारीहर्त्ता त्वं भर्त्ता,
दीनादीना-मापद्धर्त्ता संपत्कर्त्ता सत्त्वानाम् ।
दुर्भावानां नित्यं हर्त्ता सिद्धेर्दाता निर्माता,
विश्वत्राता कामादीनां मूलोद्धर्त्ता विख्याता ॥ २ ॥
स्तोतुं योग्यो भव्यैर्भाग्यैर्योग्यैर्गम्यो विज्ञेयः,
श्रद्धाध्येयो बुद्ध्याऽमेयो भक्तैर्गेयः संश्रेयः ।
पापाऽपायो-राजत्कायो-दाता रायो निर्मायः,
संसर्त्तव्यः सत्त्वश्लाघ्यःप्राप्तश्रेयःसातत्यः ॥ ३ ॥
संपज्ज्येष्ठः साधुश्रेष्ठः पूज्यप्रेष्ठो-भूयिष्ठो-
मानाऽस्पृष्टो विद्वत्पृष्टः कामाऽक्रुष्टः संजुष्टः ।
सद्भिर्भक्त्या-शक्त्याधीनैः श्रद्धावद्भिः संस्तुत्यो-
हेयो नो वै श्रीवज्राङ्को-भग्नातङ्को निःशंकम् ॥ ४ ॥
यः श्रीधर्मो-धर्माऽऽराम-स्तीर्थाधीशो-भूमीशो-
निःशेषार्थ-प्रादुष्कर्त्ता नष्टक्लेशो-निःसीमा ।
कर्के राशिं त्रैलोक्यानां संत्रातारं संधत्ते,
भव्या ! भावा-त्संसेव्यः स क्षिप्रं लोके शान्ताऽऽत्मा ॥५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीशान्तिनाथस्तवनम् ॥ १६ ॥

( द्रुतविलम्बितवृत्तम् )

शशिसमानवराऽऽननभासुरः, सुरनरेन्द्रनताऽग्रपदाम्बुजः ।
प्रचुरविघ्नतमस्सुदिवाकरो--जयतु शान्तिदशान्तिजिनेश्वरः ॥१॥

सुमतिदो दमितेन्द्रियवाजिक–श्चपलाचित्तनिवारकबन्धुरः ।
विशदकान्तिभराश्रितनासिको–भवतु शान्तिजिनोजनशान्तिदः

प्रवरसिद्धिकरं महिमाकरं, प्रथितकीर्त्तिभरं जगदीश्वरम् ।
विधिवशादनुभूतकृतिक्रियं, भजत मेषकराशियुजं नराः ! ॥३॥

जनमनोरथदेवतरूत्तमो–निखिलदोषविवर्जितमानसः ।
अनुपमोत्तमतत्त्वविभासकः, सकरुणोऽर्चनीयः सततं सताम् ।४॥

विमलभव्यसरोजविबोधने, निशितरश्मिरनुत्तमशासनः ।
विहितदुष्टपराक्रमरोधनः, शुभवतामवताद्गणमीश्वरः ॥ ५ ॥

---

## श्रीकुन्थुनाथस्तवनम् ॥ १७ ॥

( पञ्चचामरछन्दः )

प्रभूतभूतिसौध ! मानसाऽघराशिदारक !,
प्रपूजनीयपादवारिज ! प्रभिन्नरागधीः ! ।
सुमन्त्रतन्त्रजातसिद्धिरन्वहं लुठत्यहो,
पदाऽम्बुजे सुराऽर्चनीयकुन्थुनाथ ! तावके ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाप्रभाभरोर्जितं जिताऽन्तराऽरिजातकं,
प्रजेशसूरनन्दनं सुनन्दनं सुमेधसाम् ।
प्रसिद्धसिद्धविद्ययाऽऽश्रितं सिताऽम्बुजाऽऽननं,
सदोद्यतोऽहमीश्वरं नमामि विश्ववन्दितम् ॥ २ ॥

सुमेरुभूधरेन्द्रधीरवीर्यसारमुत्कटं,
सुभोग्यभोगवर्जितं प्रमर्दिताऽऽधिवेदनम् ।
अयोग्ययोग्यनीतिरीतिपारगामिनं वरं,
भजध्वमाशु जन्तुजातखेदखेदकं जिनम् ॥ ३ ॥

पवित्रचारुचित्रवृत्तिधारकं कृपाधरं,
निखर्वगर्ववारकं सुपर्ववर्गसेवितम् ।
जगत्त्रयाऽतितारकं प्रतारितप्रपञ्चकं,
भज श्रियोत्तमोत्तमं जिनेश्वरं वराऽऽप्तये ॥ ४ ॥

सुधर्ममर्मवेदिमानसाब्जभानुमालिनं,
शुभाशयाऽभियुक्तमुत्तराशियोगराजिनम् ।
समस्तशस्तभावहेतुकं विमायिनं जिनं,
भजामि कुन्थुनाथमिद्धबोधिबीजवापिनम् ॥ ५ ॥

---

## श्रीमदरनाथजिनस्तवनम् ॥ १८ ॥

( रामगिरिरागेण गीयते )

क्लिष्टताचोदकं, शिष्टजनमोदकं,
विमतपथतोदकं, सुमतकारम् ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विजितपञ्चाऽऽशुगं, मथितमोहोरगं,
भवचितापारगं, नष्टरागम् ॥ क्रि० ॥ १ ॥
शिवसुकान्तावरं, विदिततत्त्वाकरं,
विहितशास्त्राऽऽदरं, शुद्धिकारम् ।
परमशान्त्यालयं, रचितवैरिक्षयं,
समतया निर्भयं, शस्तकायम् ॥ क्रि० २ ॥
सर्वसुखदायकं, सिद्धिपदभासकं,
स्वाऽऽत्मगुणराजकं वीतशोकम् ।
शमितसन्तापकं, भव्यजनतारकं,
भवभयाऽऽवारकं, सुभगकान्तिम् ॥ क्रि० ॥३॥
विगतपरभावनं, विहितसर्वाऽवनं,
भुवनपरिपावनं, शान्तमूर्त्तिम् ।
भक्तजनसंस्तुतं, दीव्यगुणसंभृतं,
जन्मना संगतं, मीनराशिम् ॥ क्रि० ॥४॥
सततमुक्तिप्रदं, वमितसर्वाऽऽपदं,
प्रमितसिद्धाऽऽस्पदं, ज्ञानगम्यम् ।
अर्हदरनाथकं, परदरोच्छेदकं,
शिवसुखोत्पादकं, नौमि नित्यम् ॥ क्रि० ॥५॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीमल्लिनाथजिनस्तवनम् ॥ १९ ॥

( तोटकछन्दः )

सुततत्त्वसुतत्त्वधरं प्रवरं, वरदं सितदन्तविभाविभवम् ।
परमोत्तममल्लिजिनं शिवदं, दमितेन्द्रियवारमजं जपत ॥१॥
नृपकुम्भसमुद्भवसिद्धभवं, भववारिविशोषककुम्भभवम् ।
जनताप्रणतक्रमतामरसं, वरमल्लिजिनेशमहं कलये ॥ २ ॥
निरुपाधिकसंपदतिप्रमदं, प्रभया विलसन्तमनुत्तमया ।
तमसा विकलं सुकलं मृदुलं, जगदीशमलं स्मरतेष्टवलम् ॥३॥
भजराशिभृतं निभृतं चमया, परिशोभितभीतिविवर्जिततनुम् ।
परिखण्डितमानसमानरतिं,नमताऽखिलभव्यजनाः!सुजिनम् ॥
सततं भवतारक ! मल्लिविभो !, जगतामशिवं हर तापहर ! ।
तव पादसरोजरतिर्भवतु, भवतेतिविधेयमनन्त ! मयि ॥५॥

---

## श्रीमुनिसुव्रतजिनस्तवनम् ॥ २० ॥

( द्रुतविलम्बितवृत्तम् )

विकचतामरसाऽऽभशुभाऽऽननो-विदलिताऽखिललोकतमोभरः ।
विषयवासनयोद्ग्रथिताऽऽत्मनां,हतधियांभवपाशविमोचकः॥१॥
निजपवित्रचरित्रमनोगति-र्मतिमतां वरराजिभिराश्रितः ।
विमलनीलवरद्युतिराजित-उचितवर्मिमहाव्रतदेशकः ॥२॥
विगतसंशयमेव सदा स्थितो-निजपराऽऽत्मविभेदविभेदकः ।
सुरपतिप्रकरप्रतिबोधम-शुभयशःप्रकरः प्रथिताऽऽशयः ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मकरराशियुतः शुभराशिमा-नतजनाऽऽर्त्तिहरो महसोर्जितः।
वरगुणोदितदीव्यवपुर्धरः, सुभगलक्षणलाञ्छितपत्कजः ॥४॥

विततनित्यपदार्थनिरूपकः, शमितदुष्प्रथिताऽन्यनिरूपणः।
शिवसमृद्धिवितानविवर्द्धको-विजयतां मुनिसुव्रततीर्थकृत् ॥५॥

---

## श्रीनमिनाथजिनस्तवनम् ॥ २१ ॥

( पञ्चचामरछन्दः )

नमज्जगज्जनव्रजं सुरेन्द्रसेवितक्रमं,
क्रमाङ्गुलीनखत्विषाऽतिभासिताऽम्बराऽऽलयम् ।
जगत्पते ! नमीश ! सत्यरूपसर्वदास्थितं,
भवन्तमेव संस्तुवे. मनःसरोरुहे मुदा ॥ १ ॥

प्रकाशयत्यशेषलोकभव्यमानसाम्बुजा-
न्यहो विचित्रधामराशिरत्नतस्त्वदुत्थितः ।
समानतां नु तावकीं विभो ! भजन्ति नश्वर-
प्रभाधरोष्णरश्मिशीतरोचिरादयः कथम् ? ॥ २॥

अनुत्तमोर्द्धसिद्धिसद्ममूर्धकल्पितास्थितिं,
चराऽचराऽऽदिसर्वदर्शिनं विकस्वरप्रभम् ।
विमाननमाननीयतत्त्ववादवादिनं जिनं,
नमीश्वरं भजध्वमुच्चधामलिप्सया जनाः ! ॥३॥

विभाति यत्पदाम्बुजे प्रफुल्लनीलवारिजं,
तमद्वितीयबोधनप्रकाशिनं वराशिषम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शरच्छशाङ्कदीप्तिहारिभूरिभूतिमण्डलं,
भजन्तु ! भावुका ! नरा भवाऽब्धितारकं जिनम् ॥४॥

अरिष्टकष्टकारिकर्मवारिशर्मदायकं,
विपत्तिपत्तनक्षयज्वलद्धनञ्जयाऽर्चिषम् ।
प्रभिन्नमानभूपतिं पतिं त्रिलोकवासिनां,
नमामि मोक्षदं प्रभुं नमीश्वरं कृपापरम् ॥ ५ ॥

---

## श्रीनेमिनाथजिनस्तवनम् ॥ २२ ॥

( उपजातिवृत्तम् )

यः शुद्धबुध्याऽऽत्मसमं विदित्वा, निःशेषभूतादिगणं सुरक्ष्यम् ।
सन्मानितं सत्पुरुषैर्वरेण्यं, समत्वमङ्गीकुरुते स्म सद्यः ॥१॥

यश्चाऽतिसंक्लिष्टपशुव्रजाना–मार्त्तध्वनिं श्रोत्रपथं विनीय ।
न्यवीवृतत्सारथिना स्वकीयं, रथं स्वबन्धूनवमत्य विद्वान् ।२।

कृताऽरिषड्वर्गजयेनयेन, राजीमतीं राजसुतां विहाय ।
शिवार्थिना संजगृहे भवाऽपहा,शुभाऽऽवहा दीव्यमुनीन्द्रलक्ष्मीः।

शिवाऽऽत्मजातं प्रशमाकरं तं, कन्याख्यराशिं दधतं विजिष्णुम् ।
विशिष्टमानन्दनिधानमेकं, नेमीश्वरं नौमि भवाऽब्धिपोतम् ।४।

विजित्य कामं जितसर्वलोकं, सत्यस्वरूपे रममाणमीशम् ।
निसर्गसौन्दर्यविराजमानं, स्मरामि तीर्थाऽधिपनेमिनाथम् ।५।

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीपार्श्वनाथजिनस्तवनम् ॥ २३ ॥

( पञ्चचामरछन्दः )

जगत्प्रकामकामितप्रदानदक्षतायुतं,
निजस्वरूपभाविताऽऽत्मतत्त्वसत्त्वसेवितम् ।
गतप्रमादसंगतिं श्रितप्रकृष्टसंगतिं,
भजध्वमक्षयप्रभं प्रभाविपार्श्वमीश्वरम् ॥ १ ॥
नृपाऽश्वसेननन्दनं सुमन्दरागतारकं,
निवारकं विपत्तिकारकैनसां सुमानसम् ।
सुसंपदाऽतिभूषिताऽमृताशिपूजितक्रमं,
समन्ततोविशालचारुदेशनाकृताऽभयम् ॥ २ ॥
व्यधत्त भक्तिवत्सलाञ्जनाञ्जनक्षमानपि,
क्षणाद्दयार्द्रचेतसःसुभद्रचिन्मयाऽऽत्मकः ।
तुलाऽभिधानराशिमादधान उत्तमोत्तमः,
प्रसन्नसन्नपापराशिरिष्टभूतिभूषितः ॥ ३ ॥
प्रभूतभव्यसंपदां सुधामधामनि स्वके,
निजश्रिया विराजितः स्थितः सुखप्रदः सताम् ।
समानमोहलोभरोषवार्दलौघमारुतो-
विजायतां स पार्श्वनाथ इष्टसिद्धिसाधकः ॥४॥
भवन्तु पार्श्वतीर्थकृन्नखप्रभाप्रभाकरः,
सुभव्यभव्यमानसाऽम्बुजालिबोधकारकः ।
प्रकामशाश्वतप्रभानिधिं यदीयमुष्णगु-
र्निरीक्ष्य तत्पदेच्छया भ्रमन्निवेति लक्ष्यते ॥५॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीमहावीरजिनस्तवनम् ॥ २४ ॥

( शार्दूलविक्रीडितम् )

यद्भक्तिप्रसरत्प्रभावकलितां लीलामखण्डश्रियां,
सद्भाग्यैकवशंवदां सुरगवी–माराधयन्ति चणात् ।
तत्सत्याश्रितवाक् सुधारसमयो–विश्वाऽऽगमार्थोऽत्र यः,
श्रेयःसंजननो भवत्वतितरां, लोकत्रयस्थायिनाम् ॥ १ ॥

श्रेयःसन्ततिवर्द्धकं भवभय–चोभप्रदं भास्वरं,
दुर्वारेन्द्रियवैरिवारविजयि, चीरोदकन्याश्रितम् ।
यत्पादाम्बुजयुग्मकं विलसति, चेमंकरं शान्तिदं,
सोऽयं वृद्धिविधायको विजयतां, श्रीवर्द्धमानप्रभुः ॥ २ ॥

चेमं सन्तनुते निकृन्तति मतिचोभं च यद्दर्शनं,
संसाराऽम्बुनिधिं करोति सुतरं, सौभाग्यरत्नाकरः ।
सद्विद्यां वशवर्त्तिनीं जनयति, द्वेषप्रपञ्चाऽन्तकं,
भूयात्सर्वसुखप्रदस्त्रिजगतां, सिद्धार्थभूपाऽङ्गजः ॥ ३ ॥

यन्मूर्तीन्दुकलाः सुभव्यजलधीन्–कल्लोलितान्कुर्वते,
मिथ्यात्वोऽज्ञानितां तमस्ततिमरं, संप्रापयन्ति चयम् ।
सौजन्याऽभयभावनौषधिगणान्संवर्द्धयन्ते मुदा,
तं देवेन्द्रसमर्चिताऽङ्घ्रिकमलं, वीरप्रभुं नौम्यहम् ॥ ४ ॥

आपद्वारिधिमुत्तरन्ति भयदं, पादाऽरविन्दाश्रिता–
द्दीव्यान्भोगगणान्व्रजन्ति नितरां, संपूजनीयाः सताम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कन्याराशिगतस्य यस्य निहता-ऽनङ्गप्रचारोजिनः,
सोऽस्त्यन्तं वितनोतु मङ्गलकलां, श्रीत्रैशलेयः सदा ॥ ५ ॥

## प्रशस्तिः ॥

( वसन्ततिलकावृत्तम् )

योऽकालमृत्युभयहारी जिनेश्वराणां,
शुद्धाऽऽत्मशर्मविततिप्रथने पटीयान् ।
सर्वाऽऽपदां सततदारणतैकदक्षः,
सर्वेप्सितार्थसुरपादप आदिमश्च ॥ १ ॥

श्रीवीरशासनसुधाकरचन्द्रतुल्य—
श्रीहीरसूरिवरपट्टपरम्परातः
संप्राप्तपट्टकमनीयविभूषणाऽर्ह—
बुद्ध्यब्धिसूरिचरणाऽम्बुजषट्पदेन ॥ २ ॥

श्रीप्राप्तिपत्तनवरेऽजितसागरेण,
सूरीन्दुना स्तवनराशिरसौ प्रणीतः ।
संवत्सरेऽब्धिगजनागशशि(१९७४)प्रमाणे,
माघे तिथौ विजयतां शुभपूर्णिमायाम् ॥ ३ ॥
त्रिभिर्विशेषकम् ॥

हेमेन्द्रसागरमुनिप्रथिता प्रशस्ति—
रेषा जगद्गुरुकृपावशतोवरेण्या,
स्वाऽऽत्मप्रबोधजननैकगरीयसीह,
विख्यातिमेतु विपुलां विपुलाऽर्थसारा ॥ ४ ॥

इति श्रीचतुर्विंशतिजिनस्तुतिः संपूर्णा.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीचतुर्विंशतिजिनस्तुतिसंग्रहः ॥

( तोटकवृत्तम् )

त्रिशलासुततीर्थकरं सुगुरुं, शुभबुद्धिनिधिं कमलासनिकाम् ।
हृदयस्थमहं प्रविधाय जिन–स्तुतिसारमहं वितनोमि मुदा ।१।

## श्रीमदादिजिनस्तुतिः ॥ १ ॥

( शार्दूलविक्रीडितवृत्तम् )

संसाराऽर्णवतारक ! त्वतमहा–कर्माऽऽवलीवेदन !
सद्भक्त्या प्रणतांघ्रिपद्मयुगल ! श्रेयस्तर्तिं साधय ।
श्रीमन्नाभिनरेन्द्रनन्दन ! जना––नन्दप्रदानोत्तम !
भक्तानामभयप्रद ! श्रुतमतां, सत्रापदां वारक ! ॥१॥

सर्वे पान्तु जिनोत्तमा वररुचः, सद्धर्मविस्तारिणो–
ध्वस्ताऽज्ञानतमोभरा जनगणा––भिमानमायालवाः ।
यत्पादाऽम्बुजयोर्लुठन्ति सततं, स्वर्गौकसःसादराः,
सिद्धाऽऽनन्दपदप्रियाःकृतधियो–मन्दारमालाश्रिताः।२।

भव्या ! वस्तनुतां सुशान्तिमनिशं, पूज्यैर्वृतीन्द्रैः कृतं,
दुर्लक्ष्यं कुमतादिभिर्दलितदु–र्मोहारिवर्गोद्यमम् ।
अक्षोभ्यं कुमतैर्जनैः प्रवचनं, तत्त्वाऽर्थराशिश्रितं,
निक्षेपाऽऽगमसिद्धतत्त्वविमलाऽ–र्थोराशिमुद्योतकम् ।३।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पायाद्वःश्रुतदेवता श्रितवती, शुक्लाऽम्बुजं निर्मलं,
सम्यक्त्वविलासरक्तहृदया, विस्तारितानन्दका ।
यत्प्रेक्ष्याऽलसमानसास्थितवती, सद्भ्रामरीसन्ततिः,
सन्त्यज्याऽश्रमिताऽमरद्रुमसुमं, सौरभ्यसंराजितम् ॥४॥

## श्रीमदजितनाथजिनस्तुतिः ॥ २ ॥

( द्रुतविलम्बितवृत्तम् )

अजितनाथ ! तवाऽङ्घ्रिसरोजकं, हृदयसद्मनि चारु विचिन्तये ।
स्वजननोत्सव इन्द्रगणस्तुतं, कनकभूधरसानुविराजितम् १

जिनगणं विमदं स्तुत मानवाः ! शमितसंसृतिभूतमहापदम् ।
अमरनाथगणाः स्तुतिमन्वहं, त्रिदधतेऽस्य महोत्सवधारिणः २

प्रदिश मेऽन्तिमधामनिवासकं, त्रिभुवनाऽर्त्तिनिवारकनिर्मले ।
जिनमतश्रुत ! सर्वसुखाऽऽस्पदे, विततमोक्षयथेष्टसहायद ! ।३।

सितगरुत्मदधिष्ठितविग्रहा, विशददीप्तिपविं दधतीश्वरी ।
वितरतु क्षतरुग् भुवि मानसी, भवभयक्षयकारक ! शं सदा ।४।

## श्रीमदजितनाथजिनस्तुतिः (२)

( पुष्पिताग्रावृत्तम् )

जिनवरमजितं स्तुवे मुदाऽहं,
त्रिभुवनपालकमद्वितीयकीर्त्तिम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विदितनिखिलभावनिर्जिताऽर्चं,
क्षपितदुरन्तदुराधिकर्मजालम् ॥ १ ॥

स्तुत जिननिकरं तमाप्तमीशं,
सुरगणवन्दितपादपद्मयुग्मम् ।
विजितरतिपतिप्रकामवेगं,
विधुरितमोहमदाऽभिमानसेनम् ॥ २ ॥

स्मरत जिनवरोदितं प्रकामं,
प्रवचनमुत्तमतत्त्ववारिराशिम् ।
सकलजनहिताय शस्तमेतत्-
प्रथिततरं भुवनेषु शुद्धभावाः ! ॥ ३ ॥

हरतु विविधमानसीं प्रपीडां,
कनकविभासमदेहमानसीयम् ।
वरदपविकरा प्रभावयित्री,
शुचिवसनाच मरालवाहनस्था ॥ ४ ॥

## श्रीसंभवनाथजिनस्तुतिः ॥ ३ ॥

( वसन्ततिलकावृत्तम् )

निर्भिन्नशत्रुभवभीतिविशेषशान्त !
संसारसागरमहाप्लवसंभवेश ! ।
मह्यं प्रदेहि शशिसोदरशर्म सद्यो-
लोकातिगं प्रथितसर्वजनप्रभाव ! ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्हत्कदम्बक ! तवप्रणतंवरेण्य–
लक्ष्मीः सदा श्रयतु मानवमानमद्भिः ।
देवाऽधिपैः स्तुतपदाऽम्बुज ! कामहीन !
निर्मानमोहमदमृत्युजराप्रभाव ! ॥ २ ॥

अर्हद्गणेन रचितं शुभशासनं वः,
शर्माऽऽवलीं दिशतु सर्वनयाऽनुसारम् ।
बिभ्रत्परैरकलनीयमयानकेन,
त्रैलोक्यविश्रुतगुणेन विमानकेन ॥ ३ ॥

या शृङ्खलाऽऽभरणभूषितकान्तमूर्त्तिः,
सौवर्णवर्णविभवा नम तामनिन्द्याम् ।
श्रीवज्रशृंखलयुतां श्रुतदेवतां द्राक्,
पद्माश्रितामभदमानवपूजनीयाम् ॥ ४ ॥

---

## श्रीमदभिनन्दनजिनस्तुतिः ॥ ४ ॥

( द्रुतविलम्बितवृत्तम् )

त्वमभिनन्दन ! देवगणस्तुत !, विदलयाऽशुभभावगणं मम ।
स्मरगजेन्द्रविदारणकेसरि–न्परिहृतप्रमदागणनिर्भय ! ॥ १ ॥

जिनवरा ! गतमोहभयाः सदा, मम तमोहरणाय विभासकाः ।
जितमदा प्रयतध्वमिताऽऽमयाः, सकरुणाऽऽचरणस्थितिभासुराः

जिनवरागम ! नो भवमायतं, प्रथितजन्मजराचयदुर्दशम् ।
प्रलघुतां नय निर्मथिताऽऽमय ! प्रवरसारसनाथ ! नयाऽऽलय ।२।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुधनुषाऽञ्चितहस्तलतामरं, विशिखशंखयुजा नम देवताम् ।
विशदवर्णकलामिह रोहिणीं, सुरभियाततनुं विपुलर्द्धिकाम् ।४।

## श्रीसुमतिनाथजिनस्तुतिः ॥ ५ ॥

( वसन्ततिलकावृत्तम् )

त्रायस्व संसृतिदरात्सुमते ! जिनेश !,
त्वत्पादपद्मनिरतां जनतां जितारे !
सिद्धान्तनायक ! गताऽऽलय ! हेमकान्ते !,
भीताऽभयप्रद ! सुकान्तविशालमूर्त्ते ! ॥१॥

राकेशकान्ततनवस्तनुत प्रशान्तिं,
तीर्थाधिपा ! विमदना ! मदमानहीनाः ! ।
सन्मार्गयातजनताहितमादधानाः,
सद्मानिनोगतभयाऽभयदानदक्षाः ॥ २ ॥

भव्याः ! स्मरन्तु जिनराजिमुखाऽम्बुजन्म-
जातं मतं मतिमतां हितजातदायि,
विस्तीर्णतत्त्वजलधिं परमार्थबोधं,
संरोधकं परमताऽर्थनिरूपकाणाम् ॥ ३ ॥

काली सुकान्तवदना रदनप्रभाभि-
र्नीलाऽम्बुवाहघनदेहविभाविताना ।
दूनाभयप्रदगदां दधती विशालां,
कान्त्या विभूषितधरा भुवि रक्षतान्माम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीपद्मप्रभजिनस्तुतिः ॥ ६ ॥

( वसन्ततिलकावृत्तम् )

पद्मप्रभोश्चरणपद्मयुगं प्रमोदं,
दीर्घं ददातु सततं महतामुपास्यम् ।
दत्तप्रमोदविभवं जगति प्रकाम-
मुन्मुद्रिताऽमरसभं विगताऽऽमयस्य ॥ १ ॥

सा मे मतिं वितरतु क्षितकर्मभूमि-
रर्हत्ततिः सुविदिता प्रथमामगाद्याम् ।
स्वर्गौकसां ततिरजस्रविभासमाना,
देदीप्यमानमणिरत्नविभावितानैः ॥ २ ॥

लोकाः श्रयन्तु जिनकीर्त्तितमागमार्थं,
श्रान्तिच्छिदं यमिजनाश्रयणीयमीड्यम् ।
संसारसागरमहाप्लवमाश्रितानां,
धामाऽग्रिमं विहतपापदरं नयानाम् ॥ ३ ॥

गान्धारि ! वज्रमुसले जयतस्त्वदीये,
नीलाऽम्बुजावलिनिभेऽशुवितानधाम्नी ।
ये कीर्त्तिपुञ्जमनवद्यसुखं लभेते,
स्वर्गावनीभुजगलोकविभासमानम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीसुपार्श्वनाथजिनस्तुतिः ॥ ७ ॥

( वसन्ततिलकावृत्तम् )

ये जन्तुजातमकरोत्प्रणतिप्रधानं,
निर्वारिताऽतनुमनोजमदाऽरिबाधः ।
तं मानव ! स्मर विचिन्त्य निजे सुपार्श्वं,
चेतोऽम्बुजे परहितोद्यतमानभावम् ॥ १ ॥

जैनेश्वरीततिरखण्डितबोधकामा,
चित्ताऽरविन्दमनिशं व्रजतु प्रसन्नम् ।
या नव्यवारिजगणे पदमादधाना,
चक्रे विहारमनघाऽमदमानवानाम् ॥ २ ॥

संपादयच्छिवसुखं ननु संयतानां,
जैनं मतं भवभयाऽर्त्तिहरं मुदाऽरम् ।
श्रेयोऽर्थिनो नमत नम्रधिया प्रशस्तं,
स्वर्गाऽपवर्गवसतिं चणतो ददानम् ॥ ३ ॥

संरक्ष शर्मजननी भुवि मानसीष्टान्,
पद्माऽऽननोपरिगताऽमरमाननीया ।
खड्गं रविप्रभमहोज्ज्वलमादधाना,
माणिक्यमुत्तमान्रिभञ्च कराऽब्जमध्ये ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीचन्द्रप्रभजिनस्तुतिः ॥ ८ ॥

( वसंततिलकावृत्तम् )

चन्द्रप्रभं नमत शारदचन्द्रकान्तं,
कान्ताऽनलं भवतमस्तृणपुञ्जदाहे ।
विद्वत्कदम्बकनतांऽघ्रिसरोजमीशं,
भो मानवा ! विगतमानमनोजगर्वम् ॥ १ ॥

जीयात्कदम्बकमरोगमदं जिनानां-
सत्याकरं जयदजस्रविभाप्रकारम् ।
यद्धर्मचक्रमवहद्भुवि भव्यहेतो-
र्लब्धावतारमनिशं प्रबलप्रतापम् ॥ २ ॥

सिद्धान्तराशिरमलो हतयेऽहिताना-
मख्यापयज्जिनगणो यमनिन्दिताऽऽत्मा ।
युष्माकमस्तु कमनीयविचारचारु-
र्देवेन्द्रवृन्दनुतपीतवचःसुधाकः ॥ ३ ॥

वज्राऽङ्कुशि ! प्रतपनीयविभे ? प्रयत्नं,
त्राणे जगज्जनिमतां विशदं विधेहि ।
अध्याश्रिता शशधरोज्ज्वलभासि मत्ते,
सौवर्णकान्तिरुचिरावयवा द्विपेन्द्रे ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीसुविधिनाथजिनस्तुतिः ॥ ९ ॥

( वसंततिलकावृत्तम् )

संपत्तिमाशु भवतां सुविधिर्विधेया-
 द्योगीन्द्रसन्नतपदाऽम्बुजयुग्म इष्टाम् ।
नाकिव्रजाऽसुरनराऽधिपसेव्यमानः,
 स्वर्गाऽपवर्गसुखसिद्धिरुचिप्रधानाः ! ॥ १ ॥

याऽशेषमानवगणाय हितानि राजी
 सारक्रियाऽवददलं सदया जिनानाम् ।
मोदं ददातु विपुलं मम निर्ममत्वा,
 पादारविन्दविलुठत्पुरुहूतराजिः ॥ २ ॥

दिश्याज्जिनेन्द्र ! तव कण्ठविनिर्गता मे,
 लोकोत्तरं शिवसुखं भुवि भारतीन !
भङ्गैर्नयैश्च रुचिरार्थपराऽतिशस्ताऽ-
 ज्ञानाऽन्धकारमखिलं प्रथितं त्रयन्ती ॥ ३ ॥

दिश्यात्त्वाऽऽशु शिवदा ज्वलनायुधा शं,
 स्वल्पोदरी गतदराऽभयदा सिताऽऽभा ।
शस्ताऽऽस्यकान्तिनिचयेन तिरस्कृतेन्दु-
 र्मध्यं समाश्रितवतीष्टवरालकस्य ॥ ४ ॥

---

३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीशीतलनाथजिनस्तुतिः ॥ १० ॥

( वसन्ततिलकावृत्तम् )

दीव्यं सुखं दिशतु शीतलतीर्थनाथः,
शुद्धस्वरूपरमणः शिवसिद्धिधाम ।
यत्पादपद्मभजनेन दिवौकसोऽपि,
भेजुर्निरामयसुखानि महोज्ज्वलानि ॥ १ ॥

भव्या जनाः ! स्मरत वृन्दमरं जिनानां,
निर्भिन्नजन्ममृतिमोहजरारतीशम् ।
पादाऽरविन्दविनतोरुजनाऽनवद्यं,
निर्वृत्तिशर्महितदं शमितप्रकोपम् ॥ २ ॥

कल्पद्रुमोपममसारमताऽवभेदि,
वाचां वितानमकलङ्कितमर्हदुक्तम् ।
श्रेयस्ततिं दिशतु दीव्यमहाप्रभावां,
लोकत्रयप्रथिततत्त्वगुणप्रभावम् ॥ ३ ॥

देव्यच्युताऽमरसमान्वितमानवीह,
सान्द्राऽङ्गकान्तिनिचया जनिताऽतिमोदा ।
त्रैलोक्यरक्षणपरा जयताज्जगत्यां,
श्रेष्टायुधं करतले दधती प्रसन्ना ॥ ४ ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीश्रेयांसनाथजिनस्तुतिः ॥ ११ ॥

( वसन्ततिलकावृत्तम् )

यन्मानसं युवतयः कृतहावभावा-
नो जहुरुच्चतरगीतिकलाऽतिदक्षाः ।
श्रेयांसमानमत तं सुमनोर्चिताङ्घ्रिं,
भिन्नाऽम्बुजाऽऽयुधविकल्पममेयबोधम् ॥ १ ॥

दीर्णश्रमा जिनततिर्नतिमादधद्भि-
र्देवाऽसुरेन्द्रनरनाथगणैः स्तुताऽलम् ।
दिश्यान्निरामयसुखानि पवित्रिताशा,
संपन्नसर्वविभवा विगतामया वः ॥ २ ॥

अर्हन्मतं मतिमतां रुचिरप्रभावं,
कल्याणमादिशतु निर्गतदोषलेशम् ।
नैकार्थसन्नयविराजिततत्त्वराशिं,
वृत्रारिवारपरिपीतवचोऽमृतं द्राग् ॥ ३ ॥

वज्रं फलाऽक्षपटले च सुनादघण्टां,
बिभ्रत्यजस्रमुदिता करवारिजातैः ।
अध्यासिता वररुचिर्गतशोकवारां,
मर्त्याधिपं जनमता जयतात्सुकाली ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीवासुपूज्यजिनस्तुतिः ॥ २१ ॥

( मन्दाक्रान्तावृत्तम् )

संपूज्यश्री–रवृजिनजिनाधीशितो–वासुपूज्य !
नूत्नालानो–पमकर विभातोष्णभानूरुकान्ते ! ।
निर्मान त्वं, जगति जनतां, पालयस्वाऽतिनम्रां,
कामक्लेशाद्वन दधतीं भूरिदुःखं वरेण्य ! ॥ १ ॥

संपूतं य–च्चरणरजसां, मण्डलं देवराजे–
श्चौर्णीं शोभां, शिरसि दधति–स्माऽतिशस्तप्रभावम् ।
कीर्त्तेः कान्त्या, ततिरतिवरा, निर्जयन्ती जिनानां,
कर्मग्रन्थिं, प्रविकिरतु सा, युष्मदीयं गताऽघा ॥ २ ॥

हृद्या वाणी, तव जिनपते !, नो हितानि प्रदेया–
न्नित्यं हेतु–ग्रथितहृदया, युक्तियुक्ताऽपदोषा ।
निष्पापा या, समदमनुजै–र्गीतकीर्तिप्रकाण्ड–
सद्योगाना–मतिशययुजां, भाजनं संपदाढ्य ! ॥ ३ ॥

श्रीशान्तिस्त्वा–मवतु विदुषी, श्वेतपद्माऽधिरूढा,
रक्षःक्षुद्र–ग्रहभवभया–च्छेदिनी श्वेतरोचिः ।
सन्नालीका निजपरिकरो–ल्लासिनी. चारुवेश्या,
शिष्टैर्मान्या, जगदभिहितं, सर्वदा धारयन्ती ॥ ४ ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीविमलनाथजिनस्तुतिः ॥ १३ ॥

( मन्दाक्रान्तावृत्तम् )

निर्देष्टारं, विमलविमलं, तत्त्वराशिं जिनेशं,
वीतक्षोभं, कृतशमदयं, मानवानां हितानि ।
कुर्वन्तं तं, वयमभिमता–आनमामः सुभक्त्या,
देवालिर्यं, नमनहृदया दूरतोनैव याति ॥ १ ॥

जैनी राजिः, परमसुखदा, दीर्णकामारिभीतिः,
सत्त्वापन्ना, कुमतदलने, कर्मतापप्रहीणा ।
श्रेयःश्रेणिं, दिशतु भवतां, जन्ममृत्युश्रयाणां,
स्वर्गस्थानां, प्रवरसभया, गीतसत्कीर्त्तिराशिः ॥२॥

भिन्नभ्रान्तिः, कलिमलहति, क्षोभयित्रीप्रकामं,
निर्दोषा या, जिनवरमुखाऽ–म्भोधिजाता पवित्री ।
वाचामालि–र्गमनयहिता, नाकिलोकाऽतिपीता,
संसारं सा, सुतरमनिशं, भक्तिभाजां करोतु ॥ ३ ॥

सौम्याऽऽशात्रा, तनुभवकरी, रोहिणी भासुराभा,
याता यानं, परमवनता, सौरभं वीतभीतिः ।
वेगाऽऽक्रान्तं, मनुजसभयाऽ–चापलाऽपापयाऽलं,
निःसीमानं, प्रमदमवनौ, सादरं संतनोतु ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीमदनन्तनाथजिनस्तुतिः ॥ १४ ॥

( मन्दाक्रान्तावृत्तम् )

निर्माणारे ! नतसुरसभा–राजिपादारविन्द !,
क्षीणानङ्ग ! प्रमितविभया, भ्राजमानाऽऽननश्रीः ।
धर्म्ये चक्रे, जनहितकृते, स्थायुकाऽनन्तनाथ !
मोक्षाऽध्वानं, कुरु सुखगमं, देशनाऽशीतभासा ॥१॥

मायातीत ! क्षणदसदन ! श्रेयसां निर्मलानां,
पादद्वन्द्वं, जिनवरकद–म्ब त्वदीयं मुदाऽरम् ।
दीव्याकारं, मम हृदि ततं, श्यामलत्वं निहन्तु,
देवेन्द्राणा–मभयसभया, स्तोत्रसारेण गीतम् ॥ २ ॥

सिद्ध्यारामं, मतमभिमतं, जैनराजं जनानां,
जेगीयन्तेऽ–मरगणसभा–सेवनीयं विपारम् ।
तद्युष्माकं, भवभयहर्तिं, दुर्निवारां विदध्या–
च्चित्तप्रीति–प्रदमनुदिनं, क्षोभिताऽन्याऽनुयोगम् ॥३॥

उत्तुङ्गार्वाऽऽ–श्रिततनुलता, काञ्चनाभाऽच्युता मे,
रक्षादक्षा, धृतधनुरसि–श्चर्मबाणौ दधाना ।
हस्तैः शस्तै–स्त्वरितगतये, शर्म दिश्यादमेयं,
संसाराब्धौ, श्रमितवपुषां, तारणैकोच्चसख्या ॥ ४ ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीधर्मनाथजिनस्तुतिः ॥ १५ ॥

( मन्दाक्रान्तावृत्तम् )

शान्तक्लेशः, शरणमचलं, मानवानां समानां,
श्रीमद्धर्मो–जिनवरगणः, पूजितो नाकिनाथैः ।
निष्कर्मारि–स्तवककरगतां, मोक्षलक्ष्मीं विदध्या–
दुच्चैःकान्त्याऽखिलजनगताऽ–ज्ञानराशिप्रभेत्ता ॥१॥

दीर्घध्वान्तं, सुमतिसदनं, जैनराजं कदम्बं,
दीप्त्या राज–च्चरणपदवीं, सारतारां वितन्वत् ।
भोगात्नागा–निवपरिहर–द्दूरतःशान्ततान्ति,
क्षान्त्यै भूया–त्सततसुखद–क्षेमलक्ष्मीप्रियाणाम् ॥२॥

पीयूषाशाऽ–सुरनरवरैः, प्रस्तुतं स्वाऽऽलयस्थै–
रक्षोभं य–त्परमतपरै–रप्रमेयाऽर्थभासि ।
अर्हद्वृन्दै–र्मतमभिहितं, निर्मदाऽनङ्गमानं,
श्रेयोदिश्या–द्भुवनविदितं, मानवानां नतानाम् ॥ ३ ॥

प्रज्ञप्तिर्नो–नवकजवरा–भा विशालाऽक्षिपद्मा,
मायूरं याऽ–वनविमलधी–र्यानमारोहदिष्टम् ।
सा विघ्नानां, हतिमतिबला–ऽयाचिता भक्तिभाजां,
कुर्यात्कान्तो–त्तमगतिरथं, शक्तिराजच्छयाऽब्जा ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीशान्तिनाथजिनस्तुतिः ॥ १६ ॥

( स्रग्धरावृत्तम् )

राजन्त्योत्तप्तहेमो–ज्ज्वलवरविभयाऽ–कोपमानप्रचार !
श्रीशान्तीशान तन्वा, जितकनकगिरे ! शान्तमुद्रां वहन्त्या ।
धीरोदारप्रभाव ! क्रमवनजनतैः, सेव्यया निर्जरेशैः
रक्ष त्वत्पादरक्तं, वृतसुमतिवधू–र्मां जिनेन्द्र ! प्रपन्नम् ॥ १ ॥

ते जीयासुर्जिनेशाः, सकलभुवनगां, संपदं धारयन्तः,
कीर्त्या वीतारिभावा–मदलवमपि ये, नैव चक्रुर्विशोकाः ।
कुन्दप्रख्यत्विषाऽलं–कृतवरवपुषः, प्राप्तलोकैकराज्या–
उच्छिन्नाऽनङ्गभावा–नतविरतजना–नन्ददायिस्वभावाः॥२॥

जैनेन्द्रं जैनसङ्घ–क्षतिहननपरं, बोभवीतु क्षताऽघं,
सम्यक्त्वाऽऽवासितानां–मपहृतमदनं, दुष्टतापाऽपहारि ।
दुर्भेद्यान्तस्तमिस्रा–विघटनशशभृ–त्सोदरं रातवृत्त–
माराध्योच्चैर्गुणाली–भृदमरसभया–संस्तुतं स्वमतं द्राग् ॥३॥

दिश्यात्स ब्रह्मशान्तिः, सुखमतुलतरं, छत्रदण्डोदपात्रं,
सच्छोभाढ्यं दधानो–नवकुसमकरैः, स्वच्छभामण्डलाढ्यः ।
बिभ्रन्मुक्ताऽक्षमालां, मुनिजनहितद–स्तप्तचामीकराभो–
यो वक्राणां ग्रहाणां, प्रशमनमतनो–त्सासुरारीतिकानाम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीकुन्थुनाथजिनस्तुतिः ॥ १७ ॥

( मालिनीवृत्तम् )

शमितमरणजार्तिं कुन्थुनाथं मदान्तं,
जिनपतिमनिमेषै-र्लोचनैः पीयमानम् ।
अमरपतिततीनां, दीर्णतापं नमामि,
निजपरिकरभाजां, भाजनं मोक्षलक्ष्म्याः ॥ १ ॥

सकलजिनपतिभ्य-स्त्रायकेभ्यस्त्रिलोक्या-
वरवदनरवेभ्यः, सारवादेरतेभ्यः ।
कनकसुमगतिभ्यो-नाकिनाथस्तुतेभ्य-
स्तनुवचनमनोजं मामकीनं नमोऽस्तु ॥ २ ॥

प्रवचनममितं वो-जैनराजं विकास-
नयगमपदभङ्गैः, पावनं शर्म दद्यात् ।
दमितकुसुमचापं, चारुनीतिप्रतीत-
मभिलषितसुरद्रुं, दीव्यमाराधनीयम् ॥ ३ ॥

सदसि फलकरास्ते, सैरिभीं प्रौढगात्रीं,
गतव्रति ! तडिदाभे !, दत्तदीनप्रमोदे ! ।
झटिति पुरुषदत्ते ! सन्तु मे सत्प्रसादा-
विकसदसिफलाभ्यां भ्राजमानाऽग्रहस्ते ! ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीमदरजिनस्तुतिः ॥ १८ ॥

( मालिनीवृत्तम् )

नमत जिनवरं तं, भव्यलोका ! मुदाऽरं,
प्रमदसुरनरेशो–द्गीयमानप्रभावम् ।
व्यमुचदखिललक्ष्मीं, चक्रिणोलोष्टवद्यो–
द्रुतकनकनिभं स–न्नारिजातं प्रधानम् ॥ १ ॥

यममरपतिराजि–स्तुष्टुवे धीररावा,
समवसरणभूमौ, राजिता स्तोत्रगीतैः ।
तमनघजिनवर्गं, निर्मदा मोदमानाः,
स्मरत रुचिरभावा ! भासयन्तं समन्तात् ॥ २ ॥

जिनपतिमतमाद्यं, भीमसंसारवार्द्धि–
क्षुभितजनभयौघो–च्छेदि भिन्नप्रमोहम् ।
कुरुत हृदयसाध्यं, सर्वसौख्यैकहेतु–
मपगतपरभीति क्षिप्रमुद्योतवन्तः ! ॥ ३ ॥

जगति विविधवर्णां, वैनतेयं प्ररूढा,
हुतवहनसमाऽऽभा, चारुचक्रैर्विभाति ।
निरुपमदवतुल्यै–र्हारिचक्रेश्वरी या,
सुखमतनु विदध्या–त्पुण्यधीर्धामधारी ॥ ४ ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीमल्लिनाथजिनस्तुतिः ॥ १६ ॥

( उपजातिवृत्तम् )

तनोतु शान्तिं भुवि मल्लिनाथः, प्रियङ्गुरोचिस्तनुमुज्जिहानः ।
अवद्यशोभामचिरांशुदीप्तं, विडम्बयन्नंबरमंशुमाली ॥ १ ॥

स्तुवीत भव्या ! जगदाशुरक्षतो-जिनेश्वरानर्चितपादपङ्कजान् ।
वपुर्व्यथापीडितदीनमानवं, स्रजं दधानान्नवपुष्पनिर्मिताम् ॥२॥

जिनेन्द्रसंभाषित आगमार्थो-गमोक्तियुक्तिप्रथितप्रमाणः ।
शमाऽऽवहन्संपदमादधातु, क्षताऽनुक्रोधतमोमनोभूः ॥३॥

बटाऽभिधानेऽकृतसंस्थितिर्मे, यक्षाऽधिपः क्रीडतु मानसे नगे ।
कपर्दिनामाद्विपमाश्रयन्भा-श्यामीकृताशश्चकितेन्द्रकुञ्जरम् ॥४॥

---

## श्रीमुनिसुव्रतजिनस्तुतिः ॥ २० ॥

( उपजातिवृत्तम् )

भवाज्जिनेशोमुनिसुव्रतोवोऽ-वतात्सुरौघाऽवनतोनिकामम् ।
निरस्तचेतोभवमानबाध-श्चलत्प्रभामण्डलदीपिताऽऽशः ॥१॥

नमामि तं जैनगणं विमाय-मपारसौरभ्यसुमाननायम् ।
ननामदेवेन्द्रवराङ्गनाऽलं, प्रभावधामाऽसमसाररोचिः ॥२॥

सिद्धान्त ! जैनोत्तम ! रक्ष भव्या-न्नतानजस्रं दयितोमुनीनाम् ।
नयप्रमाणाऽऽततशर्महेतो-निरस्तपापाऽपरभीतियोगः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घिणोतु विघ्नानि सुवर्णवर्णा, तवाधिरूढोचितगोधिकाऽऽशाः।
विभासयन्ती निजभाचयेन, गौरी वरीयोवदनाऽरविन्दा ॥४॥

## श्रीनमिनाथजिनस्तुतिः ॥ २१ ॥

( शिखरिणीवृत्तम् )

नमिः पापत्राता, विदलयतु मे कर्मविततिं,
विमायासंचारो-विधुतमदमानोऽतिरभसा ।
प्रणेता हृद्याभो-नमदमरभव्याभयकृतां,
प्रगल्भाऽनङ्गच्छि-द्भवभयहरोहृद्यवचसाम् ॥ १ ॥

जिनाऽधीशव्रातः, शमितभवदावाऽनलभयः,
नमन्नाकीशानां, वरमुकुटरत्नाऽरुणपदः ।
नताऽनन्तान्त्रातु, चपितमदमोहाऽतितिमिरः,
पराभूतानङ्गः, प्रवरवरदानैकविदुरः ॥ २ ॥

श्रुतं स्फीतं गीतं, जिनपतिकदम्बेन निखिलं,
भवाऽऽतङ्कच्छेदि, प्रमितनयभङ्गेन निचितम् ।
जनानन्दं दिश्या-द्भवभयहरं धर्मसदनं,
सुधर्मायां कामं, स्तुतममरलोकैः सुखमयम् ॥ ३ ॥

विपक्षश्रेणिं वो-विघटयतु काली धृतगदा,
समारूढाऽम्लान-प्रवरकमलं निर्भयकरी ।
वराक्षाणां मालां, विशदवदनाऽऽनन्दवसति-
र्दधाना निर्माया जलधितनयातुल्यविभवा ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीनेमिनाथजिनस्तुतिः ॥ २२ ॥

( उपजातिवृत्तम् )

बभञ्ज यो लक्षामितं नृपाणां, कदम्बकं निर्जितराजकं तम् ।
राजीमतीतापदनेमिनाथं, नमामि दीप्तं यदुपालितारम् ॥१॥
या प्रौढराज्यं प्रविहाय राजी, प्रव्रज्यया रक्ततमा बभूव ।
रजोवदक्षीणमहाप्रभावा, सा सेव्यतां पुण्यजनैर्जिनानाम् ।२।
वाक्तावकीना जिनपुङ्गव ! स्तात्, शस्ताऽतिसूक्ष्मार्थपदार्थदर्शिनी
निर्भिन्नमोहारितमोवितान ! हिताय मेऽक्षोभ्यतमाऽन्यवादिनाम्-
यत्पादसेवामकरोज्जनौघः, सिंहाधिरूढाऽऽम्रसुलुम्बिहस्ता-
साऽम्बा विभूतिं वितनोतु शुद्ध-सुवर्णवर्णा रिपुभीतिभेत्री ॥४॥

## श्रीपार्श्वजिनस्तुतिः ॥ २३ ॥

( शार्दूलविक्रीडितवृत्तम् )

मालामायतबाहुरालिरतिभु-त्पार्श्वप्रभुर्भ्रामरी,
दध्रे यामपिबत्प्रभाभरचितो-मां रक्षतात्पातकाद् ।
शुद्धातिप्रवरद्विजालिरतनु-क्षेमध्वानिर्यत्क्रमौ,
दैवाऽब्जेषु निषादिनौ रुचिरभोऽ-भूतां स भूतिप्रदः॥१॥
अव्यात्सा परमारमाऽतिरुचिरा, राजीवनेत्राऽभया,
राजी जीवभयापहा मतिमतां,सेव्या जिनानां सदा ।
या हृद्याऽमलकीर्त्तिबोधजनका, साराऽधिकामादरं,
सर्वान् भूतगणानजेयविभवा, निर्मानजन्मक्षतिः ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जैनी वागतिविस्तृताऽमलगमाऽ-सद्योगसंहारिणी-
नूता देवकदम्बकेन समुदा, शास्त्री नराणां सदा ।
देयान्नूतनमर्थमाश्रितवती, निष्पक्षपातामुद-
मादेया मलरोधिका जनमनो-हृद्यो यशोवर्द्धिनी ॥ ३ ॥

या याताऽजगरेन्द्रमायतिहिता, निस्त्रिंशहस्ताऽभया,
सुध्वानाऽमरयोषिदर्चितपदा, कान्ताऽलकाऽन्ताऽमदा ।
साऽहीनाम्यवधूस्तवाऽस्तुसुखदा, त्रैलोक्यरक्षाकरी-
निर्भिन्नारमरं सरोजवलय-श्यामाङ्गभामण्डला ॥ ४ ॥

---

## श्रीमद्वीरजिनस्तुतिः ॥ २४ ॥

( शार्दूलविक्रीडितवृत्तम् )

निर्मानानमदिन्द्रमस्तकपत-त्सामोदनिर्निद्रक-
मन्दारालिरजोऽरुणाङ्घ्रिकमल-क्षोणीकृतारक्षण !।
वीर ! क्षेमविधानदक्ष ! सुतरां, निर्वाणशर्माणि मे
देहि त्वं जितसङ्गमोहगतरुग् ! सिद्धार्थभूपाङ्गज ! ॥१॥

यस्या भूमितले रराज विपुलं, धर्मोचितं स्थानकं,
दीव्यानन्दसुचक्रकेतुकुसुमं, सालत्रयीराजितम् ।
सा दीप्ता जिनसंहतिः सुखततिं, भक्तिप्रियाणामिह,
दिश्यादक्षयरोचिषाऽमरजनाऽधीशाऽर्चिता कामदा ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनन्दोल्लसिताऽमरेन्द्रनिकरैः, संस्तूयमाना मुदा,
भङ्गैर्भूरिभिरातता परमता-नर्थद्रुमाऽनेकपः ।
अचर्य्यं सुखमातनोतु विशदा, ते भारती तीर्थकृत् !
व्यापन्मानमनोभवस्यमनुज-क्षोभान्तकृद्भास्वरी ॥ ३ ॥

मत्तेभव्रयदीधिते क्षतिहृते, कण्ठीरवे राजिनी-
भाराजीप्रविराजिते परमवो-त्कृष्टेऽचिराभारुचौ ।
भव्यानम्ब ! विनीतनाकिवनिता-संसेव्यमानक्रमे !
सम्यग्भावनिवारितारिपटलक्षोभाऽम्बिके ! त्वं सदा ॥४॥

॥ इति श्रीचतुर्विंशतिजिनस्तुतिरगमत्संपूर्णताम् ॥

---

## ॥ प्रशस्तिः ॥

श्रीशोभनस्तुतिमलं सुविचार्य बुद्ध्या,
सारं तदीयमखिलं विविधैर्गृहीत्वा ।
वृत्तैर्मया विरचिता स्तुतिरार्हतीयं,
भव्यात्मनां सुखकृते रुचिरा सदाऽस्तु ॥ १ ॥

मयाहील्लपुरे कृत्वा, स्थितिं धर्मविधायिनीम् ।
भूरि संघाग्रहेणैव, जिनमन्दिरमण्डिते ॥ २ ॥

अब्धिद्वीपनिधिक्षमापरिमिते संवत्सरे वैक्रमे,
ज्येष्ठे मासि सिते द्वितीयदिवसे चक्रे स्तुतीनां ग्रहः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूरीन्द्राऽजितसागरेण विदुषा लोकोपकारक्षमः,
यावत्सूर्यनिशाकरं विजयतां ग्रन्थोऽयमुर्व्यां शुभः ॥३॥

## श्रीसुखसागरसद्गुरुस्तुतिः ॥

( पञ्चचामरछन्दः )

प्रचण्डचण्डमुण्डमोहमारमारिहारिणं,
विशुद्धशुद्धिसाधनप्रसाधनप्रसाधकम् ।
प्रसन्नसन्नताङ्गिसङ्गिनं सदाननाऽम्बुजं,
भजन्तु जन्तुजातयः सुखोदधिं सुखाऽऽप्तये ॥ १ ॥

सुशान्तसन्ततिः सतां निवृत्तवृत्तिसेविनी,
यदीयपादपङ्कजोन्नतिं प्रणम्य निर्मला ।
सुधासुधाविधायकं निपीय यद्वचोऽमृतं,
बभूव तं सुखोदधिं गुरुं भजस्व भावतः ॥ २ ॥

अमेयमानशालिनो मनस्विमुख्यगामिनो,
भवोदधिप्लवोपमक्रियामनकपाविनीम् ।
निरीक्ष्य यत्कृपानिधेः सकाशतोऽन्वहं स्वयं,
शुभक्रियारता बभूवुराश्रयन्तु तं गुरुम् ॥ ३ ॥

अनन्तशान्तबोधवारिराशिमुन्नताशयं,
निजोरुदीव्य भावनाप्रभावना शिताऽशिवम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रमोदभूलतावितानवारिवाहकोत्तमं,
भजध्वमेव मोदतः सुखोदधिं गुरुं सदा ॥ ४ ॥
समस्तदेशकष्टलेशता गताऽऽशु शोषतां,
निरन्तसेव्यसिद्धिरायतिक्षमा जनेऽजनि ।
यदीयदीव्यमूर्त्तिरत्नजातयोगतो जनाः,
श्रयध्वमेकभावतः सुखाम्बुधिं गुरुं सदा ॥ ५ ॥
यदल्पकल्पना कृताऽपि भूरिसिद्धिसाधिका,
करालकालभूतभीतिहारिणी जगत्त्रये ।
भविष्यदाधिवारिणी प्रतारिणी मनोभुव-
स्तमीड्यमानमन्तु शर्म्मसागरं गुरुं मुदा ॥ ६ ॥
विशालशिष्टदृष्टिसारिणी यदुद्भवाऽभया,
क्षितिप्रकाण्डमादधाति भक्तिपुष्पसत्फलम् ।
विवेकवारिदानतोभवन्ति सर्वसंपदः,
स सद्गुरुः सुखाब्धिरत्र जायतां विभूतये ॥ ७ ॥
यदन्तिकं सुशान्तिदं गता वरादरा नरा
बभूवुरुच्चभावधारिणो महादयायुताः ।
भवाऽनलार्चिषाऽतिप्रज्ञन्तुशीतलाऽम्बुदं,
नमन्तु तं सुखोदधिं गुरुं सुमङ्गलप्रदम् ॥ ८ ॥
गुरुप्रभावकस्तुतिः कृताऽजिताब्धिना वरा,
सुवाचकोत्तमेन सिन्धुसान्निभक्तिभूमि ते (१९७४)
शरद्यसौ शुचौ सितेदलेऽष्टमीदिने शुभे,
चिरं सुखप्रदाऽस्तु शुद्धधर्मतत्त्वधारिणाम् ॥ ९ ॥

---

४

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीकेसरीयातीर्थस्तोत्रम् ॥ १ ॥

( पञ्चचामरच्छन्दः )

प्रकृष्टकृष्टलोकवृन्दसंनतक्रमाम्बुज !,
प्रशान्तशान्तदेहिकामदाहवारिदानन ! ।
प्रभातभातभानुभासमानपिङ्गलप्रभ !,
नमोऽस्तु ते सदाऽऽदिनाथ केसरप्रियप्रभो ! ॥ १ ॥

विदेशदेशवासिनोजना अनेकधा रता,-
निवृत्तिवृत्तिशालिनोऽदराः समेत्य पुञ्जतः ।
सुकुङ्कुमस्य पूजयन्त्यहो वपुस्त्वदीयकं,
नमोऽस्तु ते सदाऽऽदिनाथ केसरप्रियप्रभो ! ॥ २ ॥

प्रकृष्टनीलनीलरत्नसुन्दरद्युतिव्रज-
स्त्वदीयदेहजः सुजातपुण्यपुञ्जशालिनाम् ।
विराजते विशिष्टपापहारकः सदोज्ज्वलो,
नमोऽस्तु ते सदाऽऽदिनाथ केसरप्रियप्रभो ! ॥ ३ ॥

समृद्धिसिद्धिदानदक्षयक्षलक्षसेवित !
प्रचण्डलोकसंस्थितारिवृन्दकष्टनाशन ! ।
मुधा धराधिपाऽधरीकृताऽखिलाङ्गिधारिणे,
नमोऽस्तु ते सदाऽऽदिनाथ केसरप्रियप्रभो ! ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विचित्रचित्रमण्डपत्रयाङ्किते सुमन्दिरे,
विराजमानराजराजचर्चितक्रमांबुज ! ।
सरागरागहारिणे विहारिवृन्दतायिने,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रिय ! प्रभो ! ॥ ५ ॥

चमत्कृतिः सदा त्वदीयपादपङ्कजश्रिता,
प्रणामकारिमोदधारिणां सुलोचनांबुजे ।
विशिष्टशिष्टनैकधास्वरूपदीप्तिदायिने,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रिय ! प्रभो ! ॥ ६ ॥

विशालशालशालमानधामधारिणे महा–
धराधरप्रधानदुर्गमार्गभीतिहारिणे ।
सदा नदत्यहो यदीयतूर्यवृन्दमद्भुतं,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो !॥ ७ ॥

अमन्दमन्दभावनासुमेदपाटपाविने,
कलौ मलौघहारिणेऽघहारिणे सुदेहिनाम् ।
विभिन्नभिन्नचेतसामखण्डिताग्रदीप्तये,
नमोऽस्तु ते सदाऽऽदिनाथ ! केसरप्रियप्रभो ! ॥ ८ ॥

स्वभावभाविताऽऽत्मना सुपुण्यशालिनाऽङ्गिना,
प्रभातकाल उत्तमं हि केसरप्रियाऽष्टकम् ।
सुखप्रदं सुभण्यते सदैकभावतोहृदि,
तदा क्रमेण दीव्यसंपदं श्रयत्स मानवः ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिसप्तसेबधिचमामिते (१९७२) सुवत्सरेऽष्टकं-
विरच्यतेस सागराऽजितेन वाचकेन श-,
मिदं सुमद्रमार्गमासि पूर्णिमादिने गुरौ ।
दधातु सर्वदेहिनाम् जिनेन्द्रमार्गयायिनाम् ॥ १० ॥

—•—

## श्रीशंखेश्वरपार्श्वनाथजिनस्तोत्रम् ॥ २ ॥

( शार्दूलविक्रीडितवृत्तम् )

त्रैलोक्याऽऽधिपरम्परोपशमनक्षेमप्रधानौषधं,
कैवल्याऽधिपतिं चराऽचरपतिं देवाधिपैः संस्तुतम् ।
संख्याऽतीतवरेण्यचारुचरितं सम्यक्त्वसारप्रदं,
श्रीशंखेश्वरपार्श्वनाथमुनिपं ध्यायामि नित्यं मुदा ॥१॥

तिग्मांशुस्तनुतां जगाम भवतोऽनन्तप्रभाराशिभिः,
शितांशुः क्षयतां गतोऽपि नितरां तच्चिन्तया दूरगः ।
मन्ये भावतया नमन्ति परमं ते यान्ति धामाऽक्षयं,
श्रीशंखेश्वरपार्श्वनाथमुनिपं ध्यायामि नित्यं मुदा ॥२॥

स्थूलाभोगवता सहस्रफणिना छत्रायितं मूर्ध्नि ते,
तेन त्वं जगदीश ! कालभयहृल्लोकेषु संस्तूयसे ।
इत्थं कस्तव पद्धतिं प्रभवति प्रोद्धर्तुमन्तः परः,
श्रीशंखेश्वरपार्श्वनाथमुनिपं ध्यायामि नित्यं मुदा ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसाराऽम्बुनिधौ पराजयपदं यः प्राप्य भग्नोत्सवः,
सोऽरं त्वत्स्नपनाऽम्बुसेचनतया धत्ते यथाकामितम् ।
प्राचीना धरणीधवा हि समरे जाता जयश्रीयुताः,
श्रीशंखेश्वरपार्श्वनाथमुनिपं ध्यायामि नित्यं मुदा ॥४॥

तीर्थाधीश ! कियाँस्तवाऽस्ति महिमा यं कीर्त्तितुं न क्षमा,
वाग्देवी वचसांपतिर्विधिरपि त्यक्ताऽन्यकार्यव्रजाः ।
इत्याश्चर्यमशेषवेदिनि विभो ! नास्ति त्वयि क्ष्मातले,
श्रीशंखेश्वरपार्श्वनाथमुनिपं ध्यायामि नित्यं मुदा ॥५॥

भो ! विश्वाऽधिपते ! त्वदीयशरणं संप्राप्य के भावतो–
मृत्युं जन्मजराभयं च सुखतो नो जिग्युरात्मप्रियाः ।
स स्मृत्याऽपि भवोदधिः क्षयति चेत्ते किं पुनर्दर्शना–
च्छ्रीशंखेश्वरपार्श्वनाथमुनिप ! त्वां स्तौमि नित्यं मुदा ॥६॥

ये तीर्थाधिपते ! नमन्ति भविनस्त्वत्पादपद्मद्वयं,
संसाराऽम्बुनिधिं तरन्ति तरसा चाऽत्राऽपि संभुज्य शम् ।
भावस्यैव महार्घताऽत्र नियता तस्माद्वरा भावता
श्रीशंखेश्वरपार्श्वनाथमुनिप ! त्वां स्तौमि नित्यं मुदा ॥७॥

किं हेयं किमहेयमाशु करणीयं किं कुकृत्यं किमु,
धर्माऽधर्मविधानकश्च किमिति चित्या हि के जानते ।
सार्वज्ञं विमलं परार्थघटकं शास्त्रं तदर्थक्षमं,
श्रीशंखेश्वरपार्श्वनाथमुनिप ! त्वां स्तौमि नित्यं मुदा ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( वसन्ततिलकावृत्तम् )

येषां मनःसरसि पार्श्वमुनीश्वरस्य,
स्तोत्रोज्ज्वलच्छद इह च्मिणां स्थिरीस्यात् ।
ते मृत्युभावमपहाय महात्मभावं,
यान्ति क्रमेण मनुजाः परमाऽर्थभाजः ॥ ९ ॥

संवत्सरे शशितुलाऽङ्कधराप्रमाणे,
चैत्रे सिते शुभतरोत्सवपूर्णिमायाम् ।
यात्रां विधाय मुनिभिः सह शुद्धभावं,
स्तोत्रं व्यधायि यमिनाऽजितसागरेण ॥ १० ॥

---

## श्रीमदर्बुदाचलजिनेशस्तोत्रम् ॥ ३ ॥

( वसन्ततिलकावृत्तम् )

भक्ताऽर्त्तिनाशनकरं विशदप्रभावं,
भक्ताऽमराऽसुरनरेन्द्रनतक्रमाब्जम् ।
संसारसिन्धुतरणोत्तमपोतकल्पं,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ १ ॥

ध्यानस्थितं मुनिवरा वचनं त्वदीयं,
हृद्गोचरं प्रविदधुः समशीलवन्तः ।
ते मोक्षसिद्धिवशगा वशिनो बभूवुः,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विघ्नानि यान्ति विततानि तव प्रभावा-
न्नाशं विभो ! जगदनन्यहिताऽनुबन्धिन् ! ।
सर्वार्थदाननिपुणो न विभुस्त्वदन्यः,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ ३ ॥

स्तोत्रप्रिया नरगणा भवशान्तिकारं,
सौम्यं प्रभो ! तव महागुणराशिमाशु ।
चित्ते विभाव्य भवभीतिपराङ्मुखाः स्युः,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ ४ ॥

संसारतापविधुराः परिणामसिद्धा-
स्तद्धेतुरत्र भवतश्चरणाऽनुपातः ।
कस्त्वत्प्रभावविमुखो गुरुसंगरक्तः,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ ५ ॥

को बुद्धिमान्विदितभूरिगुणप्रतापं,
स्वल्पाऽणुधामविभवं जुषते विहाय ।
कालान्तकक्रमगतोऽपि भवान्तकारिन् ?,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ ६ ॥

भव्या जनास्तव विभो ! शरणं प्रपन्ना-
स्तीर्त्वाऽपमृत्युमनघाः शिवशर्मभाजः ।
रेजुः समस्तधरणीधवपूज्यपादाः,
श्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आदिप्रभो ! तव पदाऽब्जमहं प्रणम्य,
मुक्तोऽस्मि संसृतिभयादखिलात्सुखेन ।
नाऽतः परं मम भयं भवजातदुःखा-
च्छ्रीअर्बुदाचललसद्वृषभं स्तवीमि ॥ ८ ॥

षोणीतुलाङ्कशशभृन्मितहायनेऽलं,
षष्ठ्यां सितेऽर्बुदगिरेः प्रविधाय यात्राम् ।
स्तोत्रं प्रगीतमिदकं शुभफाल्गुने च
कल्याणदातृगणिनाऽजितसागरेण ॥ ९ ॥

## श्रीचारूपतीर्थस्तोत्रम् ॥ ४ ॥

( शार्दूलविक्रीडितवृत्तम् )

मेघश्याममनोहराऽऽकृतिजुषं चक्षुष्मतां शान्तिदं,
दातारं विभवान्विचित्रसुखदाँस्त्रातारमागन्तुकान् ।
हन्तारं भवभूततापमखिलं भक्तिप्रियोल्लासिनां,
चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥१॥

हाटकराजतरत्नभासुरमहाच्छत्रत्रयभ्राजिनं,
नागेन्द्राच्छफणासहस्रविलसन्मौलिप्रभादीपिनम् ।
केयूरप्रतिबद्धबाहुयुगलं चेतोहराङ्गप्रभं,
चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्माऽरिप्रतिरोधकं गुणगणान्विस्तारयन्तं क्रमात्,
संसाराम्बुधितारकं शिवगतिश्रेयःप्रदानक्षमम् ।
रागद्वेषमहारिवारविजयप्राप्तप्रशस्तिं क्षणा-
च्चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥३॥

यत्पादाऽम्बुजसेवनेन मुनयो दीक्षाफलं लेभिरे,
यद्ध्यानं शिवगामुका जनवरा रात्रिन्दिवं कुर्वते ।
तं तत्त्वार्थविभासकं जिनपतिं त्रैलोक्यरक्षाकरं,
चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥४॥

सर्वैः साम्यतया द्विजादिमनुजैर्यस्य प्रभोः सेवितं,
भक्त्युल्लासिमनोभिरङ्घ्रिवनजं सद्रेखया शोभितम् ।
सत्याऽसत्यविवेकमित्थमनघा जानन्ति लोकोत्तमा-
श्चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥५॥

संप्रेक्ष्य प्रथमां स्वभावमधुरां मूर्त्तिं जगत्पावनीं,
यस्य क्षेमविधायिनीं नरगणास्तापत्रयोन्मूलनीम् ।
संसाराऽर्णवतारिणीं निजजनुःसाफल्यमातन्वते,
चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥६॥

यत्सेवा शिवसन्ततिं रचयति क्षेमं तनोति क्षितौ,
कीर्त्तिं दिक्षु महोज्वलां तनुजुषां विस्तारयत्यञ्जसा ।
चेतः प्रापयति प्रसादमतुलं तृष्णां छिनत्ति क्षणा-
च्चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धं यं शरणं प्रपद्य बहवो भव्या भवं भावुका,
निर्मथ्य क्लमवर्जिता निजगुणैर्जग्मुः श्रियं शाश्वतीम् ।
सर्वापत्तृणराशिवह्निमतुलं तं तत्स्थिरावासं हृदि,
चारूपेश्वरपार्श्वनाथमनिशं भक्त्या स्तुवे श्यामलम् ॥८॥

चारूपेश्वरचारुमूर्तिभगवच्छ्रीपार्श्वतीर्थेश्वर–
स्तोत्रं शान्तिकरं बुधेन रचितं वाचंयमेनाऽद्भुतम् ।
श्रोतॄणां वसुषण्णवक्षितिमिते संवत्सरे वैक्रमे,
मासे भाद्रपदे गुराविदमिह प्रोत्सर्पतां भूतले ॥ ९ ॥

## श्रीउपर्यलातीर्थस्तोत्रम् ॥ ५ ॥

( पञ्चचामरवृत्तम् )

भवभ्रमान्वितान्तजातपातकारिनाशकं,
ज्वलज्जगत्क्षयप्रदाऽशुभाऽनलोत्तमाऽम्बुदम् ।
उपर्यलाख्यपत्तनप्रजामनोऽभिरञ्जकं,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥१॥

करालकालभीतिरीतिवारि हारि शर्मदं,
पतत्पतङ्गरश्मिराशिहासिकान्तिमण्डलम् ।
नमन्नराऽभयप्रदं प्रजेशशक्रवन्दितं,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समानमानमित्रशत्रुसन्तति क्षपाकरा-
क्षयाऽतिशीतिमाऽऽश्रितं श्रितान्तिकं चराऽचरैः ।
जगत्त्रयाऽतिपावनं नमज्जनाऽमराऽवनं,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥३॥

नितान्तभावभासुरैः सुरैः खलोकलोकितं,
सदाऽधरीकृताऽऽपदावलीष्टलीलयाऽश्रितम् ।
शुभोन्नतिप्रकाशकं कदध्वभेदकारकं,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥४॥

स्खलल्लघुप्रमादमान्द्यहारकौषधं वरं,
विचारसारदानदायि तायि भाविचेतसाम् ।
विकारकारलोभमानमोहवारि तारकं,
नमामि ते पदाम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥ ५ ॥

तव क्रमाम्बुजोपमं न विद्यतेऽन्यदक्षयं,
परःसहस्रविघ्नघातकारि तीर्थपावकम् ।
भवाऽटवीभ्रमोऽस्ति तद्विलोकि देहिनां न हि,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥ ६ ॥

कथञ्चिदेकभावतोऽपि दृष्टिगोचरीकृतं,
त्वदीयपादपङ्कजं जनुर्जराभयाऽपहम् ।
समुद्भवन्ति मङ्गलान्यलौकिकानि भूस्पृशां,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निशान्तमुच्चसंपदां सुदान्तशान्तषट्पदै-
निषेवितं प्रभारसोन्नताश्रियाऽतिशोभितम् ।
सुभव्यजन्मसार्थकत्वकारकं दयाभृतं,
नमामि ते पदाऽम्बुजद्वयं मुदाऽन्तिमप्रभो ! ॥ ८ ॥

वस्वाऽश्वाङ्कमहीमिते शरदि सन्माघेऽथशुक्लाष्टमी-
तिथ्यां वीरविभोर्विधाय शुभदां यात्रामुपर्यालके ।
चक्रे वर्यगणीन्दुनेदमजितश्रीरोदकेन स्तुतौ,
कल्याणं विदधातु सर्वभविनां मोक्षार्थिनां सन्ततम् ॥९॥

## श्रीमातरतीर्थस्तोत्रम् ॥ ६ ॥

( वसन्ततिलकावृत्तम् )

सर्वज्ञ ! मोहरिपुमर्दितजीर्णभावा-
स्त्वद्दर्शनेन त्रिकला भवबृद्धिकामाः ।
मार्गं विहाय विधुरा विपथं प्रयान्ति,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ १ ॥

कामार्थिनः सुखधिया वनवीथिकासु,
भ्रान्त्वा परार्थविवशा त्रिपदं भजन्ति ।
त्वत्पादपङ्कजगताः सुखिनो भवन्ति,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देवाऽधिदेवपदवी सुलभा नतानां,
त्वत्पादवारिजयुगे जगदेकनाथ ! ।
सर्वामयाश्च विनतान्हि परित्यजन्ति,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ ३ ॥

मोक्षार्थिनोऽपि तव दृष्टिपथप्रयाता–
स्तीर्त्वा मृतिं शिवसमृद्धिमनुव्रजन्ति ।
किं किं न साधयति नेत्रलता त्वदीया,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ ४ ॥

कल्पद्रुमस्तु भवसौख्यविधानदक्ष–
स्त्वच्चिन्तनं पुनरलौकिकशर्मदायि ।
तस्मात्त्वदीयतुलनां न भजन्ति केऽपि,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ ५ ॥

सत्यस्त्वया निगदितोऽतिविशुद्धधर्मः,
सत्यं त्वदीयमखिलं भुवि सच्चरित्रम् ।
सत्यस्वरूप भगवँस्तव सत्यवर्त्मः,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ ६ ॥

सन्तः समाधितधियः सततं स्मरन्ति,
त्वन्मूर्त्तिमुन्नतिकरीं भवशान्तिहेतोः ।
तस्मादनन्यशरणं त्वमसि प्रजानां,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मायाविनो हि बहवो भुवि देवलोका,
आश्रित्य तान्नरवराश्च्युतधर्मकृत्याः ।
सत्यार्थिनस्तव मतं प्रसमीक्ष्य जाता,
ध्यायामि मातरपुरस्थितसत्यदेवम् ॥ ८ ॥

संवत्सरेऽष्टरसनागधराप्रमाणे,
यात्रां विधाय वरमातृपुराधिभर्त्तुः ।
वाचंयमोऽजितसमुद्र इदं पवित्रं,
स्तोत्रं मधौ सितदले प्रतिपद्यवोचत् ॥ ९ ॥

---

## श्रीशेरीशातीर्थस्तोत्रम् ॥ ७ ॥

( शार्दूलविक्रीडितवृत्तम् )

यः संसारसुखं तृणाङ्कुरसमं संभावयँश्चेतसि,
चिन्तारत्नसमं चरित्रमनघं त्रैलोक्यरक्षाक्षमम् ।
स्वीकृत्याऽक्षयबोधिदानमदिशत्सर्वज्ञसर्वोपमः,
शेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥ १ ॥

पूजा यस्य विभोः कृता शुभततिं विस्तारयत्यञ्जसा,
सल्लक्ष्मीं विभवोचितां वितरति ध्वस्तार्थितृष्णाभ्रमाम् ।
आधिव्याधिपरंपरां विघटयत्यत्यन्तदुःखोदधिं,
शेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्दृष्टिक्षण आतनोति विविधां माङ्गल्यहारावलीं,
सद्बोधं दिशति श्रियं प्रथयति त्रैलोक्यरक्षात्रहम् ।
मानं मर्दयति क्षणाज्जनयते सौजन्यजन्यं यशः,
शेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥३॥

यद्ध्यानं विधुनोति पूर्वनिचिताऽरिष्टाऽष्टकर्माऽऽवलीं,
कैवल्यं कलयन्त्यमन्दमुनयो यद्ध्यानतेजःश्रिताः ।
तेनैवोच्चगतिं श्रयन्ति विबुधा नित्योत्सुका योगिनः,
शेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥४॥

यन्मूर्त्तिर्हृदि धारिता भवभवां पीडां समुन्मूलय-
त्यानन्दं जनतापहं नवनवं स्थाणूकरोत्यात्मनि ।
कौशल्यं प्रकटीकरोति विमदं सर्वार्थसिद्धिप्रदं,
शेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥ ५ ॥

यत्पूजास्नपनेन विघ्नवितातिर्याति क्षयं सर्वथा,
पश्चेषुः क्षयतां व्रजत्यनुदिनं शाम्यन्ति घोरारयः ।
कुष्ठादिप्रचुरार्त्तयोऽपि निखिला नश्यन्त्यरक्ता इव,
शेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥ ६ ॥

यन्मूर्धस्थितवायुभोजनफणासन्तानसंदर्शनाद् ,
भीताऽऽखुक्षयकृद्गणः परवशः संयाति देशान्तरम् ।
आपत्तिप्रभवे सति क्षणमपि स्थानं भजेत्को हि त-
च्छेरीशाभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसारोदधिपोतमक्षयकरं संसेव्य चारित्रकं,
शस्यानन्तगुणाऽऽकरं भवभय–च्छेत्तारमिष्टप्रदम् ।
सर्वत्राऽभयदानदक्षमखिलत्रस्ताङ्गिनां त्रायकं,
शेरीशाऽभिधपत्तनाधिवसनं पार्श्वप्रभुं नौमि तम् ॥ ८ ॥

खाऽष्टाङ्कक्षिति संमिताऽब्दमधुगे शुद्धाऽष्टमीवासरे,
शेरीशाऽधिपपार्श्वनाथचरणेः कृत्वा नतिं भावतः ।
स्तोत्रं भव्यमिदं चकार भविनामालम्बनं भूतले,
सूरीन्द्रोऽजितसागरश्चिरतरं चैतच्चितौ राजताम् ॥ ९ ॥

---

## श्रीमदगाशितीर्थस्तोत्रम् ॥ ९ ॥

( मन्दाक्रान्तावृत्तम् )

बोभूयन्ते विभवबहुलास्त्वत्प्रभावप्रयुक्ता–
जङ्गम्यन्ते जननमरणान्निर्भयत्वं गुणज्ञाः ।
सासद्यन्ते निरुपमवरां मङ्गलानां प्रशस्तिं,
नन्नम्ये सु–व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥ १ ॥

मान्यो यावा-नमितमहिमा तावकीनस्त्रिलोक्यां,
तादृक्केषा-मभयजनको नैव दृष्टः श्रुतो वा ।
मन्दायन्ते सुगतिभवने निर्धनानां (निर्दयानां) मनांसि,
नन्नम्ये सु-व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सौम्याकारा सकृदभिगता मूत्तिरम्या त्वदीया,
तेषां चित्तं कलयति सदा निर्मलं साम्यभावम् ।
संसाराब्धि–श्चुलुकवदहो ! जायते क्षेमकारी,
नम्रम्ये सु-व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥ ३ ॥

स्वर्गस्थानाः पदमुपगता-देवता उच्चसारं,
तद्धेतुस्त्व–द्भजनमहिमा वर्णितुं नैव शक्यः ।
सर्वज्ञोक्त–प्रवचनवचःसारिणां किं दुरापं ?,
नम्रम्ये सु-व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥४॥

सिद्धी रम्या वरयति जनं त्वत्पदाम्भोजरक्तं,
सौभाग्यत्वं सरति निकटं सर्वदक्षप्रभावम् ।
विभ्यद्दूरे व्रजति विषमं दुर्भगत्वं हि तस्मा–
न्नम्ये सु–व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥५॥

कल्याणार्थी तव मुखगतो जातसंकल्पकल्पः,
सिद्धे कार्ये विमुखपटुता दृश्यते नैव केषाम् ।
चित्रन्त्वेत-द्भुवनविदित ! त्वत्प्रतापस्य लोके,
नम्रम्ये सु–व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥६॥

जाग्रत्तेज-स्तति रतिकरं भ्रान्तिशान्तिप्रदायि,
जन्तूद्वेग-श्रमभयहरं पूरिताशाप्रपञ्चम् ।
भानूद्योतं विरचयदलं वृद्धिभावं वरेण्यं,
नम्रम्ये सु–व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसारान्तः-प्रथनविभवं धारयत्कान्तिकान्तं,
भक्त्याऽधीनं परमकरुणं स्वच्छताशालिशीलम् ।
शश्वच्छान्ति-प्रथितविमलाकारमाराधनीयं,
नन्नम्ये सु-व्रतमुनिपतेऽगाशिपूर्भासिबिम्बम् ॥ ८ ॥

मार्गे मासे रसरसनिधिच्दमामिते वैक्रमाब्देऽ-
गाशिग्रामाऽधिपमुनिपतेः सुव्रतस्याऽङ्घ्रियुग्मम् ।
नत्वा भूयोऽजितजलनिधिर्वाचकः स्तोत्रमेत-
च्चक्रे शान्त्यै जननमरणोद्वेजितानां जनानाम् ॥ ९ ॥

---

## श्रीझघडियातीर्थस्तोत्रम् ॥ ९ ॥

( वसन्ततिलकावृत्तम् )

श्रीमत्पदाम्बुजलुठद्भ्रमभीरुवृन्दैः,
संनादितं प्रवरसद्म यदीयमच्छम् ।
देशान्तराऽऽगतसुभव्यगणैः प्रकीर्ण-
मादीश्वरं झगडियाऽधिपतिं तमीडे ॥ १ ॥

भूत्या प्रसन्नमनसो विधिवद्यदीयां,
पूजां प्रफुल्लकुसुमोत्करतो विधाय ।
अक्षीणवित्तविभवाः सुरलोकपूज्या-
आदीश्वरं झघडियाऽधिपतिं तमीडे ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीव्यर्द्धिसिद्धिसमलङ्कृतचारुचैत्यं,
विभ्राजते प्रखरघण्टनिनादघुष्टम् ।
यस्य प्रधानपुरुषोपचिताऽन्तराल-
मादीश्वरं झघडियाधिपतिं तमीडे ॥ ३ ॥

देवाऽसुरेन्द्रनरनायकवन्दिताऽङ्घ्रिं,
सद्भक्तिभावितजनाऽर्चितदीव्यमूर्त्तिम् ।
हृद्गोचरीकृतमलं समतां वहद्भि-
रादीश्वरं झघडियाऽधिपतिं तमीडे ॥ ४ ॥

संसारकूपपततां सुदृढं विशाल-
मालंबनं सुहिततत्त्वविवेचितारम् ।
रागाऽन्विताऽत्वमनुजोष्णकरोपमान-
मादीश्वरं झघडियाधिपतिं तमीडे ॥ ५ ॥

संतारकं निजपदाऽब्जनतप्रजानां,
भास्वच्चराऽचरगणं प्रविलोकितारम् ।
सृष्टारमत्त्वयदयाऽश्रितधर्मबोध-
मादीश्वरं झघडियाऽधिपतिं तमीडे ॥ ६ ॥

नुन्नो नयेन विनयोज्झितदेहिवर्गः,
संस्थापितो गुणिगणः सुदयाप्रधानः ।
संबोधितो जगति येन कलाकलाप-
मादीश्वरं झघडियाधिपतिं तमीडे ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



को नाम यस्य महिमानमनन्तगेयं,
विस्तारतः कथयितुं विभुरस्ति लोके ।
लोकत्रयप्रथितकीर्त्तिवितानकं त-
मादीश्वरं झघडियाधिपतिं स्तुवेऽहम् ॥ ८ ॥

संवत्सरे निधिरसाङ्कशशाङ्कसंज्ञे, ( १९६९ )
चैत्राऽसितप्रतिपदि स्तुतिमाततान ।
सूरीश्वरो झघडियाऽऽदिजिनेश्वरस्य,
श्रेयःप्रदामजितसागर इष्टसिद्धिः ॥ ९ ॥

## ( २ ) श्रीझघडियातीर्थस्तोत्रमपरम् ॥ १० ॥

( मन्दाक्रान्तावृत्तम् )

यो विश्वेषा-मभयजनकः सत्यवाणीविलासो-
यः सत्त्वानां विधुरमखिलं नाशयत्यात्मभावात् ।
यः पारोक्ष्यं परगतमजो-ध्यात एव च्छिनत्ति,
आदीशं तं वरझघडिया-भूषणं नौमि नित्यम् ॥ १ ॥

सद्यः शान्ति-र्भवति मनना-द्यद्विभूतेर्जनाना-
मात्माऽऽनन्दः प्रभवति परो-त्कर्षतादानदक्षः ।
बाह्यो भाव-स्त्यजति हृदयं शुद्धशान्तस्वरूप-
मादीशं तं वरझघडिया-भूषणं नौमि नित्यम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोपानाऽऽलि-र्विलसति महा-चैत्यसंबन्धिनी या,
तामाश्रित्या-ऽक्षयसुखगता जीवलोका(भव्यजीवा)भवन्ति ।
मूर्तिं यस्य प्रवरविभया भ्राजमानां विलोक्य,
आदीशं तं वरझघाडिया-भूषणं नौमि नित्यम् ॥ ३ ॥

मूर्त्तिं यात्र-त्तव विषहरां शुद्धधर्माऽनुरक्ता-
नो वीक्षन्ते परजनकृपा-कांक्षिणो वीतमोहाः ।
पापच्यन्ते भयदभुवने तावदक्षीणपापा-
आदीशं तं वरझघाडिया-भूषणं नौमि नित्यम् ॥ ४ ॥

मोक्षाऽऽकांक्षा गतभवभया सिद्ध्यति त्वत्प्रणामा-
दुःप्राप्योऽसौ परमभिभवा-दुष्टकर्मारिमूलाद् ।
सिद्धिः साध्या गुरुमुखतया सर्वथा मानवाना-
मादीशं तं वरझघाडिया-भूषणं नौमि नित्यम् ॥ ५ ॥

यस्याऽधीनं जगति विशदो-द्धारकं धर्मवर्त्म,
यस्याऽधीनं जगदभिमतं शर्म्मसन्तानमिद्धम् ।
यस्याऽधीनं कलिगुणगणो-च्छेदकं मुख्यतत्त्व-
मादीशं तं वरझघाडिया-भूषणं नौमि नित्यम् ॥ ६ ॥

पारावारे जननमरण--क्लेशवित्ते भवेऽस्मिन्,
खिद्यन्तस्त्व-च्चरणवनभू-नावमासाद्य सद्यः ।
तीरोत्तीर्णाः सुखमनुभव-न्तो न खिन्नाः परत्र,
आदीशं तं वरझघाडिया-भूषणं नौमि नित्यम् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हृद्ये तत्त्वे परिणतमति-स्तावकीने महीने,
भव्यो नव्योऽनवरतमसौ संसृतेर्याति पारम् ।
स्मारं स्मारं हृदि तव पदं ध्यानमग्ना जनास्त-
दादीशं तं वरङ्गघडिया-भूषणं नौमि नित्यम् ॥ ८ ॥

नाभेः सूनोर्वरङ्गघडियाभूषणस्य क्रमाब्जं,
नत्वा भूयो रसरसनिधिद्मामिते (१९६६) वैक्रमाब्दे ।
माघे शुद्धे प्रतिपदि तिथौ स्तोत्रमेतत्ततान,
शुद्धस्वान्तोऽजितजलनिधिर्दीव्यलक्ष्म्या निदानम् ॥९॥

## श्रीमदिलादुर्गतीर्थस्तोत्रम् ॥ ११ ॥

( शिखरिणीवृत्तम् )

महोत्तुङ्गस्थान-स्थितशशधराऽऽदिग्रहगणै-
र्महापूज्याद्भावा-त्सविधमनुयातैरिव सदा ।
निजभ्रान्तिच्छित्त्यै, समुपचरिते चित्रविभवे,
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ १ ॥

प्रकृष्टोच्चैस्तुङ्गो-त्तमगुणगणा शृङ्गवितति-
र्नृणां दूरस्थाना-मपि हरति चेतो गुरुरिव ।
यदीया धर्मार्थ-प्रकटनपरा भूरिविभवा,
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रभावज्ञैः पूज्यै–र्मुनिवरचयैर्नादितगुहा–
महातत्त्वज्ञान–प्रथनपटुतामूलगुरवः ।
विलोक्यन्ते यस्मि–न्नुचिरतरमध्या बहुविधा–
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ ३ ॥

सुसम्यक्त्वोपेता–न्यपरशुभतीर्थानि विपुला–
न्यहो राजन्तेऽस्मिन्, विमलमतिदानैकनिपुणे ।
क्रमात्पुंसां नित्यं, गमनपरिपाटीं कृतवता–
मिलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ ४ ॥

ज्वलत्कान्तिव्राता–अनवमगुणा औषधिगणा–
विकासन्तेऽजस्रं, शमिततपनाऽऽतापितजनाः ।
तमस्विन्यां यस्मि–न्मणिमयसुदीपा इव सदा,
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ ५ ॥

सरःश्रेणी शश्व–द्विमलजलपूर्णा प्रतिपदम्,
सुधासारश्च्युत्वा, शशधरसकाशात्स्थित इव ।
गरुत्मन्तो यस्मि–न्मधुररटनानन्दजनका–
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ ६ ॥

यदीयां सद्वृद्धिं, निजपटुतया को न विबुधः,
शिरो धुन्वन्शंसेत्, जितविबुधराजोपवनिकाम् ।
मृगेन्द्रा अप्यस्मिन्, बहुसुखतया सन्ति बहुला–
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृगाः सौम्याकारा-स्तृणजलमतानन्दविभवा-
अमन्त्यक्षुब्धास्ते, प्रभुपदसमीक्षापटुधियः ।
यथाकालं सर्वो-निजहितकरः को न भवति,
इलादुर्गे दुर्गे, जयति जिनतीर्थं जयकरम् ॥ ८ ॥

( भुजंगप्रयातवृत्तम् )

सदाक्रान्तशान्ति महामारिशान्ति,
प्रजाशान्तिदं शान्तवैरिप्रभावम् ।
महाक्रोधचण्डाऽरिशान्तिप्रतान-
मिलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ ९ ॥

कलौ शान्तिदानप्रदं शान्तमूर्त्तिं,
सदा देवदेवाधिपैः स्तुत्यकीर्त्तिम् ।
गुणान्यस्य वक्तुं न शक्तोऽपि जीव-
इलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ १० ॥

शशी तिग्मरश्मिः समेतौ किमत्र,
यदीयाऽवतंसच्छलेन स्वभावात् ।
प्रभोर्दर्शनाऽऽकांक्षयोद्भूतमोदा-
विलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ ११ ॥

विभोर्भालपट्टस्थितं शुद्धरत्न-
मनर्घ्यं सदोद्योतयद्धाम सर्वम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रदीपौ प्रकुर्वद्विभावर्जितौ द्रा-
गिलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ १२ ॥

विशाला विभोः शुद्धपद्मासनस्था,
सुमूर्तिः सुरूपा प्रमाणप्रसिद्धा ।
मनोहारिणी स्वागतानां नराणा-
मिलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ १३ ॥

जना भाविनो भक्तिसंभारवन्तः,
समेत्याऽत्र दुष्कर्मभीतिं त्यजन्ति ।
सुकर्माऽर्जयित्वा लभन्तेऽमरत्व-
मिलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ १४ ॥

प्रभो ! शान्तिनाथ ! त्वमेवाऽसि लोक-
त्रयाऽधीशिता दुःखहर्त्ता जनानाम् ।
भवे त्रायको विद्यते कोऽपि नाऽन्य-
इलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ १५ ॥

अहं दर्शनात्ते विभो ! जातकृत्यः,
स्मरामि त्वदीयं पदद्वन्द्वमीड्यम् ।
सदा प्रार्थिताऽर्थप्रदातारमीश-
मिलादुर्गसंस्थं स्तुवे शान्तिनाथम् ॥ १६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( उपजातिवृत्तम् )

चौलुक्यवंशाऽम्बरभानुमाली, सम्यक्त्वशाली सुकृतैकभागी।
न्यायप्रधानो जितमोहमानो-जितेन्द्रियः सर्वत एष मान्यः।१७।

नराऽमरेन्द्रस्पृहणीयशीलः, कुमारपालः क्षितिपालमुख्यः।
शशास भूमण्डलमेकवीरः, शचीपतिर्दीव्यभुवं यथैव ॥१८॥

निर्मापितस्तेन वरेण्यवर्णः, श्रीशान्तिनाथस्य महाविहारः।
प्राक्पुण्यभाराऽर्जितशुद्धकीर्त्ति-व्रजः स्थितोरम्य इवाऽतिभाति ॥

इयद्दरद्रोणिधरोविभूषां, श्रीशान्तिनाथालयतो विशेषात्।
चकास्ति संप्राप्य धराधराणां, राजेव चूडामणितां प्रपन्नः ॥

द्विपञ्चसंख्याप्रमितानि जैन-चैत्यानि रेजुः परितः प्रधानम्।
श्रीशान्तिगेहं जितनाकशोभं, तारागणास्था शशिमण्डलीव ॥

कुमारपालेन विनिर्मितःखर-तराऽऽख्यगच्छस्य जिनालयोऽयम्
पट्टावलीलेखतएव शान्तिदो-निश्चीयते निर्मलतानिदानम्॥२२।

श्रीवीरतोबाणवसुद्विवर्षे(२८५), बभूविवान् संप्रतिभूमिपालः।
व्यभूषयद्यो धरणीं जिनालयैः, सहस्रसंख्यैरतुलप्रभाधरैः।२३।

बिम्बानि तेनैव सहस्ररश्मि-तेजोभिभावीनि विधापितानि।
विलोकयन्संप्रति भव्यलोक-स्तनोति सम्यक् शिवसंपदं स्राक् ॥

इलादिदुर्गेऽत्र विधापितोऽसौ, श्रीशान्तिवासः क्षितिपेन तेन।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्थं पुरावृत्तविदो वदन्ति, प्रमाणमेतत्सुधिया विलोक्यम् ।२५।

इयद्दरं प्राक्तनमेव पत्तनं, जिनालयश्रेणिविराजमानम् ।
चकास्ति सम्यक्त्वविभासिचेतः-श्राद्धा वसन्त्यत्र सुनीतिभाजः

( शार्दूलविक्रीडितवृत्तम् )

बाणद्वीपरसोर्वराऽभिकलिते ( १९७५ ) संवत्सरे वैक्रमे,
जीर्णोद्धार इलानगेऽस्य विहित-श्चैत्यस्य शान्तिप्रभोः ।
श्रीसंघेन जिनोक्ततत्त्वपटुना, सर्वर्द्धिदानादिना,
दुष्कर्मारितृणाऽनलः सुखकरः, स्वर्गाऽपवर्गप्रदः ॥ २७ ॥

राष्ट्रोडाऽन्वयवारिजोष्णकिरणः, सन्न्यायनिष्णातधी-
र्जीर्णोद्धारविधानकोच्चहृदय-स्तत्त्वाऽर्थवेदिप्रियः ।
दीनानुद्धरयन्नजस्रविभवः, कल्पद्रुकल्पोपमः,
श्रीमत्सिंहप्रतापभूमिरमणो-ऽशासीत्प्रजामीडरे ॥ २८ ॥

श्रीमद्दोलतसिंहभूपतिसहायेनाऽत्र शान्तिप्रभो-
श्चैत्योद्धारमचीकरच्छुभमतिः श्रीजैनसंघः समः ।
वह्निद्वीपनिधिक्षमापरिमिते संवत्सरे वैक्रमे,
नानापत्तनरैव्ययेन महता श्रीहेमचन्द्राऽनुगः ॥ २९ ॥

संवच्छम्भुविलोचनर्षिनिधिभूसंज्ञे शुचौ (१९७३) शोभने,
श्रीमच्छान्तिजिनेन्द्रमूर्तिमनघामानम्य शुद्धात्मना ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रे वाचकपुङ्गवोऽजितसुधासिन्धुस्तवं शान्तिद-
मेतत्सत्त्वहिताय दुर्गममहादुर्गस्थतीर्थेशितुः ॥ ३० ॥

---

## श्रीपञ्चासरपार्श्वनाथस्तोत्रम् ॥ १२ ॥

( शार्दूलविक्रीडितवृत्तम् )

यद्भासा प्रविभाति तिग्मकिरणो-ल्लासिप्रभाक्तामता,
तायिन्या जगतीतलं तलमिवा-ऽऽदर्शीयकं कम्रया ।
प्राचीनोर्जितकर्मजातविविध-व्याध्यन्धकाराऽपहं,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् ॥ १ ॥

धर्माऽऽरामकलाकलाधरनिभं भाव्याऽयवृन्दाऽऽदरं,
राकेशद्युतिदं सुदन्तसुषमोल्लासद्यदीयाऽऽननम् ।
लक्ष्यीकृत्य दिगन्तकीर्त्तिममलां संयाति दीव्यप्रभं,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् ॥ २ ॥

संसारोद्धृतिरन्तिमा गुणजुषां, यद् ध्यानतो जायते,
दुष्टान्यष्ट लयं व्रजन्ति सुधियां, रौद्राणि कर्माणि च ।
संपत्तिः सुलभा नराऽमरगण-श्लाघ्या स्वनर्घ्या नृणां,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पापं वारयति क्षमां जनयति, क्षेमं करोत्यञ्जसा,
दारिद्र्यं दलयत्यलं वितनुते, कीर्त्तिं परां शाश्वतीम् ।
सन्तोषं वितरत्यथाऽपि यदनु-ध्यानं विधत्तेऽक्षयं,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् । ४ ॥

यच्छ्रेयप्रबलप्रभा शमयति, क्षोभं कुवादोद्भवं,
नैरुज्यं नितरां तनोति, सुमदं, संपादयत्यात्मानि ।
दुर्वारां दलयत्यनङ्गसुभट-प्रोद्दामभीतिं सदा,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् ॥ ५ ॥

यत्पुण्योपचितं नराऽमरगणाऽधीशै-र्मुदा वन्दितं,
मिथ्यामोहतमोनुवासितधियां, तथ्यस्वरूपोष्णगुम् ।
सीरं सारतरं दुरन्तविषमा-पत्तिक्षमादारणे,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् ॥ ६ ॥

भीतिर्भूतगताऽन्यचक्रजनिता, लुप्ताऽऽस्पदा लक्ष्यते,
यत्रातङ्कगणान्तकारिविभुना, स्नात्राऽम्बुना चारुणा ।
यस्याऽमन्दसुभक्तिभासुरसुर-क्षोणीन्द्रसंपूजितं,
श्रीपञ्चासरपार्श्वनाथचरणा-ऽम्भोजद्वयं नौम्यहम् ॥ ७ ॥

दुर्वाराः कमठादिभिर्विरचिता–नैकोपसर्गाः क्षयं,
भेजुर्यस्य तमोऽपहारितपसा, ताम्यज्जनाऽऽतायिना ।
दौर्ध्यौर्वादिकतापतापितजनाऽऽ–नन्दप्रदानोचितं,
श्रीपञ्चासरपार्श्वनाथचरणा–ऽम्भोजद्वयं नौम्यहम् ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमत्पट्टणपत्तनेऽधिवसतिं, सौभाग्यसाराऽऽस्पदं,
यः पार्श्वाऽधिपतिः करोति जनता–भावोन्नतिप्रापकः ।
तस्येदं भवभीतिहारि मनुजो–यः कीर्त्तयेदष्टकं,
निर्वृत्तिं समुपैति सोऽतिरभसा, निर्मानमारार्त्तिकः ॥ ९ ॥

श्रीपञ्चासरपार्श्वनाथनमनं प्रीत्या प्रकुर्वन्मुहु–
राकाशर्षिनिधिक्षपाकरमिते ( १९७० ) संवत्सरे वैक्रमे ।
मासे फाल्गुनके सिते प्रतिपदि स्तोत्रं तिथावेतकद् ,
दीव्याभोऽजितसागरः श्रुतधरो वाचंयमो निर्ममे ॥ १० ॥

---

## श्रीयुगादीश्वरजिनस्तवनम् ॥ १३ ॥

( शार्दूलविक्रीडितवृत्तम् )

आत्मानन्दविलासमग्नमनसं शुद्धस्वरूपात्मकं,
संसाराऽम्बुधिलङ्घने प्रवहणं कल्याणमालाऽङ्कितम् ।
दुष्कर्मद्रुमपावकं शुभमति–प्रोद्दीपने दीपकं,
वन्देऽहं प्रभुमादिनाथमनिशं त्रैलोक्यरत्नाकरम् ॥ १ ॥

गार्हस्थ्ये सकलाः कलाश्च विशदं शिल्पं बभाषे समं,
कैवल्यं प्रतिपद्य यः क्रमतया विस्तारयामासिवान् ।
तत्त्वानि प्रथितानि दीव्यमहिमा धर्म्याणि धर्मिप्रियो–
वन्दे तं प्रभुमादिनाथमनिशं त्रैलोक्यरत्नाकरम् ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोकानामुपकारकर्मनिरतो ज्ञानेन नैर्मल्यभाक्,
सिद्धान्तेषु महत्सु लब्धमहिमा सर्वेषु सिद्धक्रियः ।
वेदेषु प्रथितश्च चित्रचरितः ख्यातः पुराणेष्वपि,
श्रीमानादिजिनेश्वरो दिशतु वः श्रेयस्ततिं शोभनाम् ॥३॥

भक्तानामभयङ्करं जितभयं नाऽन्तादिमध्यक्रियं,
हर्त्तारं दुरितस्य शान्तिकलितं लीलागृहं संपदाम् ।
नाभिक्ष्मापतिवंशमस्तकमणिं सम्यग् रमाराजितं,
वन्देऽहं प्रभुमादिनाथमनिशं त्रैलोक्यरक्षाकरम् ॥ ४ ॥

सर्वोपद्रवपन्नगप्रमथने नागान्तकोऽनन्तकः,
सौवर्णोपमवर्णकः शुभमहोक्षाऽङ्केन विभ्राजितः ।
श्रेयः सन्ततिगुल्मिनीजलधरो धर्मापगार्वीधरः,
श्रीमानादिजिनेश्वरोऽजितनतः पायादपायाज्जनान् ॥५॥

---

## श्रीसंखेश्वरपार्श्वनाथचैत्यवन्दनम् ॥ १४ ॥

( शार्दूलवि० वृ० )

कीर्तिर्यस्य विराजतेऽतिविमला गौडीपुरे पूर्वरे,
तीर्थस्तम्भनके च लोद्रवपुरे वाराणसीपत्तने ।
जीरावल्यभिधानके सुविदिते तीर्थेऽतिरम्यर्द्धिके,
श्रीसंखेश्वरपार्श्वनाथमनिशं वन्दे तमिष्टप्रदम् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इष्टार्थप्रतिपादनेऽमरतरुं सिद्धान्ततत्त्वाऽऽलयं,
श्रीवामातनुजं सुराऽसुरगणैर्वन्द्यं सदा भावतः ।
स्वर्गे भूमितले च नागवसतौ ख्यातप्रभावं प्रभुं,
श्रीसंखेश्वरपार्श्वनाथमनिशं वन्देऽक्षयार्थप्रदम् ॥ २ ॥

दुर्भेद्यानि विभिद्य बोधपविना कर्माणि यो मूलतः,
प्राप्याऽनन्तफलं चिरत्नमतुलं ज्ञानाऽऽख्यरत्नं विभुः ।
लेभे निर्वृतिसौख्यमात्महितदं स्वानन्दिताऽऽत्मा स्वयं,
श्री संखेश्वरपार्श्वनाथमनिशं वन्दे तमिष्टप्रदम् ॥ ३ ॥

त्रैलोक्याऽधिपतिं पवित्रवपुषं लोकत्रयोद्धारकं,
पापानामविलोकनीयमनिशं मुक्तिप्रियाऽऽलिङ्गितम् ।
कुम्भोजाक्षियुगं प्रसन्नवदनं स्वच्छाद्विजालिप्रभं,
श्रीसंखेश्वरपार्श्वनाथमनिशं वन्देऽक्षयाऽर्थप्रदम् ॥ ४ ॥

अब्धिधर्द्वीपभुजेङ्गभू (१९७४) परिमिते संवत्सरे वैक्रमे,
मासे माधव उत्तमेऽसितदले यद्दर्शनं पावनम् ।
प्राप्तं पुण्यवतां सदैव सुलभं दुष्प्रापमन्याङ्गिनां,
श्रीसंखेश्वरपार्श्वनाथमजिताऽऽनन्दप्रदं नौम्यहम् ॥५

---

## श्रीसिद्धचक्रचैत्यवन्दनम् ॥ १५ ॥

( शार्दूलवि० वृ० )

आराध्यं जिनपुङ्गवं गतमदं शक्रादिसंपूजितं,
सज्ज्ञानादिगुणैकरत्ननिलयं निर्दोषसन्मानसम्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञानाऽसिक्तकर्मजालममलं मुक्तिप्रियाऽऽलिङ्गितं,
सम्पूर्णार्थमहं नमामि शिवदं सिद्धं च बुद्धं सदा ॥१॥

गच्छाऽधीशमनेकसद्गुणमयं सौम्यं गणानां पतिं,
वन्देऽहं वरवाचकं श्रुतधरं क्षान्त्यादिधर्मप्रियम् ।
मित्राऽमित्रसमानदृष्टिमखिलां चारित्रिणां मालिकां,
निर्वाणाऽऽस्पदसाधऽनोद्यतमतिं भूमण्डले चाऽन्वहम्॥२

श्रीसर्वज्ञगणप्रदिष्टमनघं ज्ञानं पवित्रं परं,
तत्त्वाऽर्थप्रतिपादने च कुशलं सद्दर्शनं सौख्यदम् ।
विच्छिन्नाऽऽस्रवकर्मगुप्तिसमितिक्षेमं च चारित्रकं,
दुष्कर्मेन्धनदाहदक्षमतुलं प्रीत्याऽऽश्रये सत्तपः ॥ ३ ॥

पापौघप्रलये हुताशनसमं माङ्गल्यमालाप्रदं,
त्रैलोक्ये परमोपकारकरणे तत्त्वं परं सद्गुरुम् ।
भावाऽऽपत्तिविदारकं गुणवतां शुद्धेः परं कारणं,
वन्दे मोक्षसुखस्य कारणमिमं जन्मादिदुःखाऽपहम् ॥४॥

भव्याऽब्जप्रतिबोधने दिनमणिं संसारसिन्धुप्लवं,
चिन्तारत्नसुरद्रुमादधिगुणं सद्भावसंवर्द्धकम् ।
आराध्यं नवकाररूपमनघं तत्त्वत्रयोद्दीपकं,
वन्देऽहं नितरां सुखैकसदनं श्रीसिद्धचक्रं मुदा ॥ ५ ॥

---

६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीपर्युषणपर्वस्तुतिः ।

पर्वण्युत्तमसिद्धिधामनि जनाः ! पूजां प्रभोर्भावतः,
संप्राप्तेऽष्टविधां शुभां रचयत स्नात्रोत्सवं सोत्सवम् ।
श्रीमद्वीरजिनेश्वरस्य कृतिनः सत्पुण्यसम्पत्तिदां,
येनैवाऽत्र परत्र शर्म निखिलं संप्राप्यते निर्भयम् ॥ १ ॥

आराध्याऽतिविशुद्धिदं क्षतिकरं भव्यं तपःकर्मणां,
सर्वज्ञाः सकला वराम्बुजचयैः पूज्याः प्रमोदाऽऽस्पदाः ।
श्रोतव्यं चरितं तदीयमतुलं दीव्यप्रभावं जनै-
रस्मिन् पर्वणि येन ते जनिमतां कल्याणमालाप्रदाः ॥२॥

कृत्वा शर्मनिधानकं भविजनैः षष्ठाष्टमाऽऽख्यं तपोऽ-
मारीघोषणकं विधेयमिह वै पर्वण्यमुष्मिन् शुभे ।
ध्यातव्यानि शुभं च पञ्च सुधिया कल्याणकानि व्रतं,
आद्यः श्रीयुतगौतमादिगणभृद्वादस्तथाऽईद्गिरः ॥ ३ ॥

कल्पाख्यं मुनिभिः प्रवाचितमिह श्राव्यं त्रिधा देहिनः,
सूत्रं मूलमनर्थहारि सकलाः चाम्यास्त्रिरत्नाऽन्वितम् ।
पूजा संघजनस्य चैत्यनिकरे यात्रा च कार्या मुदा,
सङ्घे त्वं सकले शुभे ! वितनुतात् सिद्धायिके ! सम्पदम् ॥४

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ( १ ) श्रीऋषभदेवजिनस्तुतिः ।

( वसन्ततिलकावृत्तम् )

भक्ताऽमरप्रणतमौलिमणिप्रभाणा-
मुद्दीपकं जिन ! पदाम्बुजयामलं ते ।
स्तोष्ये मुदाऽहमनिशं किल मारुदेव !
दुष्टाऽष्टकर्म्मारिपुमण्डलभित्सुधीर ! ॥ १ ॥

श्रीमज्जिनेश्वरकलापमहं स्तुवेऽर-
मुद्योतकं दलितपापतमोवितानम् ।
भव्याऽम्बुजाऽऽलिदिननाथनिभं स्तवीमि,
भक्त्या नमस्कृतममर्त्यनराधिराजैः ॥ २ ॥

वर्या जिनक्षितिपतेस्त्रिपदीमवाप्य,
गच्छेश्वरैः प्रकटिता किल वाग् मुदा या ।
सम्यक् प्रणम्य जिनपादयुगं युगादा-
वेवं शुभार्थनिकरैर्भुवि साऽस्तु लक्ष्म्यै ॥ ३ ॥

यक्षेश्वरस्तव जिनेश्वर ! गोमुखाह्वः,
सेवां व्यधत्त कुशलक्षितिभृत्पयोदः ।
त्वत्पादपङ्कजमधुव्रततां दधान—
आलम्बनं भवजले पततां जनानाम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीमहावीरजिनस्तुतिः

कल्याणमंदिरमुदारमवद्यभेदि,
दुष्कर्मवारणविदारणपञ्चवक्त्रम् ।
यत्पादपद्मयुगलं प्रणमन्ति शक्राः
स्तोष्ये मुदा चरमतीर्थकरं जिनेशम् ॥ १ ॥

क्षीणाष्टकर्म्मनिकरस्य नमाऽमि नित्यं,
भीताऽभयप्रदमनान्दितमांह्रिपद्मम् ।
इष्टाऽर्थमण्डलसुसर्जनदेववृक्षं,
नित्योदयं दलिततीव्रकषायवृन्दम् ॥ २ ॥

जैनागमं दिशतु सर्वसुखैकदारं,
श्रीनन्दनक्षितिजहव्यहातिप्रकारम् ।
संसारसागरनिमज्जदशेषजन्तु—
बोहित्थसन्निभमभीष्टदमाशु मुग्धम् ॥ ३ ॥

मातङ्गयक्षरमलां प्रकरोति सेवां,
पूर्वान्तमारसमभीप्सितदं विशालम् ।
उत्पत्तिविस्तरनदीशपतज्जनानां,
पोतायमानमभिनम्य जिनेश्वरस्य ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीशान्तिनाथजिनस्तुतिः

सकलकुशलवल्लीपुष्करावर्त्तमेघो—
मदनसदृशरूपः पूर्णराकेन्दुवक्त्रः ।
प्रथयतु मृगलक्ष्मा शान्तिनाथो जनानां,
प्रसृतभुवनकीर्त्तिः कामितं कम्रकान्तिः ॥ १ ॥

जिनपतिसमुदायो दायकोऽभीप्सितानां,
दुरिततिमिरभानुः कल्पवृक्षोपमानः ।
रचयतु शिवशान्तिं प्रातिहार्य्यश्रियं यो,—
विकटविषमभूमीजातदर्त्तिं बिभर्त्ति ॥ २ ॥

प्रथयतु भविकानां ज्ञानसंपत्समूहं,
समय इह जगत्यामाप्तवक्त्रप्रसूतः ।
भवजलनिधिपोतः सर्वसम्पत्तिहेतुः,
प्रथितघनघटायां सर्प ( सूर्य ) कान्तप्रकारः ॥ ३ ॥

जयविजयमनीषामंदिरं ब्रह्मशान्तिः
सुरगिरिसमधीरः पूजितो न्यक्षयक्षैः ।
हरति सकलविघ्नं यो जने चिन्त्यमानः,
स भवतु सततं वः श्रेयसे शान्तिनाथः ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्रीपार्श्वनाथजिनस्तुतयः

श्रेयःश्रियां मङ्गलकेलिसद्म !
श्रीयुक्तचिन्तामणिपार्श्वनाथ !
दुर्वारसंसारभयाच्च रक्ष ?
मोक्षस्य मार्गे वरसार्थवाह ! ॥ १ ॥

जिनेश्वराणां निकरे क्षमाणां,
नरेन्द्र–देवेन्द्रनतांऽह्रिपद्म !
कुरुष्व निर्वाणसुखं क्षमाभृत् !,
सत्केवलज्ञानरमां दधान ! ॥ २ ॥

कैवल्यवामाहृदयैकहार ?
क्षमासरस्वद्रजनीशतुल्य !
सर्वज्ञ ! सेवाऽतिशयप्रधान !
तनोतु ते वाग् जिनराज ! सौख्यम् ॥ ३ ॥

श्रीपार्श्वनाथक्रमणाम्बुजात—
सारङ्गतुल्यः कलधौतकान्तिः ।
श्रीयक्षराजो गरुडाभिधान ?,
चिरं जय ज्ञानकलानिधान ! ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# पार्श्वजिनस्तुतिः ( १ )

नम्राऽखण्डलवृन्दमस्तकमणिव्रातेन घुष्टक्रमं,
दिक्चक्रं निजतेजसा विलसता प्रोद्दीपयन्तं सदा ।
निर्वाणप्रियपत्तनाऽध्वनि महासार्थाधिपं पुङ्गवं,
वन्दे पार्श्वजिनेश्वरं सुभविनां कल्याणमालाप्रदम् ॥ १ ॥

श्रेयःसन्ततिदायकान् जिनवरान्सर्वाञ्छुभध्यायिनां,
सत्तत्त्वागमराशिभाषणपरान् दुर्वादिवादक्षतान् ।
अज्ञानान्धचयप्रणाशनविधौ भास्वत्प्रभाभासुरान्,
कुर्वेऽहं स्तुतिगोचरान्पटुमतिध्यानस्थितान्सर्वदा ॥ २ ॥

कल्याणं विदधातु वो नयगणद्योत्यागमौघः सदा,
श्रीमत्तीर्थकृतां मुखाम्बुजसमुद्भूतोऽविता भूतले ।
भूतानां हतभूरिसंसृतिभयः सन्मार्गसंदीपकः,
सद्यो मोहमहान्धकारहरणे प्रद्योतनो निर्मलः ॥ ३ ॥

सर्वोपद्रवनाशिनी जिनमतप्रक्षोभकक्षोभिनी,
पद्मावत्यजिता परैरनुदिनं दुर्वादिनां दारिका ।
देवी शासनरक्षिकाऽङ्कुशकरा संघाऽऽपदां वारिका,
सर्वत्राऽभयदायिनी विजयताज्जैनेन्द्रमार्गाश्रिता ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीनेमिनाथजिन (ज्ञानपंचमी) स्तुतिः

शंखच्छत्रधरः शिवातनुभवः श्रीनेमिनाथः शिव-
सम्पत्त्यै भवतु क्षमाशमयुतः पञ्चप्रमादोज्झितः ।
पञ्चाक्षीविजयी जयोद्यतमतिः पञ्चाऽश्रवाणां सदा,
पञ्चम्यास्तपसि प्रसक्तमनसां सत्पञ्चमज्ञानवान् ॥१॥

नाभेयत्रिशलासुतादिरनिशं तीर्थङ्करौघः शिवं,
दद्याद्देवनरेन्द्रवन्दितपदो लेभे गतिं पञ्चमीम् ।
पर्वाऽऽराध्यमहाव्रतोत्तमतया तीर्थङ्करैः सेविते,
पञ्चम्यास्तपसि स्थिताय विमले भव्यात्मने ज्ञानदे ॥२॥

निर्वाणाऽमितशर्म भव्यमनुजा आसादयन्ति क्षणाद्,
येषां दृष्टिनिपातनेन करुणादिव्यौकसां सन्ततम् ।
तेषामागमराशयः कृतधियां तीर्थङ्कराणां वराः,
कल्याणं प्रदिशन्तु पञ्चमतिथावाराधनोत्साहिनाम् ॥३॥

मत्तेभौघकपोलभेदनमहाप्रोद्धूतवेगाऽजित—
सिंहारूढवपुः करास्थितकजाऽलङ्कारसंभूषिता ।
देव्यम्बा रुचिराऽऽकृतिर्जिनवरे भक्तिं सदा बिभ्रती,
पञ्चम्या स्तपसि प्ररूढमनसां शान्तिं तनोत्वन्वहम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ( ३ ) श्री ऋषभजिनस्तुतिः

( वसन्ततिलकावृत्तम् )

कल्याणमन्दिरमुदारमवद्यभेदि,
सत्कर्मकारणमनल्पविभानिधानम् ।
शक्रा यदीयचरणाम्बुजमानमन्ति,
नाभेयमीशमनिशं तमहं स्तवीमि ॥ १ ॥

देवाधिदेवनिकरस्य नमामि नित्यं,
भीताभयप्रदमनिन्दितमंघ्रिपद्मम् ।
सर्वार्थसिद्धिनिलयं जनकामितानां,
संपादकं मथितमोहमहाप्रचारम् ॥ २ ॥

जैनेन्द्रवाङ्मयमशेषसुखैकधाम,
श्रेयांसि वो दिशतु दुःखलतालवित्रम् ।
संसारसागरनिमज्जदशेषजन्तु—
संतारणे प्रवहणं प्रवरं गरिष्ठम् ॥ ३ ॥

चक्रेश्वरी विमलपादसरोजयुग्मं,
सेवां दधात्यजितनाथसुशासनस्य ।
देवी दुरन्तभववार्द्धिपतज्जनानां,
पोतयमानमभिनम्य जिनेश्वरस्य ॥ ४ ॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ( ४ ) श्रीमहावीरजिनस्तुतिः

भक्तामरप्रणतमौलिमणिप्रभाणा—
मुत्तेजयच्चरणपङ्कजयुग्ममीश ! ।
तावत्कमुन्नतिकरं शरणं करोमि,
सिद्धार्थराजसुत ? सिद्धिसुखप्रदायि ॥ १ ॥

श्रीमज्जिनेन्द्रनिकरं सततं स्तुवेऽह—
मुद्योतकं दलितपापतमोवितानम् ।
संसारसागरतरण्डसमं निकामं,
देवासुरैः प्रणतपादयुगं स्वभक्त्या ॥ २ ॥

लब्ध्वा जिनेश्वरमुखात् त्रिपदीं प्रशस्तां,
सिद्धान्तमक्रियत यद्गणभृत्समूहैः ।
सम्यक्प्रणम्य जिनपादयुगं युगादा—
विष्टप्रदं भवतु तद्भुवि मानवानाम् ॥ ३ ॥

सिद्धायिकेति तव वीर ! जिनेश ! देवी,
पादाम्बुजेऽजितनतं भजतिस्म नित्यम् ।
दुष्टाऽऽमयोर्मिकलिते दरविघ्नराशा—
वालम्बनं भवजले पततां जनानाम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ( ५ ) सत्यस्मरणम्.

( रामकलीरागेण गीयते )

सुधियः ! स्मरत सदा सुखवन्तं,
सुधियः ! स्मरत सदा सुखवन्तम् ।
शरणाश्रितजनवत्सलनिर्भय-
प्रेमवसन्तमवन्तं रे ॥ सुधियः ! ॥ १ ॥

किञ्चन स्थैर्यं मनसि विधाय,
भजत जिनागमदेशम् ।
कुमतरचनाघटितकृतान्तं,
त्यजत दुरन्तमशेषं रे ॥ सुधियः ! ॥ २ ॥

गुरुरविवेकी परिहर्त्तव्यो,
दूषयति यो मतिहीनम् ।
सुगुरुवचः परिपीतं किञ्चित् ।
कुरुते दीनमदीनं रे ॥ सुधियः ! ॥ ३ ॥

मिथ्यातत्त्वहृतात्मविकासं,
पृच्छत किं सुखवासम् ।
परमाऽऽनन्दसमीहा स्याच्चे-
त्किमु न त्यजत परिहासं रे ॥ सुधियः ! ॥ ४ ॥

मनसा निर्जित एव मनुष्यो
लभते नो स्वात्मरतिम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येन जितं निजमानसमेत—
त्सपदि स याति सुमतिं रे ॥ सुधियः ! ॥ ५ ॥

भवपाथोधिनिदानमनादि,
काम लोभमदमानम् ।
परिहर मित्र ! वृषं सुखकारं,
भज कुरु जिनपदध्यानं रे ॥ सुधियः ! ॥ ६ ॥

भवकान्तारगतः किं सहसे ?
दुस्सहदुःखमपारम् ।
चिन्तय जगदुपकारमनन्यं,
दुर्लभशिवसुखकारं रे ॥ सुधियः ! ॥ ७ ॥

श्रयताऽजितपदकमलमहीनं,
सुरमुनिमधुकरलीनम् ।
वदत वचनमतिहितदमदीनं,
सत्यसुधारसपीनं रे ॥ सुधियः ! ॥ ८ ॥

---

## शत्रुञ्जयमण्डनश्रीऋषभदेवजिनस्तुतिः

( स्रग्धरावृत्तम् )

आनन्दानम्रकम्रत्रिदशपतिशिरःस्फारकोटीरकोटी—
प्रेङ्खन्माणिक्यमालाशुचिरुचिलहरीधौतपादारविन्दम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आद्यं तीर्थाऽधिराजं भुवनभवभृतां कर्ममर्माऽपहारं,
वन्दे शत्रुञ्जयाख्यक्षितिधरकमलाकण्ठशृङ्गारहारम् ॥ १ ॥

माद्यन्मोहद्विपेन्द्रस्फुटकरटतटीपाटने पाटकं ये,
विभ्राणाः शौर्यसारा रुचिरतररुचां भूषणायोचितानाम् ।
सद्वृत्तानां शुभानां प्रकटनपटवो मौक्तिकानां फलानां,
तेऽमी कण्ठीरवाऽऽभा जगति जिनवरा विश्ववन्द्या जयन्ति ॥२

सद्बोधावन्ध्यबीजं सुगतिपथरथः श्रीसमाकृष्टिविद्या,
रागद्वेषाऽहिमन्त्रः स्मरदवदवथुः प्रावृषेण्याऽम्बुवाहः ।
जीयाज्जैनाऽऽगमोऽयं निबिडतमतमःस्तोमतिग्मांशुबिम्बो-
द्वीपः संसारसिन्धौ त्रिभुवनभवने ज्ञेयवस्तुप्रदीपः ॥ ३ ॥

यः पूर्वं तन्तुवायः कृतसुकृतलवैर्दूरितैः पूरितोऽपि,
प्रत्याख्यानप्रभावादमरमृगदृशामातिथेयं प्रपेदे ।
सेवाहेवाकशाली प्रथमजिनपदाम्भोजयोस्तीर्थरक्षा-
दक्षः श्रीयक्षराजः स भवतु भविनां विघ्नमर्दी कपर्दी ॥४॥

---

## ( २ ) श्रीशान्तिनाथजिनस्तवनम्.

( गजल कव्वाली रागेण गीयते )

सर्वार्थसिद्धिदायिन् ? करुणासुधाब्धिशायिन् ? सर्वार्थ-
श्रीशान्तिनाथ ? शरणं, व्रजामि ते सुचरणम् ।
सकलाऽरतिप्रणाशिन् ? भवपाथसां विशोषिन् ? सर्वा०-१

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीविश्वसेनसूनो ? अचिराप्रमोदभानो ? ।
अज्ञानमोहहरणे, नमोऽस्तु ते सुचरण ? । सर्वा–२

शान्तिं देहि कृपालो ? विधेहि शर्म दयालो ? ।
कुरु मे कृपां विशालां, पालय सुभव्यमालाम् सर्वा–३

गुणगौरवं त्वदीयं, गातुं नवै मदीयम् ।
हृदयं जिनेश ? शक्तं, लोकान्तरे प्रसक्तम् । सर्वा–४

पतितो भवाऽर्णवेऽहं, दुर्व्याधिवारिभरिते ।
मम पालनं कुरु त्वं, ह्यधुनोज्झितं ममत्वम् । सर्वा–५

अजिताऽब्धिसूरिरीश ! ध्यानेऽस्मि तत्परोऽहम् ।
भगवंस्तवैव वैरि–व्रजनाशनैकदृष्टिः । सर्वार्थ–६

---

## ( ३ ) श्रीमहावीरजिनस्तवनम्.

( कव्वाली रागेण गीयते )

सुधासिन्धो ! महावीर ! नमामि त्वत्पदाम्भोजम्
जगत्राता त्वमेवासि, जगद्वन्द्यस्त्वमेवासि ।
जगत्कल्याणकर्त्ताऽसि, जगत्पूज्यस्त्वमेवासि ।
जगद्व्यापी प्रभावस्ते, जगद्भव्याम्बुजोल्लासी ॥ सुधा–१ ॥

सहस्रांशुप्रभाभेदी, समन्तात्कान्तिनिस्यन्दी,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशुद्धस्तावकोदेहः, सदाऽऽनन्दैकसद्गेहः ।
मया ध्यातोरहस्येष–, भवान्तं कर्त्तुकामेन ॥ सुधा–२ ॥
सदा शान्ति कृपासिन्धो ! विधेहि प्रेमिणां बन्धो !,
दुराचारं महाक्रूरं, जनत्रासं विधातारम् ।
निराधारं दयादारं, जगत्त्रातः ! कुरुष्वाऽऽरम् ॥सुधा–३॥
प्रभो ! विघ्नं न मे लोके, विभो ! श्रेयः सदा लोके,
त्वदीयध्यानतो नूनं, न लोके जायते न्यूनम् ।
त्वदीयं ये श्रिताः पादं, न ते यान्ति भवोन्मादम् ॥सुधा–४॥
जगज्जीवा विमूढास्ते, न जानन्ति प्रभावं ये,
महामोहान्धतालीना–यथा वारिस्थिता मीनाः,
सदा चारित्रताहीना–भवोदन्वत्यहो मग्नाः ॥ सुधा–५ ॥
अजितसूरिः सदा स्तौति, जगच्छ्रेयःसमीहानः,
प्रभो ! पादारविन्दं ते, महामोहाऽध्वदीपस्य,
सुसंघस्याऽस्तु कल्याणं, व्रयन्तु क्लिष्टकर्माणि ॥सुधा–६॥

---

## ( ४ ) श्रीमद्वीरजिनस्तवनम्.

( धीर समीरे यमुनातीरे वसतो वसे वनमालीरे–
ठुमरी रागेण गीयते )

वन्दे वीरजिनेश्वरदेवं, शाश्वतसुखदातारं रे ।
त्रातारं जनवल्लभमीशं, शिवरमणीभर्तारं रे ॥ वन्दे–१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामं क्रोधं लोभं मोहं, वारय वारं वारं रे।
वारय भवपाथोधिमपारं, पालय प्राणिसमूहं रे ॥ वन्दे-२ ॥

गुरुगुणखानिमनल्पविकासं, सुरवरपूज्यमहेशं रे।
परमानन्दनिदानमजस्रं, शिवपत्तनसोपानं रे ॥ वन्दे-३ ॥

मिथ्यामोहतमोहर्तारं, शरणागतपातारं रे।
कलिमलदोषकलंकनिवारं, क्रूरकुकर्मकुठारं रे ॥ वन्दे-४ ॥

सत्यदयाधर्मैकनिदानं, दानगुणप्रथितारं रे।
भव्याम्भोजदिवाकरमेकं, भवकान्तारसहायं रे ॥ वन्दे-५ ॥

त्रिशलानन्दनमनघमनल्पं, शिवशर्मैककलापं रे।
विज्ञानैकनिधानमुदारं, शिवसुखकंदपयोदं रे ॥ वन्दे-६॥

जन्मजराभवभयहर्तारं, स्वल्पीकृतसंसारं रे।
अजितमहापदवीदातारं, मोहसुभटजेतारं रे ॥ वन्दे-७ ॥

---

## ( ५ ) श्रीमहावीरजिनस्तवनम्.

राग गजल कवाली-( आसक तो हो रहा हुं )

शिवदं त्वदीयचरणं, विमलं करोमि शरणम् ॥ शिवदं-
मनसा गतैनसाऽहं-कारेण वर्जितोऽहम्।
दुरितं निवारयाऽलं, जगदीशपादकमलम् ॥ शिवदं-॥१॥
भजतां हि तावकीनं, लघुमोदतो विहीनम्।
करुणामयस्वभावं, विकसन्महाप्रभावम् ॥ शिवदं-॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विज्ञानतत्त्वनिचितं, भव्यात्मनां सुरुचितम् ।
महावीर ! तावकीनं, जयमेति शासनं वै ॥ शिवदं—॥ ३ ॥

तव शासनं वहन्तः, सुखभागिनो महान्तः ।
पदमुच्चमेव यान्ति, तरंति चाऽघनीरम् ॥ शिवदं—॥ ४ ॥

भगवंस्त्वयाऽतिचण्डो,—भुजगः समुद्धृतोऽभूत् ।
शरणागतस्य रक्षिन् !, कुरु मामपि प्रसन्नम् ॥ शिवदं—॥५॥

त्रायस्व दीनमनसं, तीर्थाधिनाथ ! विषयात् ।
सुखदं सदैव धेहि, सुकृतं सतां हि रुचिरम् ॥ शिवदं—॥६॥

अजितोदधेः कृतेयं, भवता स्तुतिर्विधार्या ।
मम भावनेति सिद्धा, भवताद्धि सौख्यबद्धा ॥ शिवदं—॥७॥

---

## ॥ श्रीमहावीरस्तोत्रम् ॥

ललित ( भद्रिका ) छन्दः

सकलसिद्धिदं सिद्धभावनं, वनजलोचनं चारुमूर्त्तिकम् ।
मतिमतां मतं सन्मतार्थिनां, जिनपतिं महावीरमाश्रये ॥ १ ॥

मुनिगणैः श्रितं देवदानवै—र्नरगणैः सदा संस्तुतश्रियम् ।
परमतत्त्वदं यस्य दर्शनं, जिनपतिं महावीरमाश्रये ॥ २ ॥

चरितमुत्तमं चारुदर्शनं, शमितकामनं मानहारकम् ।
शिवसुखङ्करं योऽचरन्मुदा, जिनपतिं महावीरमाश्रये ॥ ३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जननमृत्युहं पादपङ्कजं, विमलबोधिदं यस्य शोभनम् ।
जगति देहिनां तारकं स्थितं, जिनपतिं महावीरमाश्रये ॥४॥

जयति शासनं यस्य निर्मलं, प्रणतदेहिनां मुक्तिसाधनम् ।
निखिलकर्मणां वारकं वरं, जिनपतिं महावीरमाश्रये ॥ ५ ॥

भवभवार्तिहां यस्य वाचनां, समयवेदिनः श्रद्धयाऽनिशम् ।
श्रुतिगतां जनाः कुर्वते रता–जिनपतिं महावीरमाश्रये ॥६॥

भवति केवलं यद्गुणव्रजो–क्षयकरो महामोहवैरिणः ।
श्रवणगोचरो भव्यभावतो, जिनपतिं महावीरमाश्रये ॥ ७ ॥

तिथिरहो सदा स्मर्यते सका, मुनिपतिर्गतो यत्र मोक्षके ।
भविजनैर्महामोदधारकै–र्जिनपतिं महावीरमाश्रये ॥ ८ ॥

जिनपतेरिदं स्तोत्रमुत्तमं, पठति यः शृणोत्यन्वहं मुदा ।
व्रजति संपदं देवदुर्लभां, जितमदः स वै सौम्यदर्शनः ॥९॥

वसुमतीतलं पादपद्मतः, सुरनतः सदा पावयन्विभुः ।
जनगणोद्धृतिं योऽकरोदहं, जिनपतिं स्तुवे त्रैशलेयकम् ॥१०॥

विगतवासनं कर्मवैरिणां, हतकमन्वहं बोधदायकम् ।
जनमनोहरं शान्तमानसं, जिनपतिं महावीरमाश्रये ॥ ११ ॥

सुमतिदायिनी शान्तभावना, भवति यद्विभादर्शनक्षणे ।
तमधिनायकं सर्वदेहिनां, जिनपतिं महावीरमाश्रये ॥ १२ ॥

कलिमलाऽपहं यत्पदाम्बुजं, सुरगणानतं राजतेऽनघम् ।
विमलशासनं तं जिनेश्वरं, हृदि विचिन्तये वीरमन्वहम् ॥१३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भुवि दया त्वया सुप्रकाशिता–ऽनवरतं महानर्थहारिणी ।
तव विभो ! कृपा लोकतायिनी, शरणमस्तु मे केवलं भवान् ॥१४

भवमहोदधौ मज्जदङ्गिनां, दृढमिहाऽसि वै तारकः प्रभो ! ।
त्वदपरार्थनं मुग्धमानवो–मनसि चिन्तयेत्कर्मयन्त्रितः ॥१५॥

---

## ॥ अथाऽऽनन्दमन्दिरनाममङ्गलस्तवनं–प्रारभ्यते ॥

श्रीमद्वीरजिनं नमामि नितरां भिन्नान्तरारिव्रजं,
कृत्वा घातिककर्मणां क्षयमरं ध्यानेऽथ शुक्ले स्थितम् ॥
कैवल्यं विमलं प्रपद्य परितो नादेन धर्मामृतं,
वर्षन्तं करुणाऽर्णवं भविजनक्षेत्रेषु सर्वप्रियम् ॥ १ ॥

विभाव्य संसारमनित्यमेके, प्रपेदिरे संयमधर्ममाशु ।
व्रतानि च द्वादशकेऽपि भव्याः,सम्यक्त्वमेकेऽपि विशुद्धमापुः ॥

तस्मिन्दिने संघमनन्तशोभं, संस्थाप्य पूज्योत्तमभिन्नसंख्यम् ॥
भूमण्डले नित्यविहारकारी, भव्यान् जनांस्तारयितुं सुखेन ॥३॥

नमोऽस्तु ते सर्वजगत्क्षमाब्धे ! सिद्धात्मने सर्वविकारहीन ?॥
अनन्तसिद्धे ! अजराऽमराय, तीर्थाधिपाऽनन्तगुणार्णवाय ॥४॥

अकर्मसङ्गाय विरागमूर्त्ते !, अखण्डभावाय जगत्सवित्रे ।
धर्मप्रणेत्रे नयवर्त्मदेष्ट्रे, नमो नमस्ते प्रभवेऽभवाय ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वेषां श्रमणानां त्वं, तारकोऽस्युपदर्शेतः ॥
किंपाकसदृशान् भोगान्, ज्ञात्वा वैराग्यतां गतः ॥ ६ ॥

नमोऽस्तु जिनवर्याय, तपसां निधये नमः ॥
ॐ नमो बोधिबीजाय, केवलज्ञानिने नमः ॥ ७ ॥

वन्देऽवक्रोत्कटमर्तिं, प्रातिहार्याष्टकाश्रितम् ॥
वैक्रियलब्धिसंपन्नं, जङ्घाविद्याचरं पुनः ॥ ८ ॥

उग्रेण तपसा दीप्तं, भूरिविक्रमराजितम् ॥
अखण्डशीलसौभाग्यं, तुल्यनिन्दास्तुतिक्रियम् ॥ ९ ॥

कृतानशनमासेव्य, भैक्ष्यमूनोदरं तपः ॥
कायक्लेशविधातारं, प्रायश्चित्तकरं मुदा ॥ १० ॥

सद्ध्यानेषु समालीनं, कायोत्सर्गसमाश्रितम् ॥
वैयावृत्त्यकरं प्रेम्णा, समलोष्टाश्मकाञ्चनम् ॥ ११ ॥

श्रीजैनधर्मवक्तारं, दुर्गतौ पततां नृणाम् ॥
शरणं भवपाथोधौ, नमामि जिनपुङ्गवम् ॥ १२ ॥

दया प्रख्यापिताऽखण्डा, शास्त्रेषु विधिभेदतः ॥
अनुकंपा हृदि प्रोक्ता, त्वया तीर्थपते ? नमः ॥ १३ ॥

आत्मतुल्यान्समान् जन्तून् , विभाव्य दयया हृदि ॥
वर्तितव्यमतो लोका-स्तरन्तिभववारिधिम् ॥ १४ ॥

हिंसात्मकोधर्म उदारबुद्ध्या, हेयः सदा मंगलमेव तूर्यम् ।
जानन्तु विज्ञा इति धर्ममूलं, तदेव नित्यं शरणं विभाव्यम् ॥ १५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनञ्च यौवनं मत्वा, चञ्चलं क्षणभङ्गुरम् ।
चत्वारि मंगलान्येव, प्रधानानि विजानताम् ॥ १६ ॥

तत्प्रभावान्महाकष्टं, विलयं याति सर्वथा ॥
वैरिस्तेनमहाधूर्ता–श्छलयंति नच क्वचित् ॥ १७ ॥

सिंहसर्पादयः क्रूरा–जन्तवो यान्ति दूरतः ॥
यच्छरणान्महारोगाः, शाम्यन्ति प्राणिनां सदा ॥ १८ ॥

ज्वरस्तद्ध्यानतो नश्ये–द्विघ्नवल्ली च शुष्यति ॥
भूतप्रेतपिशाचाश्च, विघातं कर्त्तुमक्षमाः ॥ १९ ॥

चतुःशरणतो भूपाः, सुरेन्द्रा नागदेवताः ॥
स्वयमेव वशं यान्ति, शुद्धभावेन देहिनाम् ॥ २० ॥

चतुःशरणतः पापं, त्वरयैव पलायते ॥
सत्यमेतद्विजानीया–त्तार्क्ष्यनादादिवोरगः ॥ २१ ॥

आनन्दमन्दिरमिदं महसां निधानं,
सर्वापदां शमनकं जगति प्रधानम् ।
यत्राऽस्थितो विनयशालिजनोऽत्रधानं,
संपद्यते परमतत्त्वमयं विधानम् ॥ २२ ॥

आनन्दमन्दिरतुलां वहते न कोऽपि
सर्वार्थलब्धिनिचयः सुरमाननीयः ।
यत्प्राप्तितोऽस्खलितपुण्यवतां जनाना–
मभ्यर्थनीयमितरन्नहि किञ्चिदस्ति ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनन्दमन्दिरमियर्त्ति विशुद्धभावः,
संपन्नसर्वविभवः सुतरां दयालुः ।
प्राचीनपुण्यनिचयोदयदीव्यदृष्टिः,
सर्वज्ञभाषितशुभागमतत्त्ववेदी ॥ २४ ॥

आनन्दमन्दिरमनल्पसमृद्धिगेहं,
देवाऽसुराधिपतयोऽपि निरीक्षितुं नो ।
शक्ताः स्वचिन्तितविधानपटुस्वभावाः,
पुण्योज्झितः पदमनुत्तममेति नैव ॥ २५ ॥

आनन्दमन्दिरमिदं स्तवनं स्तवार्हं,
शान्तात्मनाऽजितमहोदधिना प्रणीतम् ।
विश्वात्मनां सुखदमस्तु सदेह लोके,
लोकन्तरेऽप्रमितशर्मनिदानमेतत् ॥ २६ ॥

इमं स्तवं यः प्रपठेत्प्रभाते ।
स जीवलोके सुखसंपदाढ्यः ॥
सम्यक्त्वशुद्धः समतानिधानः ।
शिवश्रियं गच्छति निर्मलां वै ॥ २७ ॥

इत्यानन्दमन्दिरनाम मङ्गलं समाप्तम् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ मङ्गलस्तवनं प्रारभ्यते ॥

जय जय जिनदेव क्षेमसंपत्प्रदायिन् ! ।
जय जय सुरराजक्षोणिराजैः सुसेव्य ? ॥
जय जय सुखकंद ! क्लेशसंसर्गहारिन् ! ।
जय जय घनघातिक्रूरकर्मप्रहारिन् ? ॥ १ ॥

यस्याब्धिवद्द्व्यतिशयाः, प्रातिहार्याष्टकं विभोः ॥
विराजते च कैवल्यं, वाक्सुधावृष्टिरुन्नता ॥ २ ॥

चतुर्विधं संघमथो विधाय ।
मुक्तिश्रियं कामयितारमीड्यम् ॥
जगद्गुरुं विश्वकलानिधानं,
दयानिधिं नित्यमहं नमामि ॥ ३ ॥

कायेन मनसा वाचा, ध्यानतः श्रीर्भवेद्ध्रुवम् ॥
विपत्ताः पत्तां यान्ति, मङ्गलस्यादिमस्य च ॥ ४ ॥

जयतु जयतु सिद्धः सर्वदा सौख्यकारी,
निचितनिबिडकर्मच्छेदकः शान्तमूर्त्तिः ॥
त्रिकरणशुभयोगोच्छेदकः सत्यशीलो–
वृतशिवपुरसौख्यः साम्यभावप्रवृत्तः ॥ ५ ॥

भूरिशर्म्मोपमाशून्य–आत्मनिष्ठोऽचलः सदा ॥
निरञ्जनो निराकारो–निर्दुःखो निर्विकारकः ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अजरामरसंस्थान–ईश्वरः करुणाऽऽलयः,
प्रथमो जयति चित्यां, सर्वजन्तुशिरोमणिः ॥ ७ ॥

त्रसनालीकोपरिष्ठा, पञ्चाब्धिलक्षयोजना ॥
अष्टयोजनसंस्थूला, चाग्रतोऽधिकसूक्ष्मका ॥ ८ ॥

छत्राकृतिर्मुक्तिशिला, राजते शाश्वतप्रभा ॥
तस्यां पञ्चदशविधाः, सिद्धिं याता अनन्तशः ॥ ९ ॥

मङ्गलस्यास्य पाठेन, सिद्धस्य श्रवणेन च ॥
सिद्धिं यान्ति जना भव्या–भावभक्तिविशेषतः ॥ १० ॥

चारित्रशालिनः सर्वे, सदा त्यक्तपरिग्रहाः ॥
तपश्चर्यारताः शान्ता–जयन्तु मुक्तिवल्लभाः ॥ ११ ॥

संयमैकक्रियाः पञ्च–महाव्रतपरायणाः ॥
वैराग्यभावतोऽत्यन्त–क्षीणकामादिवैरिणः ॥ १२ ॥

युक्तत्रियोगकरणा–जितमृत्युभयाः सदा ।
ज्ञानदर्शनचारित्र–राजिता विजितेन्द्रियाः ॥ १३ ॥

चतुर्दशपूर्वधराः, केचिच्च द्वादशाङ्गिनः ॥
अवधिज्ञानिनः केचि–न्मनःपर्यववेदिनः ॥ १४ ॥

तेजोलेश्याधराः केचि–त्केऽपि वैक्रियलब्धयः ॥
शुक्लध्यानस्थिताः केचिद्–घातिकर्मविघातिनः ॥ १५ ॥

केवलज्ञानसंपन्नाः, कोटिलक्षसहस्रशः ॥
उत्कृष्टतो जघन्येन, माननीयाश्च देहिनाम् ॥ १६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भविका भावतो वन्द्याः, साधवः साधुकामनाः ॥
तृतीयं मङ्गलं प्रोक्तं, विश्वेषां शिवकारकम् ॥ १७ ॥

जयताज्जैनधर्मोऽयं, केवलिप्राथितः शुभः ॥
दयाधर्मप्रधानश्च, सर्वसिद्धान्तपूजितः ॥ १८ ॥

निजप्राणसमाः सर्वे, प्राणिनो येन वर्णिताः ॥
शाश्वतः सर्वकालेषु, जिनेन्द्रः स प्रकीर्तितः ॥ १९ ॥

धर्मोऽयमिति शुद्धेन, मनसा श्रद्धयाऽपि च ॥
माननीयोऽन्यथा सर्वाः, क्रिया वन्ध्याङ्घ्रिपा इव ॥२०॥

येन जीवदया चित्ते, भाविता भाववेदिना ॥
लघुकर्मा स विज्ञेयो–निर्मलोचितवर्त्तनः ॥ २१ ॥

अनन्तसंसारिजनाः पृथिव्यां;
सिद्धिं गता जीवदयाप्रभावात् ॥
तस्माद्दयां पालयतु प्रकृष्टां,
यया ध्रुवा सिद्धिरमुत्र लोके ॥ २२ ॥

ज्ञानदर्शनचारित्रे, स्थितो धर्मोऽतिनिश्चलः ॥
सर्वागमेषु सारो हि, चतुर्थं धर्ममङ्गलम् ॥ २३ ॥

अर्हत्सिद्धौ मुनिर्धर्म-श्चत्वारो लोकविश्रुताः ॥
शरण्याः सर्वथा चैते, मन्तव्या नात्र संशयः ॥ २४ ॥

अनेन मङ्गलेनैव, दुःखदारिद्र्यसंचयः ॥
वैरिरोगविनाशश्च, जायते सुखसन्ततिः ॥ २५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणवृद्धिश्च भावेन, शुद्धेन कीर्तिविस्तरः ॥
शारदां सारदां वन्दे, सुमतिर्जायते यतः ॥ २६ ॥

जयतु श्रेष्ठपददः, परमेष्ठी जनाश्रयः ॥
नमस्कारपदं सौख्य–दायकं जयतु क्षितौ ॥ २७ ॥

गुणैर्द्वादशभिर्व्याप्ता–अर्हन्तो लोकपूजिताः ॥
निष्कर्माणो गुणाक्रान्ता–स्त्यक्तमिथ्याभ्रमा वराः ॥२८॥

शुक्लध्यानरता जात–केवलज्ञानसंपदः ॥
समागतेन्द्रपर्षद्भि–र्द्वादशभिर्विराजिताः ॥ २९ ॥

वाचं सुधोपमां श्रुत्वा, नरा नार्यश्च भावतः ॥
केचित्संयमिनोऽन्ये च, द्वादशव्रतधारिणः ॥ ३० ॥

कृतकर्मक्षया लोकाः, शिवसंपत्समन्विताः ॥
आदिमस्य पदस्यास्य, महिमा वागगोचरः ॥ ३१ ॥

द्वितीयपदचिन्तायां, सिद्धानां गुणकीर्त्तनम् ॥
यस्मिन्गताः पुनर्नैव, विद्यन्ते जन्मधारिणः ॥ ३२ ॥

भविनां रञ्जकाः सिद्धा–लक्ष्यातीता निरञ्जनाः ॥
शिवशान्तास्त्यक्तकाया–निर्भयाः कर्मभञ्जनाः ॥ ३३ ॥

निर्विकारा जितक्रोधा–गुणाष्टकसमाश्रिताः ॥
अनन्तसुखधामानः, केवलज्ञानधारिणः ॥ ३४ ॥

दर्शयन्तु निजावासं, सम्यक्त्वगुणदर्शिनः ॥
भवादृशो न दातारो–दृश्यन्ते भुवनत्रये ॥ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पदं तृतीयमाख्यातं, प्रवरं गणिसञ्ज्ञकम् ॥
स्तुत्यं सेव्यं सदा सद्भि–र्वन्दनीयं प्रमोदतः ॥ ३६ ॥

महाव्रतानि पञ्चाऽपि, पालयन्तो गणीन्द्रवः ॥
जितेन्द्रिया जितक्रोधा–हृतदुःखसुखाः सदा ॥ ३७ ॥

मुनिगुणगणभूषाभूषिताऽऽनन्दसौधाः,
स्मरदरविजितास्ते त्यक्तमानाऽभिलाषाः ।
भवभवविपदाभिर्दूरतोहीयमाना–
जगति जयनशीला लब्धकामा गणीशाः ॥३८॥

चन्द्रवच्छीतलच्छाया–गिरिराजास्थिराक्रियाः ॥
समुद्र इव गाम्भीर्यं, येषु नित्यं विराजते ॥ ३९ ॥

गणाधिपाः श्रुतज्ञाना–न्मिथ्यात्वपरिहारकाः ॥
विनीता ज्ञानदेष्टारो–द्वादशांगीविचक्षणाः ॥ ४० ॥

सत्यवाचस्तपोनिष्ठा–जनसंशयवारकाः ॥
गुरुसेवापरा लोके, राजन्ते गणिनः सदा ॥ ४१ ॥

उपाध्यायो वरस्वामी, शिवार्थी चित्तसाधकः ॥
हितकृद्दुर्गतजनां–स्तारयन् योगशिक्षकः ॥ ४२ ॥

मोहजिद्भगवद्ध्यान–स्त्यक्तसर्वस्वतत्त्वविद् ॥
महाव्रतेषु संलीनो–निःस्नेहो निर्निकेतनः ॥ ४३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धक्रियासु निरतः, शोकहारी गतक्लमः ॥
एतत्प्रणामतो मारी-ग्रहपीडाऽऽशु शाम्यति ॥ ४४ ॥

ॐ नमो विश्वनाथाय, शिववल्लीघनाय च ॥
यशस्विनेऽरिहन्त्रे च, दुरितध्वान्तभानवे ॥ ४५ ॥

जितक्रोधाभिमानस्त्वं, कल्पवृक्ष इवाऽपरः ॥
चिन्तामणिरिवानन्त-सिद्धिदाने विशारदः ॥ ४६ ॥

केवलज्ञानसंपन्नः, शरण्यः संसृतेः परः ॥
सुरासुरनरेन्द्रैश्च, सर्वदा सेवितक्रमः ॥ ४७ ॥

स्मरणेन तवेशान !, कर्माणि यान्ति दूरतः ॥
गरुडस्य यथा नादं, श्रुत्वा पन्नगराशयः ॥ ४८ ॥

प्रभूतवरविभूत्या भ्राजितोऽसि क्षमाब्धे !,
तव शरणमिता येऽनन्यलक्ष्म्या वृतास्ते ।
विषमविषयचौराधिकृकृता हेलया ते,
शरणमशरणानां त्वं शिवश्रीनिदानम् ॥ ४९ ॥

कोटिनार्यः सुताँल्लोके, सुवते त्वादृशं न हि ॥
नक्षत्राणि चतुर्दिक्षु, प्राच्यामेव दिवाकरः ॥ ५० ॥

निर्मलानां गुणानां त्व-माधारः शान्तिसागरः ॥
धर्मधूर्यो धर्मचक्री, जगदीशो जगद्गुरुः ॥ ५१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अविनाश्यविकारोऽसि, निर्मलो निर्भयः प्रभुः ॥
भवच्छरणतां प्राप्ता–जराजन्मविवर्जिताः ॥ ५२ ॥

अनादिभवरोगो हि, त्वन्नामस्मरणौषधैः ॥
करुणालय तीर्थेश !, विलयं याति सत्वरम् ॥ ५३ ॥

भवदीयगुणग्रामः, क्व मेऽल्पविषया च धीः ॥
नैकत्र घटते स्थातुं, सूर्याचन्द्रमसावुभौ ॥ ५४ ॥

केचिद्धरिहरध्यानाः, केचिद्ध्यायन्ति भारतीम् ॥
केचिद्गणपतिं गौरीं, केचिच्च ग्रहदेवताः ॥ ५५ ॥

केचिच्च शशिनं भानु–मग्निं ध्यायन्ति केचन ॥
कतमे यवनेशश्च, केऽपि भैरवसेवकाः ॥ ५६ ॥

ध्यानार्हा बहवो भवन्ति जगति क्षेमप्रदानक्षमा–
ध्यानं योग्यमिहाऽस्ति किन्तु भवतो मोक्षैकहेतुर्विभो ?
युक्ताऽयुक्तविचारचारुमतयस्त्वत्तःसुखं सर्वदा,
वाञ्छन्ति क्रमयोरतास्तव दयाधर्मप्रधानाजनाः॥५७

भवादृशो न संसारे, विद्यते तारकोऽपरः ।
सर्षपः क्व सुमेरुः क्व, क्व च सिंहो मृगः क्व च ॥ ५८ ॥

क्व विषं क्व सुधापानं, क्व कार्पासं क्व कंबलः ॥
क्वाऽर्कदुग्धं क्व गोक्षीरं, क्व सुधाब्धिः क्व लावणः ॥५९॥

क्व पुण्यपापसंतानः, क्व सत्यासत्यभाषणम् ॥
क्व स्तेनः क्व महेभ्यश्च, क्व खद्योतः क्व भानुमान् ॥६०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्माऽकर्मवतोर्भेदः, प्रत्यक्षो भासते तथा ॥
अब्धिगानां यथा द्वीप–स्तथाऽऽधारस्त्वमन्वहम् ॥६१॥

क्षुधार्त्तानां यथा भोज्यं, तृषितानां यथा जलम् ॥
पक्षिणां च यथाकाशो–रोगिणा–मौषधिर्यथा ॥ ६२ ॥

यथा बालहिता माता, हंसस्य मानसं यथा ॥
शून्याऽरण्यप्रियो हस्ती, आम्रभोगीव कोकिलः ॥ ६३ ॥

सत्याः पतिर्यथा मेघ–श्चातकस्य च जीवनम् ॥
मालती षट्पदस्येव, चकोरस्य यथा शशीः ॥ ६४ ॥

लुब्धस्य धनसंपत्ति–स्तथा त्वं मम वल्लभः ॥
त्वमेव भवपाथोधौ, तारकः सर्वदेहिनाम् ॥ ६५ ॥

हिंसास्तेयमृषावाद–मानक्रोधपरिग्रहाः ॥
निषेविता मयाऽजस्रं, भ्रान्तेन मूढचेतसा ॥ ६६ ॥

विराधना त्रसानां च रागद्वेषेण निर्मिता ॥
कलङ्कानि प्रदत्तानि, बहूनि भूरिनिन्दया ॥ ६७ ॥

कषायविषयान्धेन, परवञ्चनकर्मणा ॥
निकाचितानि कर्माणि, बद्धानि भववर्द्धिना ॥ ६८ ॥

चीर्णा मिथ्याक्रिया मोदात्, कारिताऽनुमतापि च ॥
अष्टादश महापाप–स्थानानि सेवितानि वै ॥ ६९ ॥

एवंविधानि कर्माणि, क्रूराणि विविधानि च ॥
नरकस्थानयोग्यानि, विहितानि पुरा मया ॥ ७० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिणतिमनवेच्य प्रेमतः पापपुञ्जं,
कृतवति मयि मूढे हा ! विचित्रो विपाकः ।
स्फुरति कटुफलानां कर्मणां सञ्चितानां,
फलति हि मनुजस्य चीणमोहस्य कल्पः ॥७१॥

तिर्यक्षु भूरिदुःखानि, जङ्गमस्थावरेषु च ॥
भेदनच्छेदनादीनि, सोढानि परभावतः ॥ ७२ ॥

नरजातौ दरिद्राणां, कुलेषु दीनता कृता ।
प्रत्यहं याचिता लोका–नतु पूर्णो मनोरथः ॥ ७३ ॥

पापोदयसमुद्भूतां, पीडां कर्मवशंगतः ।
भुक्तवान्भवपाथोधौ, निमग्नो भूरिशोऽभवम् ॥ ७४ ॥

अपराधसहस्राणि, कृतानि दुर्गुणाश्रयात् ।
भवच्छरणहीनेन, दीनता धारिताऽनिशम् ॥ ७५ ॥

कालो निरर्थको यातो–मोहकर्मवशस्य मे ।
गृहीता तमसि भ्रान्त्या, रूप्यबुद्ध्या हि शुक्तिका॥७६॥

पिपासाकुलितोऽत्यन्तं, मृगो मरीचिकाधिया ।
भ्रमन्नाशमवाप्नोति, तथाहं जडचेतसा ॥ ७७ ॥

प्रबलज्वरसन्तप्तो–यथाऽन्नं न बुभुचति ।
तथा कर्मोदयेनैव, धर्मध्याने न मे रुचिः ॥ ७८ ॥

यदा ज्वरोपशान्तिः स्या–त्तदा भोज्यं प्रियं मतम् ।
अशुभे कर्मणि चीणे, त्वदीयं शरणं भवेत् ॥ ७९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धागमाऽनुसारेण, भवन्मार्गप्रदर्शकम् ।
ज्ञानदर्शनचारित्रं, शुद्धं नो पालितं मया ॥ ८० ॥

तथापि चरणस्याऽऽशा, संस्थिता मम चेतसि ।
निराशा न विधातव्या, सतां संगतिरीदृशी ॥ ८१ ॥

दयालुस्त्वादृशो नान्यः, शरणागतवत्सलः ।
नापरो भवतो मेऽद्य, सहायो भवकानने ॥ ८२ ॥

भवन्तं जपतो जन्तो–र्मृगारिर्जायते मृगः ।
मदोन्मत्तः करीन्द्रोऽपि, सन्मुखं न निरीक्षते ॥ ८३ ॥

कल्पान्तकालपवनः, प्रचंडश्च हुताशनः ।
तीव्रकष्टसमूहाश्च, नश्यन्ति तव कीर्त्तनात् ॥ ८४ ॥

क्रोधध्मातोद्धतो नागः, श्यामाङ्गो रक्तलोचनः ।
स्मरतस्त्वां न विघ्नाय, जायते विघ्नमोचकम् ॥ ८५ ॥

संग्रामेषु नरेन्द्राणां, भयदेषु समंततः ।
विजयो जायते शीघ्रं, भवतः स्मरणेन वै ॥ ८६ ॥

ध्यानतो भवतो याति, भवतोयनिधेर्नरः ।
क्रोधकल्लोलपूर्णस्य, पारं लोभाश्मधारिणः ॥ ८७ ॥

श्वासज्वरक्षयग्रंथि–कुष्ठदाहभगन्दराः ।
महारोगाः प्रणामेन, व्रजन्ति क्षयतां तव ॥ ८८ ॥

तव चरणरतानां मानवानां दुराधिः,
स्मरणविषयमेति नैव दीव्यप्रभाव ? ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कलुषितहृदयानां पादपद्मे त्वदीये,
रतिरचलतया नो जायते सिद्धिहेतौ ॥ ८९ ॥

काराग्रहस्थितो देही, शृङ्खलाकिलितक्रमः ।
समस्ताऽऽपद्विनिर्मुक्तो–ध्यानतस्तव राजते ॥ ९० ॥

विजिगीषुर्जयी सद्यो–बद्धो मुच्येत बंधनात् ।
जिनेन्द्र ! त्वं त्रिलोक्यां हि, तिलको दीनपालकः॥९१॥

ॐनमोऽर्हते सिद्धाय, श्रीसिद्धिवृद्धिदायिने ।
सुखदः शरणं मेऽस्तु, भवान् जन्मनि जन्मनि ॥९२॥

गजाश्वरथसैन्यानि, प्रबलानि महारिपोः ।
पलायन्ते यथा सद्य–स्तथैव क्रियतां विभो ! ॥ ९३ ॥

त्वन्मोहनीयमन्त्रेण, वैरिणो वशगामिनः ।
यत्र तत्र गतो याति, सत्कारं नैव संशयः ॥ ९४ ॥

जडबुद्धिर्नरो युष्म–च्छरणेन महामतिः ।
मतिमान् पण्डितः सद्यो–जगत्पूज्यतमो भवेत् ॥ ९५ ॥

पत्रं नभो[1] मषी वारि, लेखिनी सुरपर्वतः ।
सरस्वती लिखेत्कोटि–वर्षं यावद्गुणांस्तव ॥ ९६ ॥

---

१ पत्रं व्योम मषी महाम्बुधिसरित्कुल्यादिकानां जलं,
लेखिन्यः सुरभूरुहाः सुरगणास्ते लेखितारः समे ।
आयुःसागरकोटयो बहुतराः स्युश्चेत्तथाऽपि प्रभो ! ,
नैकस्याऽपि गुणस्य ते जिन ! भवेत्सामस्त्यतोलेखनम् ॥ १



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथापि याति नो पारं, स्वल्पबुद्धिरहं कुतः ।
भवदीयगुणान्वक्तुं, प्रभवाम्यस्थिराशयः ॥९७॥युग्मम्॥

गुणराशिर्नृपाधीशः, प्राणिनां जीवनं भवान् ।
याचेऽहमेतदेवात्र, निजस्थानं प्रदर्शय ॥ ९८ ॥

निश्चयेन मया ज्ञातं, शासनं भवता कृतम् ।
त्वदीयं शरणं भूयात्, सदैव सत्यभक्तितः ॥ ९९ ॥

यः पठेच्छृणुयादेत-न्मङ्गलं पापनाशनम् ।
चत्वारि मङ्गलान्येव, वर्त्तन्ते तस्य सद्मनि ॥ १०० ॥

स्तोत्रमेतज्जनानन्दं, पवित्रं पापनाशनम् ।
जयताद्रचितं लोकेऽ-जितसागरसूरिणा ॥ १०१ ॥

## ॥ अथ चतुर्विंशतिजिनस्तोत्रम् ॥

आदिनाथं जगन्नाथ-मजितं शान्तिसागरम् ॥
भजन्तु प्राणिनः शर्म-वल्लीपुष्करवारिदम् ॥ १ ॥

श्रीसंभवं जगद्वन्द्यं, शिवदं हितकारकम् ॥
नमामि परया भक्त्या, त्रातारमभिनन्दनम् ॥ २ ॥

सुमतिं रिपुहंतारं, शिवशर्मविधायकम् ॥
कायेन मनसा वाचा, वन्देऽहं परमाद्भुतम् ॥ ३ ॥

पद्मप्रभुं सुपार्श्वं च, श्रीचन्द्रं चन्द्रवद्गुणम् ॥
सुविधिं सुखदातारं, शीतलस्वामिनं भजे ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेयांसं श्रीजिनाधीशं, दयालुं विश्वतारकम् ॥
वासुपूज्यश्च विमल–मनन्तं धर्ममिष्टदम् ॥ ५ ॥

शान्तिनाथं कृपानाथं, धीरशान्तरसप्रदम् ॥
कुन्थुं वन्देऽरनाथं च, जगत्सार्थं क्षमाधरम् ॥ ६ ॥

मल्लीनाथं सत्यसङ्गं, मुनिसुव्रतमीश्वरम् ॥
श्रीनमिमात्मदमकं, दुर्मतिच्छेदनोद्यतम् ॥ ७ ॥

अरिष्टनेमिं श्रीमन्तं, विवाहोत्सुकिताङ्गनाम् ॥
परित्यज्य शिववधू–सङ्गिनं प्रणमाम्यहम् ॥ ८ ॥

श्रीपार्श्वं काष्ठसंलीन–नागनागीप्रपालकम् ॥
वर्द्धमानजिनं वन्दे, गुणराशिं जगद्रविम् ॥ ६ ॥

संसारासारतां लोके, ख्यापयन्तो जिनेश्वराः ॥
केवलज्ञानिनोऽधर्म–नाशका धर्मबोधकाः ॥ १० ॥

कुर्वन्तु मङ्गलं नित्यं, जनानां परिपालकाः ॥
पूरयन्तु मनोऽभीष्टं, सुखसन्ततिदायकाः ॥ ११ ॥

करुणामयधर्मस्य, प्रणेतारोऽतिनिर्भयाः ।
जिनेन्द्रा जनतासौख्यं, वितन्वन्तु निरामयम् ॥ १२ ॥

येषां स्मरणमात्रेण, कलिकल्मषसंहतिः
निवर्त्तते निराधारा, सन्तु ते भूतिदायकाः ॥ १३ ॥

भवोदधिमहापोत–संकाशा जिनपुङ्गवाः ॥
निष्कारणजगत्राण–परिकल्पितमानसाः ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येषां दर्शनमात्रेण, नश्यन्ति पापराशयः ॥
पवित्रितधरापीठा–स्ते सदा सुखहेतवे ॥ १५ ॥
अर्चिता भावतो लोके, जिनेन्द्राः सिद्धिदायकाः ॥
यदाश्रितनरा लोके, नैव पश्यन्ति चाऽऽपदम् ॥ १६ ॥

---

## ॥ अथश्रीपञ्चपरमेष्ठिस्तवनम् ॥

त्रैलोक्यतिलकं सन्तं, नमामि परमेष्ठिनम् ॥
सर्वाङ्गसुन्दरं मार–हारिणं मङ्गलाऽऽलयम् ॥ १ ॥
समस्तशुद्धसाकारं, सहस्राष्टसुलाञ्छनम् ॥
तितिक्षया विराजन्तं, दुष्टकर्मनिवर्त्तकम् ॥ २ ॥
तपोऽभिवर्द्धिततनुं, शुभध्यानपरायणम् ॥
अज्ञानमर्महन्तारं, शोभनज्ञानधारिणम् ॥ ३ ॥
शोभनाष्टप्रतीहारं, भव्यजीवोपजीवनम् ॥
प्रमादवादहर्त्तार–मनन्तगुणमण्डितम् ॥ ४ ॥
अशुद्धयोगभेत्तारं, नमामि सिद्धपण्डितम् ॥
विशिष्टगुणसंभारं, समस्तरिपुनाशकम् ॥ ५ ॥
सुभानुकोटिभास्करं भवाब्धितारकं वरं,
विकारदृष्टिमोचकं सुजैनधर्ममण्डनम्
समस्तपापखण्डकं विशिष्टशर्मदायकं,
नमामि शान्तलोचनं वरेण्यसंघनायकम् ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अरूपरूपसंकाशं, सदैव स्थिरवासकम् ॥
जितेन्द्रियं जितश्वासं, सर्वभावविबोधिनम् ॥ ७ ॥

अनन्तसौख्यपाथोधिं, रहसि प्रथितालयम् ॥
भवौघवारकं वन्दे, सततं निर्विकारिणम् ॥ ८ ॥

अक्षोभितं कषायैश्च, षट्त्रिंशद्गुणधारकम् ॥
सुसंपदाऽभिसंपन्नं, नमामि वाचकोत्तमम् ॥ ९ ॥

प्रमाणनयसंपन्नं, वाणीयुग्मगुणैर्युतम् ॥
ज्ञानदं सर्वजन्तूना-मुपाध्यायं नमाम्यहम् ॥ १० ॥

त्यक्तमोहमहाजालं, परप्राणसुरक्षकम् ॥
धृतधर्मं सुतत्त्वज्ञं, प्रोज्झिताघनिदानकम् ॥ ११ ॥

व्युच्छिन्नकामलोभारिं, रागद्वेषविवर्जितम् ॥
वीतरागाज्ञया युक्तं, नमामि शुद्धमानसम् ॥ १२ ॥

अज्ञानतिमिरोष्णांशुं, सर्वशर्मप्रसाधनम् ॥
नमामि जैनयोगीन्द्रं, हृतमोहभुजङ्गमम् ॥ १३ ॥

छिन्नमिथ्याऽन्धकारं च, विज्ञानाञ्जनदायकम् ॥
नमामि सद्गुरुं सत्यं, प्रमाददुःखहारकम् ॥ १४ ॥

जयन्तु जैनसर्वज्ञा-जयन्तु परमेष्ठिनः ॥
जयन्तु गुरवः श्रेष्ठा-यैः सुमार्गः प्रदर्शितः ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ अथजिनस्तवनं प्रारभ्यते ॥

श्रीगौतमं नमस्कृत्य, जिनवाणीमहानिधिम् ।
ततः श्रीगुरुपादाब्जं, कालत्रयसुखावहम् ॥ १ ॥

चतुर्विंशतयोऽनन्ता–भूतास्ताः शिवहेतुकाः ।
प्रणमामि सदा भक्त्या, संसारोदधितारकाः ॥ २ ॥

तासामतीतां वक्ष्यामि, चतुर्विंशतिमुत्सुकः ।
केवलज्ञानी निर्वाणी, सागरोऽथ महायशाः ॥ ३ ॥

विमलः सर्वानुभूतिः, श्रीधरोदत्ततीर्थकृत् ।
दामोदरः सुतेजाश्च, स्वाम्यथो मुनिसुव्रतः ॥ ४ ॥

सुमतिः शिवगतिश्चाऽ-स्तागस्तीर्थकृतांवरः ।
नमीश्वरो महाधैर्य–श्चानिलः सुरवन्दितः ॥ ५ ॥

यशोधरकृतार्थौ च, तीर्थनाथोजिनेश्वरः ।
शुद्धमतिःशिवकरः, स्यन्दनोऽघविनाशकः ॥ ६ ॥

संप्रतिर्भावतः पूज्यो–जनचित्तसुधारकः ।
अतीतजिननामानि, पुण्यान्येतानि भूतले ॥ ७ ॥

त्रिकालं यः पठेन्नित्यं, नामान्येतानि भावतः ।
स पुमाँल्लभते सिद्धिं, मनोभीष्टां सुदुर्लभाम् ॥ ८ ॥

वर्त्तमानाऽधुना ख्याता, चतुर्विंशतिरीर्यते ।
कामदा सिद्धसंकल्पा, निकटोपकृतिप्रदा ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथास्मिन्भरतक्षेत्रे, ऋषभाजितसंभवाः ।
तूर्योऽभिनन्दनस्वामी, सुमतिः छिन्नदुर्मतिः ॥ १० ॥

पद्मप्रभः सुपार्श्वश्च, श्रीचन्द्रप्रभ ईश्वरः ।
सुविधिः शीतलः शान्तः, श्रेयांसो धैर्यधूर्वहः ॥११॥

वासुपूज्यश्च विमलोऽ–नन्तः श्रीधर्मतीर्थकृत् ।
शान्तिकुन्थू–जिनौ ख्याता–वरमल्ली जिनेश्वरौ॥१२॥

मुनिसुव्रततीर्थेशौ–नमिनाथ उदारधीः ।
त्यक्तराजीमतिर्नेमिः, श्रीपार्श्ववर्द्धमानकौ ॥ १३ ॥

वर्त्तमाना तत्त्वसिन्धु–श्चतुर्विंशतिरर्हताम् ।
प्राप्तकैवल्यविज्ञाना, सिद्धास्पदविगाहिनी ॥ १४ ॥

मय्यर्हन्तः कृपावन्तः, सर्वकर्मविघातिनः ।
शशिसूर्यनिभांस्तांश्च, स्मरामि भावतोऽभयान् ॥ १५ ॥

अनागतजिनेन्द्राणां, नामानि वर्णयाम्यथ ।
पद्मनाभः शूरदेवः, सुपार्श्वश्च स्वयंप्रभः ॥ १६ ॥

सर्वानुभूतिरीशानो–देवश्रुतजिनेश्वरः ।
क्षीणकर्मोदयो वीरः, पेढालः पोट्टिलस्तथा ॥ १७ ॥

शतकीर्तिः सुविख्यातः, सुव्रतश्चाऽममोऽमलः ।
निष्कषायः सुरप्रार्थ्यो–निष्पुलाकश्चतुर्दशः ॥ १८ ॥

निर्ममश्चित्रगुप्तश्च, समाधिर्जिननायकः ।
संवरोऽष्टादशः प्रोक्तो–जितेन्द्रिययशोधरः ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विजयो मल्लदेवश्च, देवस्तीर्थविधायकः ।
अनन्तवीर्यनामा च, भद्रकृच्चर्मतीर्थकृत् ॥ २० ॥

भाविन्येषा महोत्तुङ्गा, चतुर्विंशतिरर्हताम् ।
सापि चत्वारि तीर्थानि, स्थापयिष्यति भूतले ॥२१॥

अतीताऽनागता चैषा, वर्त्तमाना द्विसप्ततिः ।
जिनेन्द्राणां कृपाशीला, लोकसंस्थितये स्मृता ॥२२॥

जिनस्तोत्रमिदं भव्यं, भव्यानां भवनाशकम् ।
प्रथ्यतां ग्रथितं लोके-ऽजितसागरसूरिणा ॥ २३ ॥

---

## ॥ अथार्हज्जिनस्तोत्रं प्रारभ्यते ॥

प्रणमामि जिनेन्द्र ! त्वां, मुनीन्द्रगणनायकम् ।
सुराऽसुरनराऽधीशा-नागेन्द्रा यस्य सेवकाः ॥ १ ॥
गृहवासं परित्यज्य, सुमतिक्षेमसंङ्गमः ।
तपोग्निदग्धकर्माऽऽलिः, शुद्धभावोच्चभस्त्रिकः ॥ २ ॥
चतुस्त्रिंशदतिशयै-राजितो दिव्यदेहभृत् ।
मुक्तिप्रियो विशेषज्ञो-निर्भयोऽथ निरामयः ॥ ३ ॥
आद्यसंहननः स्वामी, निष्कलङ्कोऽथ निर्मलः ।
निर्लेपः स्फारदेहाभः, पर्वताग्रशिरोद्युतिः ॥ ४ ॥
कज्जलोपममूर्द्धन्यो-दाडिमोपमकेशभूः ।
अर्धचन्द्रललाटश्च, पूर्णचन्द्रोपमाननः ॥ ५ ॥

---

१ प्राणायामविशेषो भस्त्रिका.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परमाणूपमश्रोत्रो–भ्रकुटिर्धनुराकृतिः ।
विकस्वरसरोजाक्षः, सरलोत्तुङ्गनासिकः ॥ ६ ॥

विद्रुमोष्ठः श्रिया चन्द्र–सङ्काशरदनाऽऽवलिः ।
रसनाऽमृतसंश्लिष्टा, रम्यश्मश्रुप्रदेशकः ॥ ७ ॥

सुदीर्घकन्धरः पुष्ट–भुजयुग्मोऽहिबाहुकः ।
पयोजसमपाणिश्च, संहिताऽङ्गुलिपल्लवः ॥ ८ ॥

ताम्रवर्णा नखा यस्य, तं वन्दे शासनाधिपम् ।
शशिभानुसमा रेखा–राजन्ते च करस्थिताः ॥ ९ ॥

गङ्गावर्त्तसमा नाभिः, पञ्चाननकटिः शुभा ।
कृशोदरश्च शुण्डोरुः, कूर्मपृष्ठसमक्रमः ॥ १० ॥

अंघ्रितर्जितपद्माभो–निरवद्याऽङ्गुलिव्रजः ।
तेजस्तिरस्कृतोष्णांशुः, सुरेन्द्रचित्तहारकः ॥ ११ ॥

केतकीसुरभिश्वासो–गोक्षीरमांसशोणितः ।
अदृष्टाऽऽहारनीहारः, समर्यादनखाऽलकः ॥ १२ ॥

छत्रत्रयं नभोमध्ये, चलति स्वप्रभावतः ।
चामराण्यतिशुक्लानि, वीज्यन्ते दीव्यशक्तितः ॥१३॥

सपादपीठकं सिंहा–सनमाकाशसंस्थितम् ।
शुद्धस्फटिकरत्नैश्च, खचितं मौक्तिकैस्तथा ॥ १४ ॥

इन्द्रध्वजः शुभाकारः, सहस्रध्वजमण्डितः ।
ऋतवः षट् समं यस्य, फलपुष्पप्रदायिनः ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भामण्डलप्रभाभिन्न–तिमिरो यत्र तीर्थपः ।
प्रयाति समभूस्तत्र, कण्टका अप्यधोमुखाः ॥ १६ ॥

ऋतवोऽपि भवन्त्याशु, योजनं सुखकारिणः ।
अनुकूलमरुत्पांसु–वर्जिताऽम्बुप्रदो घनः ॥ १७ ॥

जानुमात्रसुमक्षेपो–जायते विभुसन्मुखम् ।
मुखश्वाससुगंधेन, स्थलं सर्वं सुवासितम् ॥ १८ ॥

मागधी गौरवाऽर्था च, भाषापि लोकरञ्जनी ।
धर्मं दिशति द्वादश–परिषत्सु स्थितः प्रभुः ॥ १९ ॥

गृह्णन्त्यर्थं समे सभ्याः, प्रस्फुटं स्वस्वभाषया ।
वैरबुद्धिं परित्यज्य, मृगसिंहादयः स्थिताः ॥ २० ॥

विवादं विविधं भव्याः, कुर्वन्ति मोदधारिणः ।
ईतयो न प्रवर्त्तन्ते, क्रोशं यावत्प्रभावतः ॥ २१ ॥

मारणादिप्रयोगास्तु, न श्रूयन्ते जनैरहो ? ।
शतक्रोशं च दुष्काल–स्थितिर्नैव विभाव्यते ॥ २२ ॥

न्यूनाधिको न पर्जन्यो–वर्षति क्षेमकारकः ।
निरातङ्का जनाः सर्वे, मोदन्ते निरुपद्रवाः ॥ २३ ॥

---

१ "सारङ्गी सिंहशावं स्पृशति सुतधिया नन्दनी व्याघ्रपोतं,
मार्जारी हंसबालं प्रणयपरवशा केकिकान्ता भुजङ्गम् ।
वैराण्याजन्मजातान्यपि गलितमदा जन्तवोऽन्ये त्यजेयुः,
दृष्ट्वा साम्यैकरूढं प्रशमितकलुषं योगिनं क्षीणमोहम् ॥ १ ॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुस्त्रिंशदतिशयै–र्गीर्मेघ इव गर्जति ।
चतुष्षष्टिः सुरेन्द्राश्च, सेवन्ते भूमिपा विभुम् ॥२४॥

पाखण्डा यत्र खण्ड्यन्ते, मिथ्यामोहविवर्द्धकाः ।
स्थाप्यन्ते च शुभाधर्मा–लोकसंस्थितिहेतवः ॥२५॥

महिमख्यापकं तत्र, प्राकारत्रयमुन्नतम् ।
प्रथमो रूप्यसंपन्नो–हिरण्यकपिशीर्षकः ॥ २६ ॥

मणिरत्नमयान्यत्र, राजन्ते तोरणानि वै ।
सोपानानां सहस्राणि, दश राजन्ति सुप्रभम् ॥२७॥

वप्रो द्वितीयः सौवर्णः, सुरत्नकपिशीर्षकः ।
तृतीयो रत्नसंपन्नो–माणिक्यजडिताग्रकः ॥ २८ ॥

सहस्रैः पञ्चभिः सुष्ठु–सोपानैः परिवारितः ।
धनुः पञ्चशतोत्तुङ्गा–भित्तयो मानतः शुभाः ॥ २९ ॥

पीठिका शोभना तत्र, मणिरत्नविराजिता ।
प्रकाशकारिणी भव्या, सोपानराजिराजिता ॥ ३० ॥

तत्र सिंहासनं दीव्यं, शोभते विपुलप्रभम् ।
तस्मिन्नेव समासीनो–धर्मं दिशति केवली ॥ ३१ ॥

तिष्ठन्तीशानके श्राद्धाः, श्राविकाः कल्पवासिकाः ।
वैमानिका मुनीन्द्राश्च, श्रमण्योऽग्निदिशि स्मृताः ।३२।

नैर्ऋते व्यंतरा देवा–भुवनाऽधीशदेवताः ।
देव्यस्त्रयाणां देवानां, वायव्यां तन्वते स्थितिम् ॥३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं स्थिता नृदेवाद्याः, शृण्वन्ति धर्मदेशनाम् ।
श्रेयोबुद्धया महाभावाः, कर्मग्रन्थिविमोचनीम् ॥३४॥

चतुर्दिक्षु ग्रहाः सर्वे, सनक्षत्राः सुनिर्मलाः ।
एकविंशतिसूर्याश्च, प्रकाशन्ते सुखावहाः ॥ ३५ ॥

जनयन्ति सुतान्सर्वाः, काचिदेव जिनेश्वरम् ।
धन्या सा त्रिषु लोकेषु, या सर्वज्ञप्रसूः खलु ॥ ३६ ॥

शशी भानुः सुधासिन्धुः, सुमेरुर्नोपमीयते ।
येनाऽहं तस्य मन्दज्ञो-गुणान्वक्तुं कथं क्षमः ॥ ३७ ॥

सुरगुरुर्यदि वक्तुमुपक्रमेत् ,
तदपि तीर्थकृतो गुणसन्ततिम् ।
सततमुग्रधिया न हि पारतां,
व्रजति भूरितरैरपि हायनैः ॥ ३८ ॥

स्मरणं देवदेवस्य, यो जनो भावतः क्रियात् ।
नाऽऽयान्ति सन्मुखं तस्य, गजवैरिमृगारयः ॥ ३९ ॥

ऋद्धिसिद्धिनिधानानि, स्वयं यान्ति वशं सदा ।
राजरोगा विपद्मृत्यू, पलायन्ते च दूरतः ॥ ४० ॥

शुद्धभावतया स्तोत्र-मेतद्वै नरयोषितः ।
पठन्ति भवपाथोधिं, तीर्त्वा यान्ति शुभां गतिम् ॥४१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्काऽपिनैवापदः स्थानं, प्राप्यते मानवोत्तमैः ।
सम्यक्त्वधर्मसद्भाव–भावितात्मभिरन्वहम् ॥ ४२ ॥

अर्हत्स्तोत्रमिदं भूरि–संपत्तेरादिकारणम् ।
पठनाज्जायते सूरि–अजिताब्धिविनिर्मितम् ॥ ४३ ॥

## ॥ अथ श्रीमहावीरजिनस्तवनं प्रारभ्यते ॥

( भुजङ्गप्रयातवृत्तम् )

नमामि क्षमाशालिनं शासनेशं,
शिवर्द्धिप्रियं सौख्यसंपत्सुहेतुम् ।
गुणाऽऽनन्त्यभाजं प्रजापालनेशं,
महावीरमीड्यं सुराऽधीशवर्गैः ॥ १ ॥

विनीतक्षमानाथसिद्धार्थजातं,
कुलस्यन्दनोच्चध्वजं राजमानम् ॥
समुत्पन्नकैवल्यमापादयन्तं ।
स्वकीयापरक्षेमसंसाधनानि ॥ २ ॥

समागत्य सुराधीशाः, समं कम्पितविष्टराः ।
नत्वा जिनं गृहीत्वा च, गिरिराजमुपाययुः ॥ ३ ॥

महोत्सवं वरं तत्र, विधाय शुभभावतः ।
पुनः संस्थापयामासु–र्जिनाम्बासन्निधौ जिनम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृतवन्दनका निद्रां, हृत्वा स्तोत्रं विधाय च ।
निजावासं ययुः सद्यो-विहितोचितभक्तयः ॥ ५ ॥

सूर्योदये धरानाथं, वर्द्धापयति किङ्करी ।
नृपेणाऽतिप्रमोदेन, चक्रे जन्ममहोत्सवः ॥ ६ ॥

दानानि विविधान्याशु, दत्तानि विधिपूर्वकम् ।
मोदमाला धृता रेजे, दीव्यमालोपमर्दिनी ॥ ७ ॥

संपन्नयौवनः स्वामी, कृतनारीपरिग्रहः ।
विज्ञायावसरं दीक्षां, जग्राह शिवसाधिकाम् ॥ ८ ॥

ततस्तीव्रं तपस्तेपे, दान्तः शान्तो जितेन्द्रियः ।
ध्याननिष्ठो जितश्वासः, क्षान्तकष्टः क्षमोदधिः ॥ ९ ॥

ज्ञानोद्योतकरः पाप-प्रणाशी गुणसागरः ।
शुद्धसंयमवाँल्लोक-त्राता दूषणघातकः ॥ १० ॥

निर्मानमोहलोभश्च, माया दूरगता यतः
शुक्लध्यानगतश्छिन्न-कर्मवैरी सुकेवली ॥ ११ ॥

महिमानं जिनेशस्य, निशम्य समुपागताः ।
विस्मिता लज्जिताः सर्वे, गतगर्वाश्च जज्ञिरे ॥ १२ ॥

प्रभुणा बोधिताः सद्यः, संयमस्थिरमानसाः ।
इन्द्रभूतिर्बभूवाद्यो-गणभृत् पूर्वधारकः ॥ १३ ॥

अध्यध्यिघशतसंख्यानैः, सार्द्धं दश गणाधिपाः ।
प्रवीणास्तत्त्ववेत्तारो-बभूवुरपरेऽग्रहाः ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थापितानि चतीर्थानि, चत्वारि शुभहेतवे ।
कार्याणि नरनारीणां, सिद्धानि कृपया तव ॥ १५ ॥

शैलेषीध्यानमाश्रित्य, शिवसाम्राज्यमाप्तवान् ।
निरञ्जनो निराकारो–भवदुःखविनाशनः ॥ १६ ॥

शुद्धेन चेतसा ध्याये–द्यो नरः सुखलीप्सया ।
भवपारं व्रजत्याशु, स क्रमक्षीणकल्मषः ॥ १७ ॥

कीर्त्तयन्तो जनाः सद्यः, शर्म्मसन्ततिदायकम् ।
श्रीमदर्हद्गणं मुक्ति–सौधमासादयन्ति वै ॥ १८ ॥

सुखदुःखसमा बुद्धि–र्यस्य वै जायते सदा ।
स विवेकी स तत्त्वज्ञो–विन्दते चोत्तमां गतिम् ॥ १९ ॥

विधिव–त्सद्गुरोर्भक्ति–माचरन्विबुधो जनः ।
सम्यग्ज्ञानक्रियाधर्म–मासाद्य मोदते सदा ॥ २० ॥

ज्ञानक्रियारतो जीवो–निरवद्यपथाश्रितः ।
इहलोकसुखं भुक्त्वा, चान्ते मोक्षपुरीं व्रजेत् ॥ २१ ॥

ज्ञानविज्ञानमूलानि,सुखानि सर्वदा नृणाम् ।
प्रत्यहं वृद्धिमायान्ति, क्षीयन्ते न कदाचन ॥ २२ ॥

सद्गुरोः सेवया तद्धि, प्राप्यते विशदात्मभिः ।
मार्दवत्त्वेन सर्वाणि, कार्याणि सफलानि वै ॥ २३ ॥

इन्द्रियाणि वशं येन, नीतानि नीतिमानिना ।
तस्य वश्यं जगत्सर्वं, प्रणमन्ति सुरा अपि ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इन्द्रियाश्वा महावेगा–धावन्ति विषयार्थिनः ।
नीरागतामहामन्त्र–स्तद्वशीकरणे स्मृतः ॥ २५ ॥

इन्द्रियाणि स्वतन्त्राणि, कमनर्थं न कुर्वते ।
अतस्तेषां निरोधाय, यतितव्यं मनीषिभिः ॥ २६ ॥

विषयान्स्मरतः पुंसः, कामः संजायते ध्रुवम् ।
कामेनाऽभिहतो जन्तुः, कार्याऽकार्यविमूढधीः ॥२७॥
किं कार्यं किमकार्यञ्च, नैव जानन्ति कामिनः ।
कामार्त्तो दुःखमाप्नोति, परत्रेह च मानवः ॥ २८ ॥

वामः कामः कृतो येन, सत्यशर्मविघातकः ।
दुरन्तभवपाथोधि–मयत्नेन तरत्यसौ ॥ २९ ॥

कामः कुसुमधन्वाऽपि, हरते बलिनां बलम् ।
अबला छलिता येन, सबलाऽपि दुरात्मना ॥ ३० ॥

तपस्विनोऽपि कामस्य, मुह्यन्ति नाममात्रतः ।
अतस्तन्नामनिर्देशो–हातव्यः सर्वथा जनैः ॥ ३१ ॥

स्तवनं श्रीमहावीर–स्यैतत्सिद्धिविधायकम् ।
पठतां पठितं लोके–ऽजितसागरसूरिभिः ॥ ३२ ॥

## अथार्हत्स्तोत्रं प्रारभ्यते ।

त्रैलोक्यस्वामिनः सन्तः, सुवाचस्तत्त्वबोधकाः ।
अर्हन्तः शिवदा नित्यं, कुर्वन्तु सुखसन्ततिम् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुतातमातृकाः सौम्य–भ्रातृकाः सुखशीलिनः ।
सुजन्मानः सुवक्तारः, कुर्वन्तु सुखसन्ततिम् ॥ २ ॥

विशालभालसन्तानाः, सहस्राष्टकलाञ्छनाः ।
दयालवः सुकेशाश्च, कुर्वन्तु सुखसन्ततिम् ॥ ३ ॥

अखण्डाऽदण्डिनोऽनङ्गा–अचण्डामण्डनालयाः ।
असङ्गा गुणवन्तश्च, कुर्वन्तु सुखसन्ततिम् ॥ ४ ॥

महावीरा गभीराभाः, सुस्थिरध्यानधारिणः ।
रुचिरा अचिरक्षोभ्याः, कुर्वन्तु सुखसन्ततिम् ॥ ५ ॥

अक्रोधा विश्वभर्त्तारः, कर्मवैरिदलाच्छिदः ।
अखिन्ना भेदसंभिन्नाः, कुर्वन्तु सुखसन्ततिम् ॥ ६ ॥

तीर्थसंस्थापने दक्षाः, पापसन्तानभेदकाः ।
व्याप्तप्रतापसौन्दर्याः, कुर्वन्तु सुखसन्ततिम् ॥ ७ ॥

अस्नेहाः स्नेहसंपूर्णा–निर्गेहाः सुदृढाऽऽलयाः ।
अदेहाः सुशरीराश्च, कुर्वन्तु सुखसन्ततिम् ॥ ८ ॥

अकर्माणोऽश्रमाऽगर्वा–अमाया मानवर्जिताः ।
अभोगशोकरोगाश्च, कुर्वन्तु सुखसन्ततिम् ॥ ९ ॥

सुज्ञानाराधका नित्यं, विहरन्तो हिताय गाम् ।
सुरासुरेन्द्रसंसेव्याः, कुर्वन्तु सुखसन्ततिम् ॥ १० ॥

कीर्त्तयन्तः सुधाकल्पं, बोधं मिथ्यात्वबाधकम् ।
भक्तवाञ्छाः सुसन्तानाः, कुर्वन्तु सुखसन्ततिम् ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रटतां दुरितान्येत–च्छिद्यन्ते च यदाश्रयात् ।
अखिलं वाञ्छितं हस्त–संस्थितं जायते ध्रुवम् ॥ १२ ॥

अर्हन्तः सर्वदा पूज्याः, श्रेयःसन्ततिदायकाः ।
ध्यातव्याश्च मनोऽगारे, मनःशुद्धिप्रदायकाः ॥ १३ ॥

पूजयन्ति महाभावा–येऽर्हतो भावतः सदा ।
ते नरा जगदाधारा–अर्च्यन्ते दीव्यसंपदा ॥ १४ ॥

अर्हन्तः सकला लोके, सुराऽसुरनतक्रमाः ।
निरामया निरावेशा–निर्मायं ददतां सुखम् ॥ १५ ॥

गणोऽर्हतां भवभ्रान्तिं, निहन्ति पूजितः सताम् ।
शुद्धिबुद्धिप्रदाता च, त्रैलोक्यतिलकोपमः ॥ १६ ॥

---

## ॥ अथ सिद्धाष्टकं प्रारभ्यते ॥

प्रसिद्धकीर्तिः शिवयोषिदीशः ।
श्रेष्ठः सतां देवविभावनीयः ॥
कर्माणि येनाऽऽशु विखण्डितानि ।
तनोतु नित्यं शिवशर्मसिद्धः ॥ १ ॥

कृपानिधिः सिद्धिवितानदक्षः ।
स्वरूपवान्रूपकलाविहीनः ॥
अनन्तविज्ञो घनपापहारी ।
तनोतु नित्यं शिवशर्मसिद्धः ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गतप्रमादो गतमानमायः,
कलागुणानां स्वयमादिहेतुः ॥
सुसंवरः शश्वदखण्डभाव–
स्तनोतु नित्यं शिवशर्मसिद्धः ॥ ३ ॥

निर्दोषनिर्लोभनिरीतिभावो ।
विरागविद्वेषविकाररोगः ॥
अगाधबोधिर्भववारिधौ नौ–
स्तनोतु नित्यं शिवशर्मसिद्धः ॥ ४ ॥

अलक्ष्यरूपो मलबन्धहीन– ।
आहारसंत्रासविहारशून्यः ॥
अभङ्गविज्ञाननिरन्तराम–
स्तनोतु नित्यं शिवशर्मसिद्धः ॥ ५ ॥

विज्ञातलोकादिविशेषभावा–
स्त्रिलोकनाथो जगदेकबन्धुः
विभिन्नभोगारिविचित्रजाल–
स्तनोतु नित्यं शिवशर्मसिद्धः ॥ ६ ॥

भवन्तमाराधयतां जनानां,
नश्यन्ति नागानलसिंहचौराः ॥
दुःखानि बन्धाश्च कषायशोका–
स्तनोतु नित्यं शिवशर्मसिद्धः ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निरञ्जनः शान्तिसुधासगोत्रो-
मुक्तिप्रियाशश्वदुपासितश्च ॥
निवारिताऽत्यन्तभवानुबन्ध-
स्तनोतु-नित्यं शिवशर्मसिद्धः ॥ ८ ॥

पठन्ति ये सिद्धगुणाष्टकं वै ।
भावेन ते मुक्तिरमां व्रजन्ति ॥
इहाऽपि शर्म्माणि शुभानि लोके ।
न दुर्लभं किञ्चिदपि प्रजानाम् ॥ ९ ॥

---

## ॥ अथाचार्यस्तोत्रं प्रारभ्यते ॥

बहुविदनुगतं यत्सुष्ठु सम्यक्त्वधारि ।
विमलचरितसारि श्रेष्ठवृत्तानुसारि ॥
भवजलधितटाऽऽप्तं पञ्चमारप्रचारि ।
जयति जयनिदानं सूरिपादारविन्दम् ॥ १ ॥

वरनरयुवतीनां बोधतः पापहारि ।
सफलजननकामि ब्रह्मचर्यानुचारि ॥
विजितविषयरोषः सर्वसावद्यवैरि
जयति जयनिदानं सूरिपादारविन्दम् ॥ २ ॥

युवतिजनकथायां द्विष्टभावं दधानं ।
वरतनुविषमाहित्यागि योगिप्रधानम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधिकविषमभोज्यावर्जकं धीनिधानं,
जयति जयनिदानं सूरिपादारविन्दम् ॥ ३ ॥

अपगतकलिदोषं प्रोज्झितश्रेष्ठवेष–
मनभिमतममत्वं वारितोच्चैःकषायम् ।
विषमभवविघाति भेदिताऽशेषदुःखं ।
जयति जयनिदानं सूरिपादारविन्दम् ॥ ४ ॥

हतसकलविकर्मक्लेशसंहारकारि ।
शुचितमशनपानं स्वीकृतं येन नित्यम् ॥
विहरणमपि यस्य क्षेमदेर्यासमित्या ।
जयति जयनिदानं सूरिपादारविन्दम् ॥ ५ ॥

मनसि वचसि काये पुण्यपीयूषपूर्णं,
त्रिभुवनमुपकारैः पूर्णयत्पूर्णकामम् ॥
शुभचरणरतानां त्रायकं स्त्रीनराणां,
जयति जयनिदानं सूरिपादारविन्दम् ॥ ६ ॥

प्रवरतनुविभागं शुद्धवाणीप्रयोगं,
विशदशुभनयानां पालकं प्रौढभावात् ।
गुणगणमणिभूभृत्तत्त्वविद्यानिधानं,
जयति जयनिदानं सूरिपादारविन्दम् ॥ ७ ॥

हृतकुमतविपक्षं सर्वपक्षप्रवीणं,
शशिसमतनुदीप्ति च्छिन्नपाखण्डभेदम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनमतवितनिष्णु क्षेमयोगाभिपन्नं,
जयति जयनिदानं सूरिपादारविन्दम् ॥ ८ ॥
विबुधमनुजवर्गो योऽष्टकं सूरिसत्कं,
शुभपदगुणखानिं पापपुञ्जप्रभेदि ॥
पठति समयविज्ञस्तीव्रवैराग्यकारि ।
जयति जयनिदानं सूरिपादारविन्दम् ॥ ९ ॥

## ॥ अथोपाध्यायस्तोत्रं प्रारभ्यते ॥

संसारपाथोधिनिदानदुःखं,
निघ्नज्जनानां व्रतदानदक्षम् ।
सम्यग् निजाचारविधानविज्ञं,
स्मराम्युपाध्यायपदं चतुर्थम् ॥ १ ॥
स्थानाङ्गमुख्यानि शिवप्रदानि,
सूत्राणि सर्वाण्यनुसेवितानि ।
येन क्षमासेवधिना सुयोगैः,
स्मराम्युपाध्यायपदं चतुर्थम् ॥ २ ॥
सुशीलितव्याकरणानुयोगं,
न्यायाङ्गपूर्णाङ्गमनल्पधैर्यम् ।
गुरुक्रमोपासनयार्थविज्ञं,
स्मराम्युपाध्यायपदं चतुर्थम् ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्पातदावानलवीर्यधाम ।
तत्त्वार्थविज्ञानमभेदतत्त्वम् ॥
अध्यात्मवादैकरतं विकर्म ।
स्मराम्युपाध्यायपदं चतुर्थम् ॥ ४ ॥

निर्बंधविद्यं कृतकर्मनाशं,
श्राणक्रियापारगतं सुशीलम् ।
विशालपूर्वं पठितार्थसारं,
स्मराम्युपाध्यायपदं चतुर्थम् ॥ ५ ॥

सत्यप्रियं तर्जितमानमोहं,
भव्यात्मजिज्ञासितपूर्णकारि ।
विज्ञानसूक्ष्मादितनुस्वरूपं,
स्मराम्युपाध्यायपदं चतुर्थम् ॥ ६ ॥

ज्ञानप्रदं धर्मविचारदक्षं ।
निर्दोषवादं जगति प्रसिद्धम् ।
श्रीजैनचूडामणिमीड्यपादं,
स्मराम्युपाध्यायपदं चतुर्थम् ॥ ७ ॥

महाव्रतैः पञ्चभिरेव नित्यं ।
विराजते कर्मदलप्रभेदि ॥
मनोवचःकायत इष्टधर्मं ।
स्मराम्युपाध्यायपदं चतुर्थम् ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पठन्ति ये ज्ञानवितानहेतो- ।
निःश्रेयसश्रीप्रथनाष्टकं वै ॥
व्रजन्ति ते शुद्धधियस्त्रिकालं,
स्वर्गापवर्गस्य सुखं विशुद्धम् ॥ ६ ॥

## ॥ अथ साधुस्तोत्रं प्रारभ्यते ॥

श्रमणाय नमस्तुभ्यं, निर्ग्रन्थाय महात्मने ।
सुभगाय विषप्राया-न्भोगाज्ज्ञात्वा व्रतार्थिने ॥ १ ॥

अनादृतकषायश्च, व्रतपञ्चकभूषितम् ।
नमामि भावतो नित्यं, सम्यक्त्वयोगधारिणम् ॥ २ ॥

क्षमावैराग्यवंतो ये, षड्द्रव्यनवतत्त्वगाः ।
सज्ज्ञानदर्शनाचारा-धन्यास्ते समदर्शिनः ॥ ३ ॥

समदुःखसुखोद्रेका-मृत्युभीतिविवर्जिताः ।
गुणानां सप्तविंशत्या, संयमं शुद्धमाश्रिताः ॥ ४ ॥

उच्छिन्नमोहकर्माण-स्तापत्रयविभेदकाः ।
धर्मध्यानरताः शुक्ल-ध्यानसंहृतदुर्नयाः ॥ ५ ॥

सर्व जीवदयादक्षाः, क्रियाभेदमदोज्झिताः ।
अखण्डशीलसंपन्नाः, पालका नवधा वृत्तेः । ॥ ६ ॥

क्षान्ताः परिषहा यैश्च, द्वाविंशतिरहर्निशम् ।
प्राणरक्षाकरा भूमिं, पावयन्तो विहारिणः ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकभक्तचतुर्भक्त–प्रभृतितपसाऽऽदृताः ।
प्रतिमा मासिकाद्या च, सदा संलेखनाप्रियाः ॥ ८ ॥
ऊनोदरतपःक्षीणाः, प्रियभिक्षाशनाः सदा ।
कायक्लेशसहाः सर्वे, रसत्यागपरायणाः ॥ ९ ॥
स्वाध्यायध्यायिनो वैया–वृत्यकर्मपरं गताः ।
अनगाराः शुभाः षोढा, तपसा क्षीणकल्मषाः ॥१०॥
चन्द्रवच्छीतलाङ्गाभा–स्तपस्तर्जितभानवः ।
समुद्रसमगाम्भीर्या–हस्तिवद् धैर्यधारिणः ॥ ११ ॥
लब्धिमन्तोऽनघाः सौम्य–तपसा कान्तकान्तयः ।
सर्वसहाः क्षमाखड्गाः, शीलरत्नस्वलंकृताः ॥ १२ ॥
पदानुसारिणः केचि–त्केचिच्च बीजबुद्धयः ।
वैक्रियलब्धिमन्तश्च, विद्याचारणलब्धयः ॥ १३ ॥
विपुलर्जुधियः केचि–देके च हृतसंशयाः ।
मतिश्रुत्यवधिज्ञान–प्रभृतिज्ञानधारिणः ॥ १४ ॥
कोटिद्वयमितास्तत्र, केवलज्ञानधारिणः ।
नवकोटिमितोत्कृष्टा–राजन्ते यतयो वराः ॥ १५ ॥
जघन्यतः सहस्राद्वि–कोटयो मुनयः स्मृताः ।
धन्यास्ते श्रीजिनेन्द्राज्ञां, पालयन्ति सदैव ये ॥ १६ ॥
येषां स्मरणतो नूनं भावेन दुरितक्षयः ।
कर्मवैरिदलच्छेदः, सद्यः सञ्जायते नृणाम् ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ अथ चतुर्विंशतिजिनस्तोत्रं समारभ्यते ॥

जयत्वादीश्वरो नाथो–जयतादजितः प्रभुः ।
श्रीसंभवस्तृतीयश्च, मोक्षस्वाम्यभिनंदनः ॥ १ ॥

सुमतिः शिवदःपद्मः, सुपार्श्वमणिरीश्वरः ।
चन्द्रप्रभः सुविख्यातः, पुष्पदन्तश्च शीतलः ॥ २ ॥

श्रेयांसः कर्मसंहारी, वासुपूज्यश्च पापहा ।
श्रीविमलो जगत्त्राता–ऽनन्तो धर्मो जयप्रदः ॥ ३ ॥

शान्तिनाथः प्रभुः कुन्थु–ररमल्लिजिनेश्वरौ ।
सुखदौ मुक्तिदाता च, मुनीन्द्रो मुनिसुव्रतः ॥ ४ ॥

नमीश्वरो विकर्मा चाऽ–रिष्टनेमिः कृपाऽऽलयः ।
श्री पार्श्वः पार्श्वतुल्यश्च, वर्द्धमानजिनेश्वरः ॥ ५ ॥

चतुर्विंशतिरेषैव, जिनानां करुणानिधिः ।
प्रणम्यते सदा सद्भिः, केवलज्ञानधारिणी ॥ ६ ॥

आदितीर्थङ्करैः प्रोक्तः, स्वयमेवाऽऽर्हतो वृषः ।
नरोत्तमैः सदा ध्यान–मानसैः शुद्धवृत्तिभिः ॥ ७ ॥

यत्र तीर्थंकरा यान्ति, तत्र पाखण्डिनां क्षयः ।
गन्धहस्तिसमा लोके, जनानामुपकारकाः ॥ ८ ॥

भव्यहृत्पङ्कजोद्योत–मानवोऽसत्तमोहराः ।
निर्भयदानदातारो–धर्मान्धलोचनप्रदाः ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धमार्गवियुक्तानां, मोक्षमार्गप्रदायकाः ।
कर्मशत्रुभयार्त्तानां, त्रायका जिनपुङ्गवाः ॥ १० ॥

जितसंयमभाराश्च, वदान्यास्तत्त्वदर्शिनः ।
बोधिबीजनिधिप्राया–नमस्तेभ्यः पुनः पुनः ॥ ११ ॥

विजितक्रोधविद्वेषा–धर्मचक्रधरा जिनाः ।
प्रवरज्ञानचारित्र–दर्शना भवतारकाः ॥ १२ ॥

मुक्तकर्माष्टका बोधि–हेतवो मोक्षदायकाः ।
अचलाऽरोगिणोऽनन्ता–निर्बाधा अक्षयाः सदा ॥१३॥

अजन्मानोऽचलां सिद्धिं, संगता विजिताऽरयः ।
प्रभवो यत्र राजन्ते, तत्र सिद्धिपरम्पराः ॥ १४ ॥

सुराऽसुरभुजङ्गेन्द्रा–इन्द्रचन्द्रदिवाकराः ।
सेवन्ते शुभभावेन, नरेन्द्राश्चार्हतां गणान् ॥ १५ ॥

अर्हतां नाममालेयं, मङ्गला परमा शुभा ।
चिन्तामणिसमा लोके, पूरिताऽखिलकामना ॥ १६ ॥

नरकादिगतिर्येश्च, भिन्नाऽनन्तमहर्द्धिभिः ।
कर्मसिंहभयं नास्ति, तत्पदाम्बुजसेविनाम् ॥ १७ ॥

जिनानां नामधेयानि, निघ्नन्ति दुरितोदयम् ।
वैरिणो वशतां यान्ति, रोगा नश्यन्ति चाऽखिलाः ॥१८॥

धनधान्यसमृद्धीनां, भाजनं जायते नरः ।
यः स्मरेदेकभावेन, जिनानां नाममालिकाम् ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थकृत्स्मरणान्नूनं, वर्द्धते मतिरन्वहम् ।
देवानामपि सन्मान्यो—भवत्येव न संशयः ॥ २० ॥

जिनस्तोत्रमिदं नित्यं, यः पठेच्छृणुयादपि ।
तस्य सद्मनि चत्वारि, वर्तन्ते मङ्गलानि वै ॥ २१ ॥

आदीश्वरः प्रभुः शश्व—दादिमस्तीर्थनायकः ।
नृपाणामादिमो भूपो—व्यवहारविदादिमः ॥ १ ॥

निवर्त्तन्तेऽतिदुःखानि, वीक्षमाणे जिनेश्वरे ।
आयुरन्ते च लभते, शिवसंपत्तिमक्षयाम् ॥ २ ॥

सम्यग्धर्मसरिच्छैल—श्चतुर्विंशतिरर्हताम् ।
सुराऽसुरनरेन्द्राणां, माननीया महीयसी ॥ ३ ॥

मानवानां मनस्तोषः, सतां संपद्यते यतः ।
सैव श्रेण्यर्हतां श्रेष्ठा, तनोतु जगतां शिवम् ॥ ४ ॥

निष्कारणजगद्बन्धु—र्दयाधर्मधुरन्धरा ।
सर्वकर्मविनिर्मुक्ता, त्रिकालं राजते शुभा ॥ ५ ॥

येषां हृदि स्थिता चैषा, मानहीना मनीषिणाम् ।
तेऽपि निर्मानतां यान्ति, सर्वलोकसुखावहा ॥ ६ ॥

विषमं भवपाथोधिं, तीर्त्वा यान्त्यपरं तटम् ।
अर्हच्छ्रेणिपदाम्भोज—प्रथुप्रवहणाश्रिताः ॥ ७ ॥

आनन्दमन्दिरं लोके, जिनेन्द्रवृन्दमद्भुतम् ।
दीव्यदृष्ट्या सृजत्यस्मिन्, कुशलं कुशलार्थिनाम् ॥८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वधर्मप्रधानाऽसौ, सर्वदा सर्वदायिना ।
सप्रभावाऽर्हतां श्रेणी, कुरुतां जगतां शिवम् ॥ ९ ॥

सर्वमङ्गलसद्धेतुः, सर्वकर्मविदारिका ।
सर्वसौभाग्यजननी, सा भूयाद् भूतिदायिनी ॥ १० ॥

व्यराजद्या सदा शैलेऽ-ष्टापदाख्येऽर्हतां ततिः ।
वितनोतु जगच्छ्रेयः, सा भवाऽर्त्तिहरा वरा ॥ ११ ॥

---

## ॥ अथश्रीजिनवाणीस्तवनं प्रारभ्यते ॥

जयन्तु जैनधर्मस्य, देष्टारो जिनपुङ्गवाः ।
द्वादशांगी सुधाकल्पा, रचिता यैर्हितावहा ॥ १ ॥

यदा तीर्थंकरा देवाः, केवलज्ञानधारिणः ।
अवधिज्ञानिनो जङ्घा-विद्याचारिगणान्विताः ॥ २ ॥

मनःपर्यवभृत्पूर्व-धारिणश्च नभश्चराः ।
महाध्यानिक्षमासारा-नो सन्ति वैक्रियर्द्धिकाः ॥ ३ ॥

तदा जिनोक्तया वाचा, सारया पञ्चमाऽरके ।
तरन्ति मनुजाः सर्वे, सुघोरं भवसागरम् ॥ ४ ॥

शुद्धसम्यक्त्वदेवद्रु-र्दयाविस्तारिणी सदा ।
हिंसासंवारिणी वाणी, जिनोक्ता भ्रमनाशिनी ॥ ५ ॥

या चिन्तोच्छेदिनी वाणी, शल्यत्रयविभेदिनी ।
मायाकन्दकुठारी च, भवपाथोधितारिणी ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्यां नैव विपर्यासः, संशयोऽसंभवस्तथा।
दोषत्रयं च नैवास्ति, कुतर्कन्यायकल्पना ॥ ७ ॥

यां विराध्य जना मृत्वा, नरकाऽऽतङ्कवेदिनः।
पुनर्गर्भगता लोके, पच्यन्ते धर्मभीरवः ॥ ८ ॥

यां विदित्वा हितां भव्याः, शिवशर्मविभागिनः।
शुद्धसम्यक्त्वसंपन्ना–नष्टमिथ्यात्वसंभ्रमाः ॥ ९ ॥

जिनवाचं समाराध्य, नरनारीव्रजः कलौ।
साम्यभावेन शिवदं, धर्मं याति न संशयः ॥ १० ॥

जिनवाणीरसज्ञात्रा–ऽजितसागरसूरिणा।
रचितं स्तवनं भक्त्या, जनोपकृतिहेतवे ॥ ११ ॥

## ॥ अथ श्रीगौतमप्रशस्तिः ॥

श्रीवर्द्धमानं प्रणिपत्य पूज्यं,
गुरुं च मूर्ध्ना शुभतत्त्वहेतुम्।
श्रीगौतमस्य प्रवरस्य वक्ष्ये,
गुणान्गुणक्षीरनिधेः प्रभूतान् ॥ १ ॥

गोवरग्राम आराम–मण्डितोऽभूत्क्षितौ वरः।
वसुभूतिद्विजस्तत्र, वरेण्यः पृथिवीप्रियः ॥ २ ॥

एकदा सुखशय्यायां, निद्राणा सा सुलक्षणा।
इन्द्रसौधं सुधागौरं, ददर्श दिग्विभासकम् ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रबुद्धाऽचिन्तयत्स्वान्ते, साकिमेतदितिस्वयम् ।
स्वप्नस्यास्य प्रभावस्तु, ज्ञातव्यः सकलो मया ॥ ४ ॥
विचार्येतिप्रगे स्वीयं, भर्त्तारं समुपेत्य सा ।
प्रमोदमेदुरस्वान्ता, स्वप्नवार्त्तां न्यवेदयत् ॥ ५ ॥

( अपूर्णम् ).

## ॥ श्रीमन्महावीराऽष्टकम्. ॥

( शार्दूलविक्रीडितवृत्तम् )

हिंसायज्ञनिवारकाय जनतासौख्यप्रबन्धार्थिने,
स्याद्वादप्रतिबोधतः प्रकटितक्षेमाऽध्वने तायिने ।
सर्वेष्वङ्गिषु साम्यदृष्टिमनिशं संभाव्य लोकोत्तमां,
पूजाऽर्हाय नरामरेन्द्रभविनां वीराय तस्मै नमः ॥ १ ॥
शङ्काऽभूच्छिशुरेष सोढुमनलं शैलेन्द्रसानौ हृदि,
देवेन्द्रस्य तदात्मशक्तिरनघेत्याख्यापनार्थं प्रभुम् ।
पादाङ्गुष्ठनिघाततो गिरिवरं यः कम्पयामासिवान्,
तं वीरं प्रणमामि शुद्धमनसा कारुण्यपाथोनिधिम् ॥२॥
दीव्योदारसुचारुकान्तिसुभगं सौभाग्यदिव्याऽऽलयं,
प्रक्षीणप्रबलप्रकामविषयं प्रध्वस्तमोहोदयम् ।
यं दृष्ट्वारमनल्पवैरवशगा आजन्मतः प्राणिनो–
दृष्ट्वा शान्तिमुपागताः समतया वीराय तस्मै नमः॥३॥
ध्यानं वीरजिनेश्वरस्य सकलां दत्तेलसत्सम्पदं,
सद्बुद्धिं वितरत्यमेयसुखदां यस्य त्रिलोकेशितुः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यच्छत्यैहिकशर्मराशिमपरं स्वर्गाऽपवर्गं प्रभुं,
वन्दे तं सततं कृपैकवसतिं शुद्धात्मना निर्भयम् ॥ ४ ॥

यन्मूर्त्तिः शिवशर्मसेवधिरलं लक्ष्यीकृता भावतो–
दारिद्र्यं दलयत्यनर्थजनकं तस्याऽव्ययाऽर्थप्रदा ।
तं वीरं मनसा स्मरामि शिवदं दंदह्यमानं जनं,
त्रातारं भववारिधौ भयनिधौ दुःखाऽनलज्वालया ॥५॥

यस्मिन्नेत्रपथं गते भवभयभ्रान्तिप्रणाशक्षमे,
भक्तानामभयप्रदे क्षितितले नश्यन्ति सर्वाऽऽपदः ।
प्रत्यक्षीकृतसर्ववस्तुनिचयं निर्बाधबोधाकरम्,
तं श्रीवीरविभुं भजामि नितरां निवारिताऽरिव्रजं ॥ ६ ॥

पीतं यद्वचनाऽमृतं गमयति स्वर्गं जनानुत्तमान्,
मोक्षञ्चाऽपि शनैः शनैः शुभमतीन्नैकान्तवादाश्रितम् ।
लोकेऽस्मिन् प्रददाति भूतिमनघां निर्बाधसंपद्गृहं,
तस्मै श्रीत्रिशलाऽऽत्मजाय जगतां पूज्याय नित्यं नमः॥७॥

यन्मूर्त्तिः स्फुरति प्रकामविशदा येषां हृदि प्रत्यहं,
ते संसारसमुद्रमुन्नतधियोऽभीतास्तरन्त्यञ्जसा ।
सर्वाऽरिष्टकषायमीनमकरव्राताऽतिभीतिप्रदं,
तं श्रीवीरजिनेश्वरं प्रणमत क्षेमार्थिनः प्राणिनः ॥ ८ ॥

हेमेन्द्रसागरमुनिर्गुरुभक्तिनुन्नः,
स्वाऽऽत्मोन्नतिप्रथनधीर्धृतिमादधानः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्तोत्रं जिनेश्वरगुणप्रकटं प्रकाश-
मानीतवानुभयलोकहितैकधाम ॥ ९ ॥

## श्रीमहावीरजिनस्तवनम् ।

( अयिमातृभूमितेरे–गजल ताल कव्वाली रागेण गीयते )

भगवन् ! विभो ! कृपालो ? ? ? शरणं तवाऽऽगतोऽहम् ।
विधुनोतु पापपङ्कं, कलिदोषदुष्टमनसाम् ॥ भगवन् ! ॥१॥

विकरालकालपाशाननुमोचयाऽऽनिराशान् ।
त्रिशलाप्रमोददायिन् ?, जगदेकसत्त्वतायिन् ! ॥भगवन् ! ॥२॥

विशदार्थवादशोभिन् ?, शिवसौधमार्गदर्शिन् ? ।
शरणागतं सुदीनं, परिपालय प्रभाविन् ? ॥ भगवन् ! ॥३॥

विनयंकरोमि भगवन् ?, विधिना नतोऽस्मि वीर ! ।
भवसागरं हि सुतरं वितनुष्व मे दयालो ? ॥ भगवन् ? ॥४॥

गुणशालिनं भवन्तं, हृदये स्मरामि नित्यम् ।
तव दीर्घदृष्टिदृष्टो–विनयोदितप्रभावः ॥ भगवन् ! ॥५॥

अजितोदधिर्दयालो ? समभावमादधानः
स्तवनं करोति शिवदं, शुभभावदं त्वदीयम् ॥ भगवन् ! ॥६॥

१०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ श्रीसिद्धाचलाष्टकम् ॥

भव्याम्भोजदिवाकरं शशिनिभं संसारतप्तात्मनां,
सोपानावलिममृताशनपदक्षेमार्थिनां नित्यशः ।
सन्तानं जनवृन्दकल्पितवरानन्तप्रदाने परं,
श्रीसिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ १ ॥

शुद्धध्यानविभावितेन मनसा सकृत्कृतं सर्पणं,
येनाऽनल्पसुकर्मणा यदि समुद्दिश्योर्जितं यं वरम् ।
तस्याऽनन्तगुणानि कर्मपटलान्यायान्ति नाशं क्रमात् ।
तं सिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ २ ॥

यत्सौन्दर्यवितानमम्बरजुषः स्वर्गौकसः शाश्वतं,
वीक्ष्य प्रौढसुमोददायि मधुरध्वानं स्तुतिं कुर्वते ।
के नो द्युत्तमलोकवर्त्तिविबुधा नन्दान्ति सत्संपदा,
श्रीसिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ ३ ॥

यत्प्रौढप्रगुणप्रतापमनघं श्रुत्वाऽश्रुधाराधरा—
लोकालोकविहारिणं जनगणाः संमार्जनं कर्मणाम् ।
संसारार्णवपारमेतुमनसः के भान्ति नो भान्विताः,
श्रीसिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ ४ ॥

यः कालाऽनलसन्निभो भवभवप्रोद्दण्डकर्मव्रज—
कक्षाणां प्रबलप्रभञ्जननिभो दुर्ध्यानमेघावलेः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जीमूतः सुकृतोपकारसुलतासंवर्द्धने शर्मदः,
श्रीसिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ ५ ॥

संसाराम्बुनिधिस्खलत्तनुमतां यो नौप्रभावायते,
यो वै भीष्मभवाटवीनिपततामुद्यानकल्पायते,
यो नैसर्गिकवैरबद्धवपुषां निर्वैरमोदायते,
तं सिद्धाचलमानमामिं गुणतः सर्वज्ञराजिश्रितम् ॥ ६ ॥

धर्मार्थिव्रजमानसोरुसरसि भ्राजत्पयोजप्रभः,
संसेव्यः कलिकालजातमनुजैर्योभूतले भावतः ।
सद्योयः स्मृतमात्र एव सुखदः कैवल्यदः सर्वदा,
श्रीसिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ ७ ॥

यन्माहात्म्यसमाहृतः समजुषः शान्ताः समे संयताः,
साध्व्यः साधुगणाश्च शर्मकलिताः श्राद्धाः कुटुम्बान्विताः ।
यत्पद्यां न परित्यजन्ति गुणिनः पादं यथा सद्गुरो-
स्तं सिद्धाचलमानमामि गुणतः सर्वज्ञराजिश्रितम् ॥ ८ ॥

श्रीसिद्धाचलसंस्तुतिं वरतमां यो ना त्रिसन्ध्यं पठेत्,
शुद्धाचारसमायुतः शिवपथप्रेप्सी सतां शोभनः ।
सोऽक्लेशेन भवं भयोज्झितमनास्तीर्त्वा विपद्दायिनं,
भुक्त्वाऽनन्तसुखं क्रमेण शिवगः संजायते धर्मवित् ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ श्रीतारङ्गतीर्थाष्टकम् ॥

लोकालोकविभासकं विभुगुणं भासा जगद्द्योतकं,
शान्ताकारमनन्पवीर्यजलधिं जलजेक्षणं मोक्षदम् ।
प्रत्यक्षीकृततत्त्वराशिमनिशं स्वात्मस्वरूपस्थितं,
तारङ्गाऽजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ १ ॥

आत्मानन्दनिमग्नमक्षयसुखोत्पत्तेर्निदानं परं,
मायातीतमभेद्यभेदकधियं ज्ञानामृतेनाणुना ।
संसारोदधिसेतुसारमचलं निर्भेदकं कर्मणां,
तारङ्गाजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ २ ॥

संसारोदधिमग्नतापशमकं निर्मायिकोदन्तकं,
भव्याब्दव्रजसहस्ररश्मिमनघं सिद्ध्यास्पदे संस्थितम् ।
हन्तारं निजपादपद्मनिरतानां कर्मणां सर्वदा,
तारङ्गाऽजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ ३ ॥

केनाऽप्यत्र न जीयतेऽजितविभुर्विज्ञायतेऽसौ ध्रुव-
मन्वर्थं विदधान एष विमलां संज्ञां सदा राजते ।
तं देवासुरपन्नगेन्द्रमहिताऽङ्घ्र्यब्जाणुकं पारगं,
तारङ्गाजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ ४ ॥

नानादेशसुपत्तनागतमहासङ्घस्य सन्तारकं,
संसाराऽनलतप्तभूरिमनुजक्षेमाय शीताम्बुदम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दारिद्र्यं दलयन्तमिष्टमनसां संपूजकानां सदा,
तारङ्गाऽजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ ५ ॥

द्वात्रिंशत्पृथिवीविभिन्नमतुलप्रोद्दामशृङ्गोच्छ्रितं,
दीव्यं धाम समाश्रयन्तमचलं नाकीन्द्रसंपूजितम् ।
संगीतत्रिजगद्यशोभनमनन्तानन्दसन्दोहकं,
तारङ्गाजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ ६ ॥

प्रालेयाऽचलवद्विपत्तिसमये स्थैर्यं परं चेतसि,
संधृत्यान्यजनोपकारकरणे निर्व्याजबद्धादरम् ।
सिद्धान्तोक्तनयार्थतत्त्वनिचयं वक्तारमिद्धास्पदं,
तारङ्गाजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ ७ ॥

मानुष्यं सफलं तनोति मनुजो यत्पादपद्माऽर्चनं,
वाक्कायेन हृदा विधाय नितरां निर्धूतपापव्रजः ।
संसारोदधितारकं शुभगुणश्रेणीप्रदं तं वरं,
तारङ्गाजितनाथदेवमनिशं वन्दे मुदा मोक्षदम् ॥ ८ ॥

तारङ्गाजितदेवताष्टकमिदं कर्माष्टकष्टच्छिदं,
संसारार्णवशोषकं गुणगणानुच्चान् ददद्धीमताम् ।
यो नित्यं प्रपठत्यथो स्मरति वा श्रुत्वाऽऽवश्यं भुवि,
सोऽयं याति परं पदं क्रमतया शुद्धस्वरूपं भजन् ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीमल्लिनाथाष्टकम् ।

प्रभुं प्राणनाथं विभुंविश्वनाथं,
सदानन्दभाजं परानन्दपुंजम् ।
भविष्यद्भवद्भूतकालोपसन्नं,
सदा मल्लिनाथं जिनेशं नमामि ॥ १ ॥

गलेऽनर्घ्यरत्नावलीं सन्दधानं,
सुजात्याङ्गदोद्दीप्तबाहुप्रकाण्डम् ।
सदा मौकटोद्भासमानोत्तमाङ्गं,
सदा मल्लिनाथं जिनेशं नमामि ॥ २ ॥

मुदा माकरं भूषणं भूषयन्तं,
महोमण्डलं मण्डनामण्डिताङ्गम् ।
अनाधिं ह्यपारं महामोहमारं,
सदा मल्लिनाथं जिनेशं नमामि ॥ ३ ॥

उदीच्याननं पावनं राजमानं,
महापापनाशं सदा सुप्रकाशम् ।
गताशं मुनीशं सुरेशं महेशं,
सदा मल्लिनाथं जिनेशं नमामि ॥ ४ ॥

शरच्चन्द्रगात्रं गुणानन्दपात्रं,
पवित्रं चरित्रं सदा यस्य चित्रम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जनाः कीर्तयन्त्यत्र सर्वत्र मोदात् ,
सदा मल्लिनाथं जिनेशं नमामि ॥ ५ ॥

सुनासं विभासन्ततिक्रान्तवक्त्रं,
कलत्रं खनित्रोपमं दर्शयन्तम् ।
गुणग्रामसंवर्द्धयित्रीं भ्रकूटिं,
सदा मल्लिनाथं जिनेशं नमामि ॥ ६ ॥

निरङ्कुष्टकुंभांकमाबिभ्रतं तं,
समन्तान्नृवन्दोपरिव्याप्तकान्तिम् ।
विमानं सदानन्तशान्तस्वभावं,
सदा मल्लिनाथं जिनेशं नमामि ॥ ७ ॥

अखण्डं सखण्डं नतानुद्धरन्तं,
भवारण्यदावानलं भावनाऽलम् ।
निरीशं निरीहं निधिं निर्विकारं,
सदा मल्लिनाथं जिनेशं नमामि ॥ ८ ॥

स्तवं यः प्रभाते जिनेशस्य मल्लेः,
पठेत्सर्वदा तीर्थभावाऽनुरक्तः ।
धनं धान्यसंपत्तिमासाद्य विद्यां,
सुहृद्यां परं मोक्षशर्म प्रयाति ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# (श्रीपानसर) श्रीमहावीराष्टकम् ।

( पञ्चचामरच्छन्दः )

समस्तमर्त्यभूतलं प्रशामितं जराभया-
दिदुर्ग्रहैः प्रपीडितं सुतप्तलोहबिम्बवत् ।
निमेषमात्रवीक्षणेन येन मे तथाविधे,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ १ ॥

स्वकीयधामराशिभिः सह प्रगुप्तनर्मणि,
कृतान्तकालदुष्टकामभीतिहारिणि प्रभौ ।
करालसिंहनिर्दयप्रजेशवञ्चनेच्छया,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ २ ॥

सदोदितेपि रागमोहजेतरि प्रभाविनि,
कुदृष्टिमोहतामसाभिभूतचेतसां सदा ।
अलक्ष्यभूतभूतिशालिशान्तमूर्तिके मम,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ ३ ॥

न चान्तमध्यसादिभेदभावना प्रकल्प्यते,
विराजमानकर्मशेषजातयत्कलेवरे ।
सतां मते परोपकारकारिमानसे मम,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ ४ ॥

सुपानसेरपत्तने चिरन्तने धनेश्वरैः,
समाश्रिते कलानिधानधीधनैश्च भोगिभिः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृपालुना प्रकाशिताऽधुना यकेन सत्यता,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ ५ ॥

कलाविहारके महाप्रचण्डपञ्चमारके,
विपत्तिमुक्तिमिच्छतामदीर्घजन्मिनां विभो ! ।
प्रकृष्टपुण्यसंश्रयेन दर्शनं तवेष्टदं,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ ६ ॥

तदेतदद्भुतं विभो ! नवीनभित्तिभाजनं,
गृहीतमाश्रयात्मकं त्वया नृणां महालघु ।
सुविस्मयं दृढं चिकीर्षितुं कलानिधे ! मम,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ ७ ॥

परम्पराश्रुतेन कृष्टमानसा महाजनाः,
स्वकीयसन्ततिव्रजेन सार्द्धमाशुदर्शनम् ।
प्रभो ! त्वदीयकं सुचिन्तयन्त आव्रजन्ति मे,
मनोविनोदमद्भुतं बिभर्त्तु वीरनायके ॥ ८ ॥

इदं तु दुष्टकर्मकष्टनाशकं महाष्टकं,
गुणाऽप्रमेयकीर्त्तिजातकस्य शस्यतेजसः ।
प्रवीरतीर्थनाथकस्य ये नरा गृणन्ति ते,
भुवि न वै विलोकयन्ति दुर्गतिं कदाप्यहो ! ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ श्रीमद्गौतमस्वामिस्तोत्रम् ॥

श्रीगौतमस्तोत्रमुदारभावं, विरच्यते सिद्धिवितानमूलम् ।
वचस्विनां संस्मरणीयतत्त्वं, प्रातः सदा शुद्धिविधानदक्षम् ॥१॥

व्यभूषयद् गोवरपत्तनं यो, माता यदीया पृथिवी सुशीला ।
पिता यदीयो वसुभूतिविप्र–स्तमिन्द्रभूतिं गणिनं नमामि॥२॥

श्रीवाडवज्ञातिनभोमणिर्यो, वेदान्तविद्यासु महाप्रवीणः ।
यज्ञादिकार्येषु सदाऽनुरक्तो-व्यस्तारयद्दिक्षु गुणान् स्वकीयान्॥३॥

येनात्मवंशोन्नतिरुन्नतेन, सतां मतेनोच्चगुणालयेन ।
तेने महानन्दमयेन शस्त–व्रताऽनुयोगेन दयामयेन ॥ ४ ॥

सर्वंसहानाथनतक्रमेण, क्रमेण लूनाऽखिलविघ्नकेन ।
येन क्रियाकाण्डरतेन भूति–र्वव्रे जगद्विस्मयदानदक्षा ॥ ५ ॥

योऽदीनभावः शुभभावनाभि–र्विद्यावतां पूज्यमहाप्रभावः ।
विस्तारयामास गुणानुवादी, ग्रन्थाननेकाञ्जिनवर्त्मगामी॥ ६ ॥

विभावितात्माऽनुभवः सुयोगी,प्रशस्तलब्धिप्रथितप्रभावः ।
योऽधारयन्मुख्यगणाऽऽधिपत्यं,जिनेशितुः पादसरोजसन्निधौ७

संपादिताऽनेकमहर्द्धिको यः, संपादयामास मनोऽर्थितानि ।
नानाविधान्यद्भुतलब्धियोगा–च्चारित्रसाम्राज्यविभासितानाम् ८

वसुन्धरा रत्नवती बभूव, यज्जन्मना शान्तिनिकेतनेन ।
प्रभाविनांहिप्रभवोऽत्रलोके, लोकोपकाराय बुधैः प्रदिष्टः ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यो भूरिभाग्योपचयेन भूमौ, विभूतिसारे वसुभूतिगेहे ।
क्रीडाविलासं विमलं विधातु-मियेष धर्मप्रथनाऽभिलाषः॥१०॥

सुराऽसुरेन्द्रस्पृहणीयशील-आजन्मनः श्लाघ्यगुणाऽनुवादः ।
तत्त्वोपदेशेन समुद्धरन् यो-वृन्दं जनानां प्रबभौ नतानाम् ॥११॥

प्रशासको दुर्नयमानवानां, निवारकोऽधर्ममतोद्यतानाम् ।
प्रभावको यो हि बभूव धर्म-तत्त्वस्य भेत्ता भवबन्धनस्य ॥१२॥

यः पुण्डरीकाऽध्ययनं ततान, तेनैव संबोधयति स नम्रम् ।
तिर्यङ्महाजृम्भकलोकपालं, गुणाऽनुरक्तं गणभृद्वरेण्यः। १३॥

योऽष्टापदं तीर्थवरं स्वशक्त्या, तपस्विनां विस्मयमादधानः ।
तीर्थङ्करध्याननिमग्नचेता-गत्वा महानंदमियाय योगी ॥१४॥

अष्टापदं दीव्यगिरीन्द्रमेतुं, तपस्विनः केचन बद्धकक्षाः ।
तथाऽपि तद्दर्शनमेव तेषां, जातं न पूर्वाऽर्जितकर्मदोषात्॥१५॥

योऽष्टापदं याति धराधरेन्द्रं, तस्मिन् भवे मोक्षगतिं स याति ।
दीव्योक्तिमित्थं हि निशम्य वीर-गिराऽतिहृष्टः प्रययौ गिरिं तम्॥

अष्टापदं निर्जरराजशैल-मासाद्य लोकोत्तरसम्पदाढ्यम् ।
सुराऽसुरेन्द्रप्रथितप्रभावं, स्वतेजसा निर्जितभानुमन्तम् ॥१७॥

मुमुक्षुमुख्यायतनं विभान्तं, दिगन्तविश्रान्तविभावितानम् ।
तीर्थङ्कराणां प्रणतिं विधाय, स्तुतिं व्यधत्त प्रगुणां स भक्त्या
॥ १८ ॥ युग्मम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधाय प्रीत्योत्कटचैत्यवन्दनं, प्रदक्षिणीकृत्य जिनेन्द्रराजिम्
मेने निजं जन्म कृतार्थमिन्द्र–भूतिः समुन्मूलितकर्मराशिः १९

अथाऽऽप्तसर्वस्व इवाऽतिहृष्टः, पूर्णात्मकामश्च विभुप्रभावात् ।
स्मरन्गुणाँस्तीर्थकृतां स भव्या–नवातरद् भूरिमुदा गिरीन्द्रात्

तीर्थप्रभावेण पवित्रिताऽऽत्मा, ज्ञानप्रभाभासुरदीव्यदेहः ।
अक्षीणलब्धिप्रथितप्रभावो, निवर्त्तमानः स महानुभावः॥२१॥

उ
वद्न्यंभ्रवोणेन्दुमितांस्तपस्विनः,प्रपेदिवान् ध्याननिमग्नचेतसः।
मार्गस्थितान् गन्तुमशक्तदेहा–नष्टापदं तीर्थकृतां दिदृक्षया२२

तपःप्रभावेण विराजमाना–स्त्यक्ताऽशना निर्मलचित्तभावाः ।
स्थिराशयास्तत्र यियासवस्ते, सर्वे हि वाञ्छन्त्यनुकूललाभम्२३

समीक्ष्य तत्तापसवृन्दमारा–द्गुतीन्द्र इष्टार्थविधानदक्षः ।
सभाजितस्तैर्निजदृष्टिलक्षै–स्तस्थौ क्षणं तत्र परोपकृत्यै ॥२४॥

महामहिम्नां वरमास्पदं यो, निदानमेकं सुखसम्पदानाम् ।
नानाऽर्थलब्धिप्रभवो बभूव–प्रत्यक्षमूर्त्तिः शुभभावनानाम् २५

योऽपूरयत्कामितमङ्गभाजां, चिन्तामणिश्चिन्तयतामिवाशु ।
विघ्नौघकाराङ्गणसेविनश्च, निजप्रभावेण चकार मुक्तान्॥२६॥

यो दीव्यलब्धिप्रथितः पृथिव्यां, समुद्धारेह दयार्द्रचेताः ।
धर्मक्रियादीनमतीनतीता–नतिप्रवीणान् भवतापतप्तान्॥२७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योऽक्षीणलब्धिप्रचितस्वभावः,श्रियाऽक्षयाऽऽनन्दविभू-
षिताङ्गया ।
नित्यं समासेवितपादपद्मः, सम्यक्प्रभाभावितमानसो हि ॥२८॥

यन्नामाक्षरकीर्त्तनेन मनुजाः प्रातर्मनोवाञ्छितं,
सेवन्ते निखिलापदो विषसमा व्यावर्त्तयन्ति क्षणात् ।
प्रत्यक्षं कलयन्ति दुर्लभतरं वस्तुप्रकाण्डं परं,
दुष्टग्राहसमाकुलं जलनिधिं पश्यन्ति कासारवत् ।२९।

यदीयनामस्मरणेन नूनं, नश्यन्ति भूतादिमहोपसर्गाः ।
रुजार्जिताःस्वर्गसमानदेहा—दुःस्वप्नभाजोऽपि शुभान्विताः स्युः।

यदीयनाम्नि स्मृतिगोचरं गते,व्यालः करालः सुममालिकायते
विरोधिवर्गः शुभकिङ्करायते, पञ्चाननौघः स्वयमाविकायते ३१

स्मरन्ति यन्नाम विभातकाले, महाशया ये शिवभूतिकामाः।
तेषां न दारिद्र्यपिशाच ईशः, पराजयं कर्त्तुमनर्थमूलः ॥३२ ॥

मेधाविनो ये स्मृतिमानयन्ति, यन्नाम सद्भूतिविधानदक्षम् ।
व्रजन्ति ते मङ्गलमालिकाश्च, परत्र संपत्तिमखण्डितां वै॥३३॥

अजितसागरसूरिविनिर्मितां, प्रथितपुण्यमयीं सुखशेवधिम् ।
पठति यः स्तुतिमाद्यगणेशितुः, स लभते शिवशर्म निरामयः ३४

गौतमस्वामिनः प्रातः, स्मरणं मङ्गलप्रदम् ।
सोपानं स्वर्गसम्पत्ते—र्मोक्षशर्मनिकेतनम् ॥ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## । गुरुगुणगीतम् ।

। कव्वाली ।

महानन्दं निरानन्दं, निराकारं निराबाधम् ।
सुखाकारं चिदानन्दं, पदं शुद्धं सदाऽभीष्टम् ॥
क्रियाकाण्डं समभ्यस्तं, तपस्तप्तं त्रिधा गुप्तम् ।
नरामरनाथसंभुक्तं, पदं मनसाऽपि नो क्लृप्तम् ॥
प्रभो ! बुद्ध्यब्धिसूरीश ! स्मरामि त्वत्पदाम्भोजम् ॥ १ ॥

भजनमैकान्तिकं कान्तं, निरारम्भं जनानन्दम् ।
विशालं लालितं तावत्, कृपासिन्धुव्रतीशेन ॥
सदा सूरीन्द्रतातायिन्! महायोगीन्द्रपदधारिन्! प्रभो! ।२॥

कुबोधारे ! विमोहारे ! भवभ्रान्तिक्रमच्छिन्न !
रचिततत्त्वाकरग्रन्थ ! सदागमसारनिर्मन्थ !
परापरभेदतात्यागिन् ! निरंजनदेवतारागिन् ! । प्रभो ! ।३।

क्षमाधारिन् ! गुणाचारिन् ! प्रतापिन् ! बालब्रह्मचारिन् !
महायोगिन् ! पराभासिन् ! सुभाषितसारताधारिन् !
धराधीशप्रजापाविन् ! विपच्चारित्र्याकारिन् ! । प्रभो ! ४

मणीमोतीलल्लुवाडी–समेतो वीरचन्द्रश्च ।
गुणानन्दे रता मोहन,–जीवनमुख्या महाभक्ताः ॥
कृतार्थं मन्वते जन्म, स्वकीयं सर्वदा भक्त्या ! । प्रभो ! ५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगज्जीवास्त्वनेकेऽपि, भवद्वाणीसुधासिक्ताः
भवापत्तिं घणात्तीर्त्वा, महानन्दाऽऽलये रक्ताः।
कृताः केऽपि त्वया मुक्ता-महामारीभयाद् भक्ताः॥प्रभो !॥

मधुपूर्यां जिनाधीश-महासौधान्तिके रम्यम्,
सुघण्टाकर्णवीरस्य, निकामं मन्दिरं शुभ्रम्।
विभाति त्वत्कृपालेशात्, सदा दीपप्रभादीप्तम् ॥प्रभो !७।

कियन्तो देशवासिनः, समासाद्य प्रकटबोधम्,
भवच्चरणाम्बुजासन्ना-महासंसारपारीणाः।
विभान्ति प्रेमसंबद्धाः, स्वपरपक्षाश्रिता लोकाः ॥प्रभो! ॥

जननमरणापहो लोके, त्वदन्यो दृश्यते नैव,
इदानीं कं गमिष्यामः ! शरण्यं तत्त्वजिज्ञासुः।
मुनीनां मण्डलं शून्यं, विभाति त्वद्विभाहीनम् ॥ प्रभो ! ॥

सुधासारां भवद्वाणीं, कृष्णगीतामयीं पीत्वा,
सदा शाश्वतसुखाऽऽगारं, प्रयाताः संसृतेः पारम्।
विशुद्धं चित्रचारित्रं, त्वदीयं सिद्धसुखामित्रम् ॥
अजितसूरिकृतं स्तोत्रं सदा बुद्धिप्रदं भवतु॥ प्रभो ! ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## । श्रीसद्गुरुस्मरणम् ।

। स्रग्धरावृत्तम् ।

श्रीमन्तं ज्ञानवन्तं विशदमतिमतां संमतं चारुमूर्त्तिं।
सौभाग्यैकप्रधानं प्रवरसुखपदं सर्वशास्त्रप्रवीणम् ॥
शुद्धाऽऽनन्दप्रकाशं विबुधजनवरं कर्मभूमीखनित्रं,
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुवि जनाः ! सद्गुरुं
दीव्यरूपम् ॥ १ ॥

अठ यक्तार्थप्रबोधं प्रमथितमदनं धर्मतत्त्वप्रधानं ।
विद्योद्यानाऽम्बुसेकं समधिगतसुखं साधिताऽर्थप्रमाणम् ॥
साक्षित्ताऽऽनन्दगेहं जननमृतिहरं मृत्युपारं प्रयातं ।
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुविजनाः ! सद्गुरुं
दीव्यरूपम् ॥ २ ॥

रे रे ! भव्यात्मलोकाः ! श्रयत पदयुगं यस्य सिद्धान्तभाजो—
मोक्षस्वर्गार्थदायं विविधसुखमयं सर्वसम्पच्छ्रितस्य ॥
छिन्नाऽनर्थप्रतानं कविकुलतिलकं भूरिलोकप्रणीतं,
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुविजनाः ! सद्गुरुं
दीव्यरूपम् ॥ ३ ॥

श्रीमद्विद्यापुरस्था नरयुवतिगणा बोधपीयूषसारं,
पीत्वा पीत्वा निकामं सुखरतिमगमन् दिक्षु लोकाश्च यस्य।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोकालोकप्रभावं सदतुलविभवं सिद्धिशर्मैकधाम ।
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुविजनाः ! सद्गुरुं
दीव्यरूपम् ॥ ४ ॥

गीता गीतार्थयुक्ता श्रितनिगमनया येन सा कृष्णगीता ।
विद्वद्वर्येण सारा विलसति वसुधामण्डले मोदमाला ॥
योगाङ्गज्ञानवित्ता सुरचितघटना भिन्नकर्मप्रभावा ।
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुवि जनाः ! सद्गुरुं
दीव्यरूपम् ॥ ५ ॥

दर्शं दर्शं प्रभावं भवदभयहरं यस्य सूरीश्वरस्य ।
श्रावं श्रावं यदीयां भजनविरचनां निर्ममत्त्वार्थबोधाम् ॥
स्मारं स्मारं च शैलीं गुणगणविदितां तुष्टिमन्तः समस्तां,
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुविजनाः ! सद्गुरुं
दीव्यरूपम् ॥ ६ ॥

सारं सारस्वतं यो मनसि कलितवानद्वतं शुद्धबुद्ध्या ।
न्यायं नव्याऽनवीनं स्मृतिविषयम(लं)रं चक्रिवानेकभावः ॥
वेदान्तं वेदसारं भजनपदतया व्याबृणोदद्धतार्थं ।
बुद्ध्यब्धिं सूरिवर्यं स्मरत भुविजनाः ! सद्गुरुं
दीव्यरूपम् ॥ ७ ॥

भूतानां भूरिभाग्याद् गुरुगुणनिलयं यं धरन्ती धरित्री ।
रत्नाढ्या कीर्तितेयं जनहृदयहरं कल्पवल्लीप्रभावम् ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दैवं सर्गं प्रपन्नस्तदखिलजनताऽभाग्यमेवाधुनाऽसौ ।
बुद्धयब्धि सूरिवर्यं स्मरत भुविजनाः ! सद्गुरुं
दीव्यरूपम् ॥ ८ ॥

---

## । गुरुविरहाष्टकम् ।

। ललितच्छन्दः ।

भवभयार्तिहं ते पदाम्बुजं, भुवि सुदुर्लभं सूरिपुङ्गव ! ॥
गुरुकृपानिधे ! बुद्धिवारिधे !, वितर दर्शनं कामदं वरम् ।१।

स्मरणमुत्कटं ते मुनीश्वर !, प्रवरशर्मदं भक्तवल्लभ ! ॥
वरद ! विश्वतस्तारकोत्तम !, वितर दर्शनं कामदं वरम् ॥२॥

कलिमलापहं भद्रकीर्त्तनं, तव विभो ! चितौ क्षीणकर्मणः ॥
श्रुतमहोदधेस्तत्त्ववेदक !, वितर दर्शनं बुद्धिवारिधे ! ॥ ३ ॥

तव विभूतयः सर्वतः स्थिता–मतिमतां मनःसद्मनि प्रभो !।
कलयितुं न कोऽप्यस्ति ताः क्षमो–वितर दर्शनं बुद्धिवारिधे ! ।४।

तव समाधिना नाथ ! केवलं, शयनभाङ्गिनो दुर्भगाः खलु ॥
विधिवशादिदं जातमक्षमं, वितर दर्शनं बुद्धिवारिधे !॥ ५ ॥

विशदभूतिमाँल्लौकिको गण–स्तव गुरो ! वचःसंपदा सदा ॥
तदपि तावकं दर्शनं वरं, नहि जनः प्रभो ! विस्मरत्यहो॥।६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मधुमतीजनक्षेमदायक !, विविधतत्त्वतोगीतगायक !
विगतमन्युना संघपालक !, तव गुरो ! शुभं दर्शनं सदा ! ॥७॥

भवति शोभनस्त्वद्गतो जनो–निखिलसिद्धिभाग् दुर्गतस्तथा ॥
परमभावतः प्रेमभाजन ! वितर दर्शनं बुद्धिवारिधे ! ।॥८॥

भवारण्ये भ्रान्ता–जननमरणव्रातविधुरा–
अनेके संयाता–ध्रुवपदमखण्डात्मविभवाः ।
अयं ते सद्भावः, समजनि महामोदजनक–
इदानीं स्वर्यातः, किमु गुरुवर ! क्षेमसदन ! ।९।

## । गुरुस्मरणाऽष्टकम् ।

। वसन्ततिलका ।

सच्चित्सुखाऽऽस्पदमनन्यगुणानुहारी,
सौराष्ट्रराष्ट्रजनतापरिपुप्रहारी ।
निर्मानमोहभवभीतिरघापहारी,
सूरीशबुद्धिजलधि–र्भुवि तापहारी ॥ १ ॥

दीव्यात्मशक्तिरविणा हृदयावरूढं,
गाढांधकारमखिलं भवता निरस्तम् ।
विज्ञानवास ! कुमताऽध्वनिवारकस्त्वं,
रिक्ता त्वयाद्य वसुधाऽधिविराजते नो ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वागमार्थविदखण्डितबोधगेहं,
विद्यापुरस्थजनमङ्गलहेतुराद्यः ।
अद्याऽमरेन्द्रपुरवासमनुप्रपन्नः,
शून्यं विभाति जगदिष्टगुरो ! समस्तम् ॥ ३ ॥

श्रीसूरिपुङ्गव ! विभो ! जनसंशयानां,
छेत्ताऽधुना न सुलभः समतानिधानः ॥
कं ज्ञानिनं समधिगम्य मनोऽभिलाषं,
पूर्णीकरिष्यति वचःसुधया जनोऽयम् ॥ ४ ॥

विद्यावतां व्रतजुषां स्पृहणीयशीलः,
शीलाङ्गभारवहनेऽतिधुरन्धरश्रीः ।
अध्यात्ममण्डलविभावक आत्मनिष्ठः,
सूरीशबुद्धिजलधिः स्वदशां प्रयातः ॥ ५ ॥

आनन्दमूर्त्तिरखिलागमसारवेदी,
विज्ञातदर्शनमतो मतभेदभिन्नः ।
संप्राप्तपण्डितपदः कविराजराजः,
सूरीशबुद्धिजलधिःस्वगतिं प्रपन्नः ॥ ६ ॥

श्रीवीरशासनमिदं रुचिरं विभाति,
यद्वाग्विलासविभवेन सुविस्तृतेन ।
यत्पादपङ्कजरतिः शुभदा नराणां,
सूरीशबुद्धिजलधिः स्वगतिं प्रयातः ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्री सद्गुरो ! मतिसुधाकर ! तावकीनं,
पादारविन्दमतुलं सततं स्मरामि ।
नान्यन्मदीयशरणं कलयामि सूरे !
संसारतारक ! विभो ! भवपारगामिन् ? ॥ ८ ॥

दिव्यात्मशक्ति सुरपादपकल्पमेतद्-
गुर्वष्टकं स्मरति यः कलिदोषदुष्टः ।
निर्मृष्टकर्ममल आत्मिकधर्मरक्तः,
स क्षिप्रमुन्नतमतिः प्रतियाति सिद्धिम् ॥ ९ ॥

सूरीश्वरेण सुधियाऽजितसागरेण,
संगीतमेतदनपायसुखप्रदायि ।
गुर्वष्टकं गुरुगुणानुविधानदक्षं,
स्मर्तुः सदा सुखकरं कलिकालमध्ये ॥ १० ॥

## समाप्तम्

---

# श्रीमद्-हरिभद्रसूरीश्वरगुणाष्टकम्.

( भाराक्रान्ता वृत्तम् )[1]

येन क्षेमं सकलजनताविचिन्तितमाहितं,
तत्त्वार्थेन प्रकटितगुणं विभासितवस्तुना ।

---

१ "भाराक्रन्ता मभनरसला गुरुः श्रुतिषड्हयैः ॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धात्मानं श्रुतमतिनिधिं गुरुं हरिभद्रकं,
सूरीशं तं शुभगुणयुतं नमामि गुणोदधिम् ॥ १ ॥

( मन्दाक्रान्ता वृत्तम् )

सम्पन्नार्थं शुभपदगतं शुद्धतत्त्वाऽवबोधं,
तत्त्वज्ञानां सततसुखदं पूजनीयक्रमाऽब्जम् ।
सद्भव्यानां भवभयहरं केवलं शान्तमूर्त्तिं,
नन्नम्येऽहं विदितविभवं हारिभद्रं मुनीन्द्रम् ॥ २ ॥

मिथ्यातत्त्वप्रबलतमसां भेदने भानुमन्तं,
मिथ्यामोहक्षुभितमनसां मोदने यत्नवन्तम् ।
संसाराऽब्धौ विषयविषमे मज्जतां तारकं तं,
वन्दे नित्यं सकलसुखदं हारिभद्रं मुनीशम् ॥ ३ ॥

जैनो धर्मः प्रवचनमयो येन संपादितोऽलं,
शास्ता धर्मं सुनयविकलप्राणिनां यो विशुद्धम् ।
सद्भावानामुचितसरणीमादिशन्तं तमीशं,
ध्यायामि श्रीविभवनिलयं हारिभद्रं मुनीन्द्रम् ॥४॥

चक्रे येन प्रशममतिना ग्रन्थवारो वरिष्ठः,
येनोद्दध्रे जिनमतिगणो दुर्विपाकादनन्तात् ।
छित्त्वा पाशं मदनविषयं यो विशुद्धाशयोऽभूत्,
वन्दे भूयः प्रशमविभवं हारिभद्रं यतीन्द्रम् ॥५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुप्रापेयं शिवपदगतिर्येन चक्रे स्वभावाद् ,
दुष्प्रेक्ष्योऽयं प्रवचनमहासागरो येन दृष्टः ।
दुर्वारेयं कुमतिवनिता वारिता येन सद्यः,
तं सूरीशं भजत सततं हारिभद्राऽभिधेयम् ॥ ६ ॥

ज्ञानागारं प्रथितविभवं छिन्नदारिद्र्यजालं,
लीनं स्वान्तं जिनवरपदे पुण्यसद्भावहेतौ ।
योगाङ्गानां प्रथनपटुताधारकं सुप्रसिद्धं,
सूरीशं तं स्तुतिविषयतां हारिभद्रं प्रकुर्वे ॥ ७ ॥

येनाख्यातः प्रविदितदयाधर्म एषोऽत्रलोके,
येन त्राता सकलजनता दुर्गतौ या पतन्ती ।
येनाऽऽक्रान्ता जलधिवसना निर्निमित्तोपदेशाद् ,
वन्दे नित्यं विबुधविनतं हारिभद्रं यतीन्द्रम् । ८ ॥

मोहाधीनं जगदतिदयः संनिरीक्ष्य क्षमी यः,
तत्क्षेमाय क्षपितविकथो बद्धकक्षः सुलक्षः ।
चक्रे ग्रन्थांल्ललितविषयान्मोहवैरिप्रणाशान् ,
वन्दे नित्यं भविकशरणं हारिभद्रं मुनीन्द्रम् ॥ ९ ॥
सूरिस्तोत्रं मुनिगुणयुतेनाऽजितोदन्वतेदं,
जग्रन्थारं हतकलिमलं मोक्षलक्ष्मीनिशान्तम् ।
श्रोत्राधीनं स्मरणविषयं ये सदा तन्वते तत् ,
सम्पद्यन्ते विदितविभवास्ते सुरेन्द्रादिलक्ष्मीम् ॥१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# ॥ कलिकालसर्वज्ञश्रीमद् हेमचन्द्राचार्य-गुणाष्टकम् ॥

॥ मन्दाक्रान्तावृत्तम् ॥

नित्यानन्दं परमसुखदं ध्येयमूर्त्तिप्रभावं,
ज्ञानागारं भवभयहरं सौम्यतापन्नभावम् ।
शुद्धस्वान्तं सकरुणमतं वन्दकानां सुनावं,
सूरिं ध्याया-म्यहमनुदिनं हेमचन्द्रं मुनीन्द्रम् ॥ १ ॥

कृत्याकृत्यं जिनमतवता-माततानातिशुद्ध्यै,
लोकाऽलोक-प्रथितसुमति-र्योऽनवद्यप्रतापः ।
वैरिव्रातं विमतिसदनं दूरतः संजहार,
सूरीशं तं हृदयकुहरे हेमचन्द्रं स्मरामि ॥ २ ॥

निर्विण्णानां परमशरणं संसृतौ क्लेशराशौ,
भव्यारामं कलिवनदवोत्तापितानां नराणाम् ।
तं देवद्रुं श्रुतिपथगतं चोणिपानामचिन्त्यं,
सूरिं ध्याया-म्यहमनुदिनं हेमचन्द्रं मुनीन्द्रम् ॥ ३ ॥

चोणीपालं जिनमतविदं चक्रिवान्धर्मचक्री,
शुद्धज्ञाना-चुभितमनसं वीरकौमारपालम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यो विद्यानां सकलभुवने सिद्धिदानां प्रणेता,
तं सूरीशं समुदितमना हेमचन्द्रं स्मरामि ॥ ४ ॥

शास्त्रश्रेणीं विविधविषयां यो वितेने विशालां,
सच्चारित्रा–ण्यतिरसमया–न्यद्वितीयानि चक्रे ।
सिद्धान्तानां जिनततिकृतां पारदृश्वाऽवनौ य–
स्तं सूरीशं प्रमदमनसा हेमचन्द्रं भजामि ॥ ५ ॥

नक्षत्रेश–प्रमितवदनं वन्दनीयक्रमाब्जं,
विघ्नव्रात–प्रमथनपटु–स्वच्छमुद्रास्वरूपम् ।
शान्ताशान्तं मनुजपदवीं पूर्णतायै प्रयातम्,
वन्दे भूय–स्तमतुलगुणं हेमचन्द्रं यतीन्द्रम् ॥ ६ ॥

सिद्धक्षोणी–पतिमतिदया–दक्षिणं यश्चकार,
योगाङ्गानि क्षतमलचया–न्याततानाऽतिशुद्धः ।
पीठारूढोऽम्बरतलगतोऽबोधयत्सभ्यलोकान्,
तं सूरीशं सकलहितदं हेमचन्द्रं भजेऽहम् ॥ ७ ॥

वन्द्यैर्वन्द्यः प्रचुरदयया वासितान्तःस्वभावो,
योऽनन्तानामतिशयजुषां संपदां मुख्यभूमिः ।
आविश्वर्के जनसुखकृते सिद्धिमूलश्च सौख्यं,
तं सूरीन्द्रं मननविषयं हेमचन्द्रं प्रकुर्वे ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्री बप्पभट्टिसूरिविरचितम्.

## शारदा-स्तोत्रम्.

( द्रुतविलम्बितम्. )

कमलशालविहङ्गमवाहना, सितदुकूलविभूषणलेपना ।
प्रणतभूमिरुहामृतसारिणी, प्रवरदेहविभाभरधारिणी ॥ १ ॥

अमृतपूर्णकमण्डलुहारिणी, त्रिदशदानवमानवसेविता ।
भगवती परमैव सरस्वती, मम पुनातु सदा नयनाम्बुजम् ॥२॥

जिनपतिप्रथिताखिलवाङ्मयी, गणधराननमण्डपनर्तकी ।
गुरुमुखाम्बुजखेलनहंसिका, विजयते जगति श्रुतदेवता ॥३॥

अमृतदीधितिबिम्बसमाननां, त्रिजगतीजननिर्मितमाननाम् ।
नवरसामृतवीचिसरस्वतीं, प्रमुदितः प्रणमामि सरस्वतीम् ॥४॥

विततकेतकपत्रविलोचने !, विहितसंसृतिदुष्कृतमोचने !
धवलपक्षविहङ्गमलाञ्छिते !, जय सरस्वति ! पूरितवा-
ञ्छिते ! ॥ ५ ॥

भवदनुग्रहलेशतरङ्गिता-स्तदुचितं प्रवदन्ति विपश्चितः ।
नृपसभासु यतः कमलाबला-कुलकलाललनानि
वितन्वते ॥ ६ ॥

गतघना अपि हि त्वदनुग्रहात्-कलितकोमलवाक्यसुधोर्मयः ।
चकितबालकुरङ्गविलोचना-जनमनांसि हरन्तितरां नराः ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करसरोरुहखेलनचञ्चला, तव विभाति वरा जपमालिका।
श्रुतपयोनिधिमध्यविकस्वरो,–ज्ज्वलतरङ्गकलाग्रहसाग्रहा ।८।

द्विरदकेसरिमारिभुजङ्गमा–सहनतस्करराजरुहां भयम्।
तव गुणावलिगानतरङ्गिणां, न भविनां भवति श्रुतदेवते! ।९।

ॐ ह्रीँ क्लीँ ब्लूँ ततः श्रीँ तदनु हसकलह्रीं मथोऐँ नमोऽन्ते।
लक्षं साक्षाज्जपेद् यः करसमविधिना सत्तपा ब्रह्मचारी।
निर्यान्तीं चन्द्रबिम्बात् कलयति मनसा त्वां जगच्चन्द्रिकाभां।
सोऽत्यर्थं वह्निकुण्डे विहितघृतहुतिः स्याद् दशांशेन
विद्वान् ॥ १० ॥

( स्रग्धरावृत्तम्. )

रे रे लक्षण–काव्य–नाटक–कथाचम्पूसमालोकने,
क्वायासं वितनोषि बालिश! मुधा किं नम्रवक्त्राम्बुजम्।
भक्त्याऽऽराधय मन्त्रराजमहसाऽनेनानिशं भारतीं,
ये न त्वं कवितावितानसविताऽद्वैतप्रबुद्धायसे ॥ ११ ॥

चञ्चच्चन्द्रमुखी प्रसिद्धमहिमा स्वाच्छन्द्यराज्यप्रदा,
नायासेन सुरासुरेश्वरगणै रभ्यर्चिता भक्तितः।
देवी संस्तुतवैभवा मलयजालेपाङ्गरङ्गद्युतिः,
सा मां पातु सरस्वती भगवती त्रैलोक्यसंजीविनी ॥ १२ ॥

स्तवनमेतदनेकगुणान्वितं, पठति यो भविकप्रमनाःप्रगे।
स सहसा मधुरैर्वचनामृतै–र्नृपगणानपि रञ्जयति स्फुटम् ।१३।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीतारङ्गातीर्थकोटिशिलास्तुतिः ।

कोटिप्राणिसमुद्धृतौ धृतमहासामर्थ्यसारां वरा-
मुष्णांशुं मिलितुं प्रवृद्धवपुषाऽऽकाशान्तरस्थामिव ।
विज्ञानैकसुगम्यभूरिमहिमानं दूरदृश्यालयां,
सिद्धां कोटिशिलां स्तवीमि नितरां प्रत्यक्षकामप्रदाम् ॥ १ ॥

साध्यं लक्ष्यमनर्थसार्थविकलं मंसाधयद्भिः श्रिता,
कोटाकोटिसुसाधुभिर्विगतभीर्या दीव्यभा अक्षया ।
संप्राप्ताऽमलकेवलैर्गतभयैर्निर्दोषमार्गाश्रितैः,
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥ २ ॥

या दीव्याऽनघसेवनीयकमला विक्षोभसंहारिणी,
कामं कर्मकदर्थनैकविभवा सिद्धश्रिया भ्राजिता ।
भव्यानां सुलभाऽऽत्मबोधविदुषां दुर्लक्षणीयाऽसतां,
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥३॥

यां भव्यामनुप्राप्य नैव विबुधाः संयान्ति जन्मान्तरं,
प्रक्षीणाष्टकुकर्मवैरिसुखदां सर्वोपरिस्थायिनीम् ।
दुर्लक्ष्यां सुरपुङ्गवैरपि सदा क्षेमार्थिनां क्षेमदा,
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥४॥

कर्मक्लेशगणो न याति निकटं यामाश्रितानां पुनः,
सिद्धानां समताजुषां भवमहाम्बुद्धिप्रदः केवलम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूज्याऽपूज्यविचारशून्यमनसामानन्दसत्केतनं.
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥५॥

किं कर्त्तव्यमिति प्रकम्पितमतिर्यत्राऽस्ति नैव कचित्,
कर्माणि क्षपितानि नैव सुतरां भूयश्च लक्ष्याण्यहो ! ।
यस्यां कालगतिः करालभयदा नो वीक्ष्यते संस्थितैः,
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥६॥

कल्याणं प्रतिपद्य ये श्रितदया निःशेषकर्मक्षया-
यत्राद्वैतमये समुन्नतरमे सिद्धे शिलायास्तले ।
राजन्तेऽकलुषात्मसाश्रितगुणा निर्दोषतोऽलङ्कृताः,
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥७॥

श्रीतारङ्गगिरीन्द्रसंस्थितमहोत्कृष्टप्रभाभासुरा,
सिद्धानां सदनं प्रभावविदिता या दृश्यते ज्ञानिभिः ।
योगीन्द्रैरधिगम्यमानमहिमाऽऽनन्दप्रदानक्षमा,
सिद्धां कोटिशिलां स्तवीमि सततं तां सत्यशर्मप्रदाम् ॥८॥

जुष्टा या मुनिकोटिभिः क्रमतया शश्वत्प्रभावाऽप्रमा,
दीव्या देवगणैः सदा स्तुतयशाः सेव्या च विज्ञानिभिः ।
या दृष्टा किल देहिनां कलिमलं प्रक्षालयत्यञ्जसा,
सिद्धां कोटिशिलां स्तवीमि नितरां तां सत्यशर्मालयम् ॥९॥

दुर्वाराणि निरन्तदुःखजनकान्याशु क्षतिं यान्ति वै,
कर्माणि प्रबलानि यस्य पठनात्स्मरणाच्च शुद्धात्मना ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्सङ्गीतमिदं शिलाष्टकवरं कोटिप्रभावं मुदा,
श्रीमत्सूर्यजिताब्धिना गुणवतां मोदाय निर्मायिना ॥१०॥

## ॥ श्रीजिनवरस्तोत्रम् ॥

जिनवर ! तव मूर्त्तिर्मामके मानसाब्जे,
निरयगतिहरं ते नामधेयं मुखे मे ।
अनिशमतुलभक्त्या मस्तकं त्वत्पदाब्जे,
भवजलनिधिमग्नं रक्ष मामार्त्तबन्धो ! ॥ १ ॥

कुरु कुरु मम शान्तिं भावनग्रस्य नाथ !
सृजतु सृजतु लोके शान्तदृष्टिप्रभावम् ।
भवतु भवतु सर्वः स्वार्थसिद्धस्त्वदीयो-
जयतु जयतु कीर्त्तिस्त्वत्पदाम्भोजभाजाम् ॥ २ ॥

जिनवर ! तव मूर्त्तिध्यानतो व्यग्रचेतः,
समुपगतमहो मे शान्तभावं समग्रम् ।
अतिकरुणकटाक्षैर्मां कृतार्थं कुरुष्व,
त्वदभिमतपदाब्जादन्यदेवं न याचे ॥ ३ ॥

तपतु तपतु लोकस्तीव्रभावेन तापैः,
पततु पततु शृङ्गात्पर्वतस्योच्चसंस्थात् ।
वदतु वदतु वादैः श्लिष्टभावैश्च भावै-
स्त्वहमसकृदमेयां मूर्त्तिमाराधयिष्ये ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गणयति यदि कश्चिद्भूमिपांशून्समग्रान्,
तरति दृढभुजाभ्यां कोऽपि पाथोनिधिं वा ।
जलधरगतबिन्दून्कोऽपि संख्याति धीर-
स्तदपि जिनगुणानां नैव पारं प्रयाति ॥ ५ ॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं,
सकलदुरितकक्षावह्निमुत्सर्पिकान्तिम् ।
गुणगरिममहोभीराजमानं समन्तात्,
जिनपतिमनवद्यं संस्तवीमि प्रणम्य ॥ ६ ॥

जिनवर तव बोधिं प्राप्य भूरिप्रतापां,
कृतमपि मतिपूर्वं सन्त्यजाम्यद्य भावात् ।
निजमनसि नवीनं नैवमन्यत्करिष्ये,
दृढमतिरितिजाता मे त्वदङ्घ्रौ नतस्य ॥ ७ ॥

प्रकुपितजनवृन्दस्त्वद्वपुर्वीक्षणेन,
प्रशमरतिमनल्पां सद्यएवाऽभियाति ।
समवसरणभाजः किं पुनस्ते विशालां,
सुजनहृदयकान्तां देशनां कुर्वतो भोः ॥ ८ ॥

इदमतुलगुणानां भाजनं स्तोत्रमिष्टं,
पठति परमभक्त्या शुद्धचेता नरोयः ।
स भवति गुणिपूज्यः क्षीणकर्मा क्रमेण,
शिवपदमभियाति क्षुद्रभावं विहाय ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ श्रीपार्श्वनाथस्तोत्रम् ॥

ॐ नमो भगवते श्रीपार्श्वनाथाय ह्रीँ जुषे
धरणेन्द्रपद्मावती–सहिताय सदाश्रिये ॥ १ ॥

अट्टेमट्टे तथा क्षुद्र–विघट्टे क्षुद्रमेवहि ।
क्षुद्रान् स्तम्भयस्तम्भय, स्वाहान्तैरेभिरक्षरैः ॥२॥

पद्ममष्टदलोपेतं, मायाङ्कं जिनलाञ्छितम् ।
पद्ममध्यान्तरालेषु, पत्रोपरियथाक्रमम् ॥ ३ ॥

अष्टावष्टौ तथैवाष्टौ, विन्यस्याक्षरमण्डलम् ।
तथाष्टशतजापेन, ज्वरमेकान्तरादिकम् ॥ ४ ॥

रिपुचोरमहीपाल–शाकिनीभूतसम्भवाम्–
अरण्यपशुजांभीतिं, हन्ति बद्धं भुजादिषु ॥ ५ ॥

पुष्पमालां जपित्वाच, मन्त्रेणाष्टजपेन च ।
प्रक्षिप्ता पात्रकण्ठेषु, भूतादीन् स्तम्भयेद्ध्रुवम् ॥६॥

गुग्गुलस्य गुटीनांच, शतमष्टोत्तरं हुतम् ।
दुष्टमुच्चाटयेत्सद्यः, शान्तिं च कुरुते गृहे ॥ ७ ॥

देवस्याऽजितसिंहस्य, नीलवर्णस्यसंस्तवात् ।
लभन्ते श्रेयसीं सिद्धिं. कवयोवाञ्छितैः सह ॥८॥

श्री अश्वसेनपदपङ्कजभास्करस्य,
पद्मावतीधरणराजनिषेवितस्य ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वामाङ्गजस्य पदसंस्तवनाच्छभन्ते,
भव्याः श्रियं सुभगतामतिवाञ्छितानि ॥ ९ ॥

## ॥ श्रीभद्रबाहुस्वामिप्रणीतं–अनेकमन्त्रगर्भितं उपसर्गहरस्तोत्रम् ॥

उवसग्गहरं पासं, पासं वंदामि कम्मघणमुक्कं ।
विसहरविसनिन्नासं, मंगलकल्लाणआवासं ॥ १ ॥

विसहर फुलिंगमंतं, कंठे धारेइ जो सया मणुओ ।
तस्स गहरोगमारी–दुट्ठजरा जंति उवसामं ॥ २ ॥

चिट्ठउ दूरे मंतो, तुज्झ पणामो वि बहुफलो होई ।
नरतिरिएसु वि जीवा, पावंति न दुक्खदोगच्चं ॥ ३ ॥

ॐ अमरतरुकामधेणु–चिंतामणिकामकुंभमाईया ।
सिरिपासनाहसेवा–ग्गहाण सव्वे वि दासत्तं ॥ ४ ॥

ॐ ह्रीँ श्री ऐँ ॐ तुह दंसणेण सामिय ! पणासेइरोगसो-
गदोहग्गं ।
कप्पतरुमिव जायइ, ॐ तुह दंसणेण सव्वफलहेऊस्वाहा ॥५॥

ॐ ह्रीँ नमिऊण विग्घणासय ( विप्पणासय ) मायाबीएण
धरणनागिंदं ।
सिरिकामराजकलियं, पासजिणंदं नमंसामि ॥ ६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ ह्रीँ ( क्लीँ ) सिरिपासविसहर–विज्जामंतेण झाणज्झाएज्जा
धरणपउमावइदेवी, ॐ ह्रीँ क्ष्म्ल्व्र्यूँ स्वाहा ॥ ७ ॥

ॐ जयउ धरणिंदपउमावइयनागिणीविज्जा ।
विमलज्झाणसहिओ, ॐ ह्रीँ क्ष्म्ल्व्र्यूँ स्वाहा ॥ ८ ॥

ॐ थुणामि पासनाहं, ॐ ह्रीँ पणमामि परमभत्तीए ।
अट्ठक्खरधरणिंदो, पउमावइपयडियाकित्ती ॥ ९ ॥

जस्स पयकमलमज्झे, सया वसइ पउमावईय धरणिंदो ।
तस्स नामेण सयलं, विसहरविसं नासेइ ॥ १० ॥

तुह सम्मत्ते लद्धे, चिंतामणिकप्पपायवब्भहिए ।
पावंति अविग्घेणं, जीवा अयरामरं ठाणं ॥ ११ ॥

ॐ नट्ठट्ठमयट्ठाणे, पणट्ठकम्मट्ठनट्ठसंसारे ।
परमट्ठनिट्ठिअट्ठे, अट्ठगुणाधीसरं वंदे ॥ १२ ॥

इअ संथुओ महायस ! भत्तिब्भरनिब्भरेण हियएण ।
ता देव ! दिज्ज बोहिं, भवे भवे पास ! जिणचंद ? ॥ १३ ॥

तुह नामसुद्धमंतं, सम्मं जो जवइ सुद्धभावेण ।
सो अयरामरठाणं, पावइ न य दोग्गइं दुक्खं ॥ १४ ॥

ॐ पंडुभगंदरदाहं, कासं सासं च सूलमाईणि ।
पासपहुपभावेणं, नासंति सयलरोगाइं ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ विसहरदावानल–साइणिवेयालमारिआयंका ।
सिरिनीलकंठपासस्स, समरणमित्तेण नासंति ॥ १६ ॥

पन्नासंगोपीडां, कुरग्गहदंसणं भयं काये ।
आवी न हुंति एए, तहवि तिसंझं गुणिज्जासु ॥ १७ ॥

पीडजंतभगंदर–खासासासूल तहह ।
सिरीसामलपासमहंतनामपऊरपऊलेण । ॥ १८ ॥

ॐ ह्रीं पासधरणसंजुत्तं, विसहरविज्जं जवेइ सुद्धमणेणं ।
पावेई इच्छियसुहं, ॐ ह्रीं श्रीं म्र्ल्व्यूँ स्वाहा ॥ १९ ॥

रोगजलजलणविसहर–चोरारिमइंदगयरणभयाइं ।
पासजिणनामसंकित्तणेण पसमंति सव्वाइं ॥ २० ॥

---

( १ ) अतः परं गाथाचतुष्टयं पठ्यते ।

तं नमह पासनाहं, धरणेंदनमंसियं दुहं पणासेइ ।
तस्स पभावेण सया, नासंति सयलदुरियाइं ॥ १ ॥

एए समरंताणं, मणेणि न दुहंवाहीनासमाहिदुक्खं ।
नामंचियमंतसमं, पयडो नत्थित्थ संदेहो ॥ २ ॥

जलजलणतहसप्पसीहो, चोरारी संभवेवि खिप्पं
जो समरेइ पासपहु, पहवइ न कयावि किंचितस्स ॥ ३ ॥

इहलोगट्ठी परलोगट्ठी, जो समरेइ पासनाहंतु ।
तत्तो सिज्झेइ न, कोसइ (मंति) नाह सुरा भगवंतं । ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीतेजःसागरमुनिप्रणीतं-

## श्रीउपसर्गहरस्तोत्रपादपूर्त्तिरूपं श्रीपार्श्वस्तोत्रम्

उवसग्गहरं पासं, वंदिअ नंदिअ गुणाण आवासं ।
मइसुरसूरिं सूरिं, थोसं दोसं विमुत्तूणं ॥ १ ॥

जहमहमहिममहग्घं, पासं वंदामि कम्मघणमुक्कं ।
तह महगुरुकमजुअलं, थोसामि सुसामि भिच्चुव्व ॥ २ ॥

संसारसारभूअं, कामं नामं धरंति निअहिअए ।
विसहरविसनिन्नासं, भव्वा पुन्ना लहंति सुहं ॥ ३ ॥

सारयससिसंकासं, वयणं नयणुप्पलेहिं वरभासं ।
कुणइ कुकम्मविणासं, मंगलकल्लाणआवासं ॥ ४ ॥

विसहरफुलिंगमंतं, कुग्गहगहगहिअविहिअपुव्वत्तं ।
कुवलयकुवलयकंतं, मुहं सुहं दिसउ अचंतं ॥ ५ ॥

गुरुगुरुगुणमणिमालं, कंठे धारेइ जो सया मणुओ ।
सो सुहगो दुहगो णो, सिवं वरइ हरइ दुहदाहं ॥ ६ ॥

गुरुपायं गुरुपायं, गयरायगइं हु नमइ गयराअं ।
तस्सगहरोगमारी,-सुदुट्ठकुट्ठा न पहवंति ॥ ७ ॥

भूवालभालमउड-ट्ठिअमणिमालामऊहसुइपायं ।
जो नमइ तस्स निच्चं, दुट्ठजरा जंति उवसामं ॥ ८ ॥

चिट्ठउ दूरे मंतो, तुह संतो मज्झ तुज्झ भत्तीए ।
सव्वमपुव्वंसिज्झइ, झिज्झइ पावं भवारावं ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अहवा दूरेभत्ती, तुज्झ पणामो वि बहुफलो होइ ।
संसारपारकरणे, सुजाणवत्तु व्व जाणाहि ॥ १० ॥

दंसणदंसणदं तव, दंसणयं लध्धु (लध्धूण) सुद्धबुद्धीए ।
नरतिरिएसु वि जीवा, गमणं भमणं व न लहंति ॥ ११ ॥

गुरुमाणं गुरुमाणं, गुरुमाणं जेहु दिंति सुगुरूणं ।
ते दुहभवणे भवणे, पावंति न दुक्खदोगच्चं ॥ १२ ॥

तुह सम्मत्ते लद्धे, लद्धं सिद्धीइ सुद्धमुद्धाणं ।
रयणे रयणे पत्ते, जह सुलहा रिद्धिसंपत्ती ॥ १३ ॥

सुहवरणे तुहचरणे, चिंतामणिकप्पपायवब्भहिए ।
लद्धे सिद्धिसमिद्धे, लद्धमसुद्धं तिजयसारं ॥ १४ ॥

सामी ! कामियदायं, नच्चा सुच्चा जिआ तुमं पत्ता ।
पावंति अविग्घेणं, सिग्घमहग्घं कुसलवग्गं ॥ १५ ॥

तिव्वायरेण भव्वा, तुह मुहकमलाउलेहि असम्मत्ता ।
पावंति पावहीणा, जीवा अयरामरं ठाणं ॥ १६ ॥

इय संथुओ महायस ! नियजसकरपयरपाविअसुसोम ! ।
नियमइणो अणुसारा, सारगुणा ते सरंतेण ॥ १७ ॥

तुह सुहपयगयचित्तेण, भत्तिब्भरनिब्भरेणहिअयेण ।
अह देहि मे हिअकरं, सुचरणसरणं निरावरणं ॥१८ ।जुअलं।

बहुरम्मधम्मदेसण–सुणणे थुणणे वि दुलह सम्मत्तो ।
ता देव ! दिज बोहिं, सोहिं कोहिंडह भवंमि ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं सेवंतेणं, तुहसुहगुणकित्तणं मए विहिश्रं ।
ता देसु मे सुकुसलं, भवे भवे पास ! जिणचंद ! ॥ २० ॥

इत्र थुश्रो सुहश्रो गुणसंजुश्रो, ससिगणंबरसुंदरतावणो ।
स उवसग्गहरस्स दलेहि सो, दिसउ तेश्रसुसायरसंपयं ॥२१॥

छाया

उपसर्गहरं पार्श्वं, वन्दित्वा नन्दित्वा गुणानामावासम् ।
मतिसुरसूरिं सूरिं, स्तोष्ये दोषं विमुच्यैव ॥ १ ॥

यथा महोमहिममहार्घं, पार्श्वं वन्दे कर्म्मघनमुक्तम् ।
तथा मम गुरुक्रमयुगलं, स्तोष्यामि सुस्वामिनं भृत्य इव ॥२॥

संसारसारभूतं, कामं नाम धरन्ति निजहृदये ।
विषधरविषनिर्णाशं, धन्याः पुण्याः लभन्ते सुखम् ॥ ३ ॥

शारदशशिसङ्काशं, वदनं नयनोत्पलाभ्यां वरभासम् ।
करोति कुकर्मविनाशं, मङ्गलकल्याणकावासम् ॥ ४ ॥

विषधरस्फुलिङ्गमन्त्रं, कुग्रहग्रहगृहीतविहितपूर्वत्वम् ।
कुवलयकुवलयकान्तं,मुखं सुखं दिशतु अत्यन्तम् ॥५॥युगलम्॥

गुरुगुरुगुणमणिमालां, कण्ठे धारयति यः सदा मनुजः ।
स सुभगो दुर्भगो न, शिवं वृणोति हरति दुःखदाहम् ॥ ६॥

गुरुपायं गुरुपादं, गजराजगतिं खलु नमति गतरागम् ।
तस्य ग्रहरोगमारी–सुदुष्टकुष्ठा न प्रभवन्ति ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूपालभालमुकुट-स्थितमणिमालामयूखशुचिपादम् ।
यो नमति तस्य नित्यं, दुष्टज्वरा यान्त्युपशामम् ॥ ८ ॥

तिष्ठतु दुरे मन्त्र-स्तव सन् मम तव भक्त्या ।
सर्वमपूर्वं सिध्यति, क्षीयते पापं भवारावम् ॥ ९ ॥

अथवा दूरे भक्ति-स्तव प्रणामोऽपि बहुफलो भवति ।
संसारपारकरणे, सुयानपात्रमिव जानीहि ॥ १० ॥

दर्शनदर्शनदं तव, दर्शनकं लब्ध्वा शुद्धबुद्ध्या ।
नरतिर्यक्ष्वपि जीवा-गमनं भ्रमणं च न लभन्ते ॥ ११ ॥

गुरुमानं गुरुमानं-गुरुमानं ये खलु सुददति सुगुरुभ्यः ।
ते दुःखभवने भवने, प्राप्नुवन्ति न दुःखदौर्गत्ये ॥ १२ ॥

तव सम्यक्त्वे लब्धे, लब्धः सिद्धेः शुद्धमुद्धां नु ।
रत्ने रत्ने प्राप्ते, यथा सुलभा ऋद्धिसंप्राप्तिः ॥ १३ ॥

शुभवर्णे तव चरणे, चिन्तामणिकल्पपादपाभ्यधिके ।
लब्धे सिद्धिसमृद्धे, लब्धममुग्धं त्रिजगत्सारम् ॥ १४ ॥

स्वामिन् ! कामितदायं, नत्वा श्रुत्वा जीवास्त्वां प्राप्ताः ।
प्राप्नुवन्त्यविघ्नेन, शीघ्रमहार्घं कुशलवर्गम् ॥ १५ ॥

तीव्रादरेण भव्यास्तवमुखकमलाकुलैरसमाप्ताः ।
प्राप्नुवन्ति पापहीना, जीवा अजरामरं स्थानम् ॥ १६ ॥

इति संस्तुतो महायशो ! निजयशस्करप्रकरप्राप्तसुसोम !
निजमतेरनुसारात्, सारगुणांस्तव स्मरता ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तव शुभपदगताचित्तेन, भक्तिभरनिर्भरेण हृदयेन ।
अथ देहि मे हितकरं, सुचरणशरणं निरावरणम् ॥१८॥युगलम्।

बहुरम्यधर्मदेशन–श्रवणे स्तवनेऽपि दुर्लभं सम्यक्त्वम् ।
तद्देव ! देया बोधिं, शुद्धिं कोहिण्डति भवे ? ॥ १९ ॥

एवं सेवमानेन तव, शुभगुणकीर्त्तनं मया विहितम् ।
तद्दद्दा मे सुकुशलं, भवे भवे पार्श्व ! जिनचन्द्र ! ॥ २० ॥

इति स्तुतःसुखदोगुणसंयुतः, शशिगणांबरसुन्दरतापनः ।
सन् उपसर्गहरस्य दलैः स–दिशतु तेजःसुसागरःसम्पदम् ।२१।

---

## पूर्वाचार्यप्रणीतं पद्मावत्यष्टकम् ।

( स्रग्धरावृत्तम् )

श्रीमद्गीर्वाणचक्रस्फुटमुकुटतटीदिव्यमाणिक्यमाला–
ज्योतिर्ज्वालाकरालस्फुरितमुकुरिकाघृष्टपादारविन्दे ! ।
व्याघ्रोरूल्कासहस्रज्वलदनलशिखालोलपाशाङ्कुशाढ्ये !,
ॐ क्रौं ह्रीं मन्त्ररूपे ! क्षपितकलिमले ! रक्ष मां देवि ! पद्मे ! १

भित्त्वा पातालमूलं चल चल चलिते ! व्याललीलाकराले !,
विद्युद्दण्डप्रचण्डप्रहरणसहिते ! सद्भुजैस्तर्जयन्ती ।
दैत्येन्द्रं क्रूरदंष्ट्राकटकटघटितस्पष्टभीमाट्टहासे !,
मायाजीमूतमालाकुहरितगमने ! रक्ष मां देवि ! पद्मे ॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कूजत्कोदण्डकाण्डोड्डमरविधुरितक्रूरघोरोपसर्गं,
दिव्यं वज्रातपत्रं प्रगुणमणिरणत्किङ्किणीक्वाणरम्यम् ।
भास्वद् वैडूर्यदण्डं मदनविजयिनो बिभ्रती पार्श्वभर्तुः,
सा देवी पद्महस्ता विघटयतु महाडामरं मामकीनम् ॥३॥
भृङ्गीकालीकरालीपरिजनसहिते ! चण्डि ! चामुण्डि ! नित्ये!,
क्षाँ क्षीँ क्षूँ क्षौँ क्षणार्द्धक्षतरिपुनिवहे ! ह्रींमहामन्त्रवश्ये !
ॐ ह्राँ ह्रीँ भ्रूँ भङ्गसङ्गभ्रकुटिपुटतटत्रासितोद्दामदैत्ये !,
श्रूँ श्रीँ श्रूँ श्रौँ प्रचण्डे! स्तुतिशतमुखरे! रक्ष मां देवि ! पद्मे ।४
चञ्चत्काञ्चीकलापे ! स्तनतटविलुठत्तारहारावलीके !,
प्रोत्फुल्लत्पारिजातद्रुमकुसुममहामञ्जरीपूज्यपादे ! ।
ह्राँ ह्रीँ क्लीँ ब्लूँ समेतैर्भुवनवशकरी क्षोभिणी द्राविणी त्वं,
आँ ईँ औँ पद्महस्ते ! कुरु कुरु घटने रक्ष मां देवि ! पद्मे ! ५
लीलाव्यालोलनीलोत्पलदलनयने ! प्रज्वलद्वाडवाग्नि-
त्रुट्यज्ज्वालास्फुलिङ्गस्फुरदरुणकणोदग्रवज्राग्रहस्ते ! ।
ह्राँ ह्रीँ ह्रूँ ह्रौँ हरन्ती हर हर हर हुंकारभीमैकनादे !,
पद्मे ! पद्मासनस्थे ! अपनय दुरितं देवि ! देवेन्द्रवन्द्ये ! ॥६॥
कोपं वं झं सहंसः कुवलयकलितोद्दामलीलाप्रबन्धे !,
ह्राँ ह्रीँ ह्रः पञ्चबीजैः शशिकरधवले ! प्रक्षरत्क्षीरगौरे !,
व्यालव्याबद्धकूटे ? प्रबलबलमहाकालकूटं हरन्ती,
हाहा हूंकारनादे ! कृतकरमुकुलं रक्ष मां देवि ! पद्मे ! ॥७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रातर्बालार्करश्मिच्छुरितघनमहासान्द्रसिन्दूरधूली—
सन्ध्यारागारुणाङ्गी त्रिदशवरवधूवन्द्यपादारविन्दे ! ।
चञ्चच्चण्डासिधारा-प्रहतरिपुकुले ! कुण्डलोद्घृष्टगल्ले ?,
श्राँ श्री श्रूँ श्रौँ स्मरन्ती मदगजगमने ! रक्ष मां देवि ! पद्मे !८
दिव्यं स्तोत्रं पवित्रं पटुतरपठतां भक्तिपूर्वं त्रिसन्ध्यं,
लक्ष्मीसौभाग्यरूपं दलितकलिमलं मङ्गलं मङ्गलानाम् ।
पूज्यं कल्याणमान्यं जनयति सततं पार्श्वनाथप्रसादात् ,
देवी पद्मावतीतः प्रहसितवदना या स्तुता दानवेन्द्रैः ॥ ९ ॥

---

॥ ६० ॥ घंटाकर्णमहावीरमूलमहामंत्रः । ॐ श्राँ क्रौँ ह्रीँ द्राँ द्रीँ चाँ चीँ चुँ चेँ चौँ चः घण्टाकर्णमहावीरक्षेत्रपालाय नमः । ममोपरिप्रसन्नो भव, प्रत्यक्षं दर्शनं देहि वाञ्छितं पूरय २ स्वाहा । मन्त्रन्यासाः ॐ ह्रीँ घण्टाकर्णमहावीर मे सर्वाङ्गं रक्ष, ह्रीँ हृदयं रक्ष, क्लीँ हस्तं रक्ष, ब्लूँ मूलाधारं रक्ष, ह्राँ हस्तं रक्ष, क्रौँ उदरं रक्ष, वाँ पादौ रक्ष, श्रीँ नाभिं रक्ष, झ्रौँ बुद्धिं रक्ष, ॐ घण्टाकर्णमहावीर नमोऽस्तुते ॐ स्वाहा । आह्वानमन्त्रम् । ॐ ह्रीँ घण्टाकर्णमहावीर अस्यां मूर्त्यां आगच्छ आगच्छ तिष्ठ २ सर्वविश्वलोकाहितं कुरु २ पूजां बलिं गृहाण २ धूपं नैवेद्यं पुष्पं दीपं नैवेद्यं गृहाण २ स्वाहा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## श्री घण्टाकर्णमन्त्रः ।

ॐ घण्टाकर्णमहावीर ! सर्वव्याधिविनाशक ! ।
विस्फोटकभयं घोरं, रक्ष रक्ष महाबल ! ॥ १ ॥
यत्र त्वं तिष्ठसि देव ! लिखितोऽक्षरपंक्तिभिः ।
रोगास्तत्र प्रणश्यन्ति, वातपित्तकफोद्भवाः ॥ २ ॥
तत्र राजभयं नास्ति, याति कर्णेजपात् क्षयम् ।
शाकिनीभूतवैताला–राक्षसाः प्रभवन्ति न ॥ ३ ॥
नाऽकाले मरणं तस्य, न च सर्पेण दश्यते ।
अग्निचोरभयं नास्ति, ह्रीँ घण्टाकर्णनमोऽस्तुते ठःठःठः
स्वाहा ॥ ४ ॥

---

## ॐ घण्टाकर्णमहावीरमूलमन्त्रः ।

ॐ क्रौँ ह्रीँ श्रीँ महावीर घण्टाकर्ण ! महाबली ।
महारोगान् भयान् घोरान्, नाशय नाशय द्रुतम् १॥
सर्पादिकं विषं शीघ्रं, जहि जहि विनाशय ।
शाकिनीभूतवैतालान्, राक्षसांश्च निवारय ॥ २ ॥
त्वन्नाममन्त्रजापेन, त्वन्मन्त्रश्रवणेन च ।
भूपभीतिर्महामारी, शीघ्रं नश्यतु मे ध्रुवम् ॥ ३ ॥
यन्त्रस्थमन्त्ररूपेण, यत्र त्वं तिष्ठसि ध्रुवम् ।
तत्र शान्तिं च तुष्टिं च, पुष्टिं कुरुष्व मङ्गलम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## मन्त्रः ।

ॐ ह्रीं श्रीं क्लीं महावीर, घण्टाकर्ण ! महाबल ! ।
सर्वोपद्रवतो रक्ष, दुष्टान् शत्रून् निवारय ॥ १ ॥
शांतिं तुष्टिं च पुष्टिं च, धनवृद्धिं जयं कुरु ।
दर्शनं देहि प्रत्यक्षं, संरक्ष सर्वसंकटात् ॥ २ ॥
रणे वने समुद्रे च, रक्ष संरक्ष मे द्रुतम् ।
अग्निचोरादितो रक्ष, त्वन्नाममन्त्रजापतः ॥ ३ ॥
त्वन्नामयन्त्रमन्त्रेण, स्वेष्टसिद्धिः प्रजायताम् ।
सर्वरोगविनाशं च, कुरु मे देहरक्षणम् ॥ ४ ॥
ॐ क्रौं क्लूँ ह्रीं महावीरघण्टाकर्णनमोऽस्तु ते ठःठःठः
स्वाहा ।

---

## घण्टाकर्णमहावीरमूलमन्त्रः ।

ॐ घण्टाकरणमहावीर ! सर्वव्याधिं विनाशय ।
अकालमृत्युतो रक्ष, संरक्ष मे महाबल ! ॥ १ ॥
स्वेष्टसिद्धिं कुरु व्यक्तां, साहाय्यं मे सदा कुरु ।
शान्तिं तुष्टिं च पुष्टिं च, जयं मे विजयं कुरु ॥ २ ॥
प्रत्यक्षीभूय मद्भक्त्या, दर्शनं देहि मे द्रुतम् ।
सर्वदुःखविनाशेन, सुखं कुरु हि मे सदा ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घोरविपत्तितो रक्ष, धर्मबुद्धिं प्रकाशय ।
सिद्धमंत्रस्य सिद्धिर्हि, ॐ ह्रीं घण्टाकर्णनमोऽस्तु ते
ठः ठः ठः स्वाहा ॥ ४ ॥

---

## श्रीघण्टाकर्णमहावीरमन्त्रस्तोत्रः ।

ॐ ह्रीं श्रीं क्लीं महावीर, घण्टाकर्ण महाबल ! ।
आधिं व्याधिं विपत्तिं च, महाभीतिं विनाशय ॥ १ ॥

नाममन्त्रोऽस्ति ते सिद्धः, सर्वमङ्गलकारकः ।
इष्टसिद्धिं महासिद्धिं, जयं लक्ष्मीं विवर्द्धय ॥ २ ॥

त्वच्छ्रद्धाभक्तियोगेन, भवन्तु सर्वशक्तयः ।
पराभवन्तु दुष्टाश्च, शत्रवो वैरिदुर्जनाः ॥ ३ ॥

आपत्कालेषु मां रक्ष, मम बुद्धिं प्रकाशय ।
सर्वोपद्रवतो रक्ष, घोररोगान् विनाशय ॥ ४ ॥

इष्टकार्याणि सिध्यन्तु, तव भक्तिप्रतापतः ।
राज्यं रक्ष धनं रक्ष, रक्ष देहं बलादिकम् ॥ ५ ॥

घोरोपसर्गतो रक्ष, रक्ष वह्निभयादितः ।
वने रणे गृहे ग्रामे, रक्ष राज्यसभादिषु ॥ ६ ॥

दुष्टभूपादितो रक्ष, रक्ष सिंहारिसर्पतः ।
दैवीसंकटतो रक्ष, चाकस्मिकविपत्तितः । ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शाकिनीभूतवैतालान्, राक्षसांश्च निवारय ।
नवग्रहादिजां पीडां, शीघ्रं नाशय नाशय ॥ ८ ॥
चतुर्थादिज्वरं मारीं, द्रुतं सर्पविषं हर ।
अलर्कश्वविषं शीघ्रं, शृगालविषमाहर ॥ ९ ॥
वृश्चिकादिविषं तीव्रं, जहि जहि निवारय ।
आकस्मिकविपत्तौ च, साहाय्यं कुरु सर्वदा ॥ १० ॥
प्रत्यक्षं दर्शनं देहि, मच्छ्रद्धा प्रीतिभक्तितः ।
विद्यां देहि धनं देहि, देहि पुत्रश्च पुत्रिकाम् ॥ ११ ॥
कीर्त्तिं देहि यशो देहि, प्रतिष्ठां देहि च श्रियम् ।
सर्वं मे वाञ्छितं देहि, सुखंशान्तिं प्रदेहि मे ॥ १२ ॥
देहाऽऽरोग्यं च मे देहि, दुष्टशत्रून् पराजय ।
ग्रन्थिज्वरं महामारीं, शमय शमय द्रुतम् ॥ १३ ॥
घण्टाकर्ण महावीर, सर्ववीरशिरोमणे ! ।
घातकेभ्यश्च मां रक्ष, रात्रौ दिवा च सर्वदा ॥ १४ ॥
अपमृत्युं प्रयोगाणां, नाशतो रक्ष मे सदा ।
सुष्टितो रक्ष देवेश !, कुरु वीरं महाबल ! ॥ १५ ॥
घण्टाकर्ण महावीर, सर्वशक्तिं प्रदेहि मे ।
आपत्कालेषु रक्षां मे, कुरुष्व कीर्त्तिरक्षणम् ॥ १६ ॥
कुरुष्व मम सान्निध्यं, सर्वदा सर्वशक्तितः ।
चतुर्विधस्य संघस्य, रक्षणं कुरु सर्वथा ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ ह्रीँ श्रीँ क्लीँ महावीर !, घण्टाकर्ण महाबल।
शान्तितुष्टिं च पुष्टिं च, कुरु स्वाहा महाश्रियम् ॥१८॥

घण्टाकर्ण महावीर ! सर्वसंघहितं कुरु ।
देशे राज्ये च खण्डेषु, सुखं शान्ति कुरु द्रुतम् ॥ १९ ॥

त्वन्नामाक्षरमन्त्रस्य, यन्त्ररूपेण तिष्ठसि ।
तत्र शान्तिर्महातुष्टिः, पुष्टिश्चजायते ध्रुवम् ॥ २० ॥

देशे राज्ये पुरे संघे, सर्वजातिप्रजागणे ।
पशुपक्षिगणे शान्ति, कुरु मारीं हर द्रुतम् ॥ २१ ॥

सूरिवाचकसाधूनां, ब्राह्मणानां शिवं कुरु ।
क्षत्रियाणां च शूद्राणां, शान्ति कुरुष्व सत्वरम् ॥२२॥

ॐ क्रौँ द्रोँ द्रीँ महावीर, घण्टाकर्ण शिवं कुरु ।
स्फोटकादिमहारोगान्, नाशय भक्तदेहिनाम् ॥२३॥

ऐँ श्रौँ स्रौँ ह्रीँ महावीर, घण्टाकर्णमहाबल ! ।
विद्यां देहि बलं देहि, शुद्धबुद्धिं प्रदेहि मे ॥ २४ ॥

ग्रथिलत्वं च चित्तस्थं, दूरं कुरुष्व शक्तिमन् ।
शुद्धज्ञानप्रदानेन, मोक्षमार्गं प्रदर्शय ॥ २५ ॥

ऐँ श्रौँ स्रौँ ह्रीँ महावीर, घण्टाकर्णमहाबल । !
भूतादिदोषनाशेन, शुद्धबुद्धिं विवर्द्धय ॥ २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वातपित्तकफोद्भूतान्, सर्वरोगान् विनाशय ।
सात्त्विकप्रकृतिं कुर्या–ॐ ह्रीं स्वाहा नमोऽस्तु ते ॥२७॥

योगिनीवीरवैतालपिशाचभूतमुद्गलाः ।
त्वन्मन्त्रजापतो दूरी–भवन्तु मे सुखं कुरु ॥ २८ ॥

ॐ ह्राँ ह्रीँ ब्लूँ महावीर, घण्टाकर्णनमोऽस्तु ते ।
पादोरुहस्तशीर्षाणि, रक्ष स्वाहा शुभं कुरु ॥ २९ ॥

कुरुष्व मे हितं सर्वं, स्थित्वा मे हृदि भक्तितः ।
गुर्वादिदत्तशापानां, नाशं कुरु नमोऽस्तु ते ॥ ३० ॥

ॐ ह्रीँ श्रीँ क्लीँ महावीर, घण्टाकर्ण नमोऽस्तु ते ।
प्रत्यक्षं दर्शनं दत्त्वा, वाञ्छितं मे प्रसाधय ॥ ३१ ॥

सत्यं दर्शय मे शीघ्रं, वीर्यशक्तिं प्रवर्द्धय ।
त्वन्मन्त्रसिद्धयः स्युर्मे, ध्रुवं सत्यं हितं कुरु ॥ ३२ ॥

मनोवाक्काययोगाना,–मारोग्यञ्च प्रवर्द्धय ।
प्रसन्नःस्या मयि प्रीत्या, शुभं कुरुष्व मे सदा ॥ ३३ ॥

प्रतिष्ठां रक्ष कीर्त्तिं मे, मम पार्श्वे स्थितिं कुरु ।
घण्टाकर्ण महावीर, वश्यान् कुरुष्व मानवान् ॥ ३४ ॥

घण्टाकर्ण महावीर, वचःसिद्धिं प्रदेहि मे ।
संरक्ष सर्वतो देव !, स्यास्त्वं सहायको महान् ॥३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वस्थानेषु मां रक्ष, भव धर्मे सहायकः ।
वादे विवादे युद्धे च, जयं मे कुरु सर्वतः ॥ ३६ ॥
मङ्गलानि कुरु स्पष्टं, सर्वकर्मसु मे ध्रुवम् ।
मां रक्ष शत्रुलोकेभ्यो–दुष्टान् वारय वेगतः ॥ ३७ ॥
आत्मनः शुद्धिकार्यार्थं, साहाय्यं मे कुरु द्रुतम् ।
चिदानन्दस्वरूपं मे, कृपां कृत्वा विकासय ॥ ३८ ॥
विश्वजीवहितार्थं मे, सर्वशक्तिप्रकाशने ।
धर्मकार्ये सहायत्वं, देहि मंक्षु कृपापरः ॥ ३९ ॥
क्षेत्रपालमहावीर ! घण्टाकर्ण महाबल ! ।
शत्रून् स्तंभय वेगेन, त्रासय भापय द्रुतम् ॥ ४० ॥
घण्टाकर्णमहावीर, क्षेत्रपालमहाबल ।
क्षेत्रं ग्रामं पुरं रक्ष, रक्ष संघं च मे द्रुतम् ॥ ४१ ॥
ॐ क्षाँ क्षीँ क्षुँ महावीर, क्षैँ क्षौँ क्षः सर्वशक्तिमान् ।
घण्टाकर्ण धृतिंकीर्त्तिं, कान्तिं ज्ञानं प्रदेहि मे ॥ ४२ ॥
ग्रन्थिज्वरं महामारीं, शामय त्वं बलाद् ध्रुवम् ।
ग्रामपुरस्थलोकानां, पशूनां रक्षणं कुरु ॥ ४३ ॥
आकर्षय प्रियान् शीघ्रं, मत्प्रियाणां कुरु प्रियम् ।
सर्वकार्यसहायी त्वं, भव शत्रूंश्च दण्डय ॥ ४४ ॥
स्वच्छक्त्या रक्ष मे शीघ्र–मारोग्यं देहिसत्वरम् ।
स्वेष्टाश्च सिद्धयः सन्तु, लक्ष्मीवृद्धिं कुरुष्व मे ॥ ४५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ घण्टाकर्ण महावीर !, धनमृद्धिं प्रवर्द्धय ।
राज्यं च राज्यमानं च, बलं बुद्धिं प्रवर्द्धय ॥ ४६ ॥

जयं च विजयं देहि, देहि मे सर्वमङ्गलम् ।
शान्तिं तुष्टिं तथा पुष्टि–मारोग्यं देहि वैभवम् ॥ ४७ ॥

सर्वथोन्नतिकारोऽस्तु, मद्रक्षां कुरु सर्वदा ।
यत्र तत्र स्थितं रक्ष, मम सर्वं प्रियं कुरु ॥ ४८ ॥

सहायं कुरु सर्वत्र, वाञ्छितं देहि संपदम् ।
शिवं क्षेमं च योगं च, रक्ष यंत्रस्थितो द्रुतम् ॥ ४९ ॥

ॐ घण्टाकर्ण महावीर !, सर्ववीरमहाबल ! ।
गर्भस्थं बालकं रक्ष, रोगेभ्यो रक्ष बालकान् ॥ ५० ॥

पुत्रं च पुत्रिकां देहि, देहि वित्तं बलं स्त्रियम् ।
दीर्घायुर्जीवनं देहि, देहि मे वाञ्छितं फलम् ॥ ५१ ॥

धीश्रीशान्तिश्रियं देहि, देहि ब्रह्मबलं महत् ।
सर्वोन्नतिपदं देहि, मत्प्रियं कुरु सर्वदा ॥ ५२ ॥

त्वच्छक्त्या मे ध्रुवं सिद्धि–र्भूयान्मद्भक्तिशक्तितः ।
ॐ ह्रीं श्रीं क्लीं महावीर, साहाय्यं मे कुरु द्रुतम् ॥ ५३ ॥

ॐ आँ क्रौं ह्रीं महावीर, घण्टाकर्ण महाबल ! ।
वाञ्छितं देहि मे शीघ्रं, सर्वशक्तीः प्रदेहि मे ॥ ५४ ॥

घण्टाकर्ण महावीर, मन्त्रयन्त्रप्रभावतः ।
वाञ्छितं सर्वलोकानां, भवत्येव न संशयः ॥ ५५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुत्रार्थी लभते पुत्रं, धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां, दारार्थी लभते स्त्रियम् ॥ ५६ ॥

यादृशी यस्य वाञ्छाऽस्ति, तस्य तादृक् फलं भवेत् ।
घण्टाकर्णमहावीर–मन्त्राराधनतो ध्रुवम् ॥ ५७ ॥

पञ्चामृतस्य होमेन, गुग्गुलाद्यैश्च होमतः ।
गुर्वाज्ञाऽनुभवेनैव, मन्त्रसिद्धिर्भवेद्ध्रुवम् ॥ ५८ ॥

जैनशासनवीरोऽस्ति, सम्यग्दृष्टिर्महाबलः ।
चतुर्विधस्य संघस्य, वृद्धिकर्त्ता शुभङ्करः ॥ ५९ ॥

घण्टाकर्णमहावीरो–जयताज्जगतीतले ।
अधिष्ठायकदेवोऽस्ति, जैनधर्मस्य धर्मिणाम् ॥ ६० ॥

त्वन्मन्त्रयन्त्रयोगेन, कलौ सर्वत्र देहिनाम् ।
भविष्यति सदा स्वेष्ट–कार्यसिद्धिफलं ध्रुवम् ॥ ६१ ॥

कलौ जाग्रत्प्रभावस्त्वं, संघरक्षां करिष्यसि ।
घण्टाकर्ण महावीर, कुरुष्व सुखमङ्गलम् ॥ ६२ ॥

घण्टाकर्ण महावीर, मन्त्रश्रवणपाठतः ।
शान्तिं तुष्टिं च पुष्टिं सत्–सुखं कुरुष्व मङ्गलम् ॥ ६३ ॥

घण्टाकर्ण महावीर, मन्त्रयन्त्रप्रभावतः ।
श्रोतॄणां वाचकानां च, गृहे भवतु मङ्गलम् ॥ ६४ ॥

घण्टाकर्ण महावीर–मन्त्रमष्टोत्तरंशतम् ।
यः पठेच्छ्रद्धया नित्यं, तस्येष्टं मङ्गलं भवेत् ॥ ६५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्त्ररहस्यं पात्रेभ्यो, ध्रुवं देयं परीक्षया ।
गुर्वाशिषा हि भक्तानां, मन्त्रसिद्धिश्च मङ्गलम् ॥ ६६ ॥

हरिभद्रसूरेःशिष्यो, जैनधर्माऽभिवृद्धये ।
घण्टाकर्णमहावीर-मुपास्त गुरुबोधतः ॥ ६७ ॥

ततः प्रवृत्तिस्तस्यासी-त्सम्यक्त्वधारिणो जने ।
प्रतिष्ठाकल्प आचख्ये, गणिना सकलेन्दुना ॥ ६८ ॥

ततो विमलचन्द्रेण, कल्पोयं ख्यातिभाक्कृतः ।
स्मरणात्पठनाच्चास्य, भवन्तु सुखिनो जनाः ॥ ६९ ॥

आवाहनं न जानामि, न जानामि विसर्जनम् ।
केवलं जपतः सिद्धि-र्जायतां मे तवोत्तमा ॥ ७० ॥

मात्राहीनं क्रियाहीनं, वर्णहीनं विलोमतः ।
पठितं ज्ञानहीनं यत्, तत्क्षमस्व सुरोत्तम ! ॥ ७१ ॥

ॐ शान्तिः ३

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# श्रीअर्बुदाचलवर्णनम् ।

नानागह्वरराजिराजितवपुर्विश्रामभूमिः सतां,
निर्मानप्रथिताम्बुपानविलसद्वीनां गणैर्नादितः ।
चित्तोभत्तुभितात्मनामपि सदाऽऽनन्दप्रदानक्षमः,
श्रीमानर्बुदभूधरो गिरिवरो राजत्यखण्डप्रभः ॥

दूराद्दर्शनतां गतो जनिमतां जीमूतशङ्कापदः,
सान्निध्यं भजतां गिरीन्द्रतुलनां विस्तारयत्यञ्जसा ।
आरूढोपरिभूमिभासुरधियां धात्रीभ्रमोद्दीपकः,
श्रीमानर्बुदभूधरो गिरिवरो राजत्यखण्डप्रभः ॥ २ ॥

योग्यो योगिगणस्य निष्ठितमतेः सेव्यः सदा धीमतां,
तप्तानां सुखशान्तिसन्ततिकरः सन्तापतो देहिनाम् ।
काम्यः कर्मजुषां विशिष्टमनसां सिद्धिप्रयोगार्थिनां,
श्रीमानर्बुदभूधरो गिरिवरो राजत्यखण्डप्रभः ॥ ३ ॥

विश्रामस्थलमद्भुतं वनलतावृन्दस्य रुग्भेदिनो,
दीर्घाऽऽरोग्यविधानविश्रुतयशा दीप्तौषधीनां गणः ।
सौरभ्यं कलयन्मनोहरमहोद्यानव्रजो यत्र स–
श्रीमानर्बुदभूधरो गिरिवरो राजत्यखण्डप्रभः ॥ ४ ॥

यस्मिन्नक्षयशान्तिदानरुचिराऽमन्दप्रभाभास्वरः,
श्रीमन्नाभिमहीपसूनुरनघो मोक्षार्थिनां मोक्षदः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भव्यानां भवविघ्नवारदलनः सद्भक्तिभाजां नृणा–
माद्यस्तीर्थकृतां सदा विजयते विज्ञातनैकान्तकः ॥५॥

केचिद्यत्र निजश्रियाऽनुकलितां प्रख्यापयन्तः शुभां,
संपत्तिं विततोष्णकालसमये तिष्ठन्ति शान्तिप्रियाः ।
तूष्णीं भावजुषोऽन्य आत्मविभवाः सञ्चिन्तयन्ति प्रभुं,
सर्वेषां हितदायकः स विबुधश्रेणिश्रिया राजितः ॥६॥

तीर्थानि प्रचुराणि यत्र विदितान्यन्यानि राजत्प्रभा–
ण्यक्षोभ्याणि सुराऽसुरेन्द्रमहितान्यभ्रस्पृशत्सानुनि ।
सोऽयं दीव्यविभाप्रसारितशिरा विभ्राजते भारते,
श्रीमानर्बुदभूधरो गिरिवरः संसेवनीयो बुधैः ॥७॥

दीव्यानन्दमयः सदा सुखमयः सर्वत्र शान्तिप्रदो–
भव्याकारतया सुभावितरमोभव्यात्मनां भावतः ।
कल्पद्रुप्रमितप्रभावकलितोऽस्यत्किं ब्रुवेऽस्याऽधिकं,
श्रीमानर्बुदभूधरोऽस्ति विदितः सर्वोपमो भारते ॥ ८ ॥

## श्रीआदिजिनस्तवनम् ।

शान्ताकारतया मुखाम्बुजविभा विभ्राजते भासुरा,
भव्यानां शमदायिनी शशिनिभा यस्याऽऽज्ञयार्थप्रदा ।
तं भक्ताऽभयदायकाऽमरतरुं देवाऽसुरैः संस्तुतं,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तीर्थानां प्रथमप्रवृत्तिजनकं भूभामिनीस्वामिना-
माद्यं विश्वविकासकारणधुरां वोढारमादिक्षणे ।
दीव्याऽऽनन्दविभाविभावितधराधामानमुच्चश्रियं,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ २ ॥

धन्योऽयं गिरिरर्बुदो गिरिगणे यत्पादपङ्केरुह-
द्वन्द्वेनाङ्कितसानुरुत्तमजनध्यानाधिरूढश्रिया ।
तं तीर्थीकृतभूतलं भुवि नृणामुद्धारकं भाविनां,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ३ ॥

विभ्राजन्मुकुटप्रभाभरनमन्नाकीश्वरप्रार्थितं,
भव्यर्द्धिप्रमिते सुधाधवलिते धाम्नि स्वयं संस्थितम् ।
वन्दारुप्रथुकर्मकन्ददलने दत्तैकदृष्टिक्षणं,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ४ ॥

निर्मायं निरयक्षितिक्षयकरं निर्माननिर्मत्सरं,
निष्कामं कमनीयकान्तिकलितं निर्धूतकर्मावलिम् ।
निर्दोषं निररिप्रकाण्डममलं निर्नाथनाथोपमं,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ५ ॥

यो ध्यानं शुभमानसौकसि शुभं विस्तारयत्यञ्जसा,
दासत्वं दलयत्यनल्पभयदं शान्तिं सदा यच्छति ।
तं भूरि श्रियमातनोति विपदं निर्मूलयत्यङ्गिनां,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यं देवाऽसुरमानवेन्द्रनिकरा भक्त्योल्लसन्मानसा,–
दृष्ट्वाऽनन्तकृपामयं शिवसुखं संसाधयाञ्चक्रिरे ।
द्वन्द्वातीतमहर्निशं समतया तं तस्थिवांसं प्रभुं,
भूभूषाऽर्बुदभूषणं भवभिदं नौम्यादिनाथं मुदा ॥ ७ ॥

यः सन्ध्याऽभ्रसमं निरीक्ष्य विभवं सांसारिकं सत्वरं,
जग्राहाऽशिवशान्तये शिवपथप्रख्यापनेऽदुर्बलाम् ।
दीक्षां भागवतीं तमद्भुतयशोराशिं कृपावैभवं,
भूभूषाऽर्बुदभूषणं भवमिदं नौम्यादिनाथं मुदा ॥ ८ ॥

## श्रीअर्बुदाचलश्रीशान्तिनाथस्तवनम्

नित्यप्रसन्नाननपङ्कजश्रियं,
समानभावं विपुलप्रभावम् ।
निरामयं साम्यशान्तिदायकं,
श्रीशान्तिनाथं प्रणमामि नित्यम् ॥ १ ॥

निशान्तमारोग्यसुसंपदानां,
सुधागृहं संसृतितप्तचेतसाम् ।
भानुप्रभं मोहतमःस्थितानां,
शान्तिप्रियं शान्तिजिनं स्मराम्यहम् ॥ २ ॥

विशुद्धधर्मार्थिजुषां नतानां,
निस्तारकं तारकराजसुप्रभम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वार्थिनां तत्त्वनिधानभूतं,
मोक्षार्थिनां मोक्षनिकेतनप्रदम् ॥ ३ ॥
विद्वेषकारागृहसंस्थितानां,
दुर्दर्शनीयं स्फुटचक्षुषामपि ।
सद्ध्यानतो मीलितलोचनानां,
श्रीशान्तिनाथं सुलभं नमाम्यहम् ॥ ४ ॥

विस्तारिणा सर्वत एव तेजसा,
तमस्तति मोहमयीं जनानाम् ।
विभेदयन्तं सदयं गतान्तकं,
जिनेश्वरं शान्तिमहं नमामि ॥ ५ ॥

प्रभो ! न ते पादसरोजयोः पुरा,
नतस्ततोऽहं भवदुःखमापम् ।
नाऽहं पुनस्त्वच्चरणप्रसादतो–
भवाटवीं संप्रति दृष्टुमर्हः ॥ ६ ॥

अवाप्य ये मानवतां सदाशयाः,
लब्ध्याऽग्रगा मानवतां त्वदीयम् ।
पादारविन्दं प्रणमन्ति मोक्षदं
पुनर्भवं यान्ति न ते कृपालो ! ॥ ७ ॥

प्रभो ! त्वदीयस्मरणाद्विमुखा–
भवोदधिं तर्तुमिमे कथं क्षमाः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्वद्ध्याननौकां प्रतिपद्य तेऽञ्जसा,
तरन्ति तं शुद्धविचारचारवः ॥ ८ ॥

## अर्बुदाचलश्रीनेमिजिनस्तवनम् ।

विकासभाजं भजतां सुरद्रुमं,
सुरेन्द्रवृन्दै रचितप्रभावम् ।
विकारहीनं विजितारिभावनं,
श्रीनेमिनाथं प्रणमामि नित्यम् ॥ १ ॥

कायेन वाचा मनसाऽपि नित्यशो–
निषेवितो यः प्रददात्यमेयाम् ।
सुसंपदं देवगणैरतर्कितां,
तं नेमिनाथं प्रणमामि नित्यम् ॥ २ ॥

विदेशभाजोऽपि समीपगामिनः,
स्मृतेर्वशाद्यस्य फलं लभन्ते ।
स्वर्गाऽपवर्गीयमशेषमर्हत–
स्तं नेमिनाथं प्रणमामि नित्यम् ॥ ३ ॥

राजीमती यं चकमे वरीतुं,
दीव्यप्रभाभूषितचारुरूपा ।
संत्यज्य तां मुक्तिरमामियेष,
तं नेमिनाथं प्रणमामि नित्यम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यो मन्यमानः करुणां प्रधानां,
विवाहसंभारमवेक्षमाणः ।
दारग्रहं बन्धनमेव मेने,
तं नेमिनाथं प्रणमामि नित्यम् ॥ ५ ॥
यन्नाममात्रस्मरणाज्जनानां,
पलायते पापतमोवितानम् ।
तं नीलभासं भुवि भासमानं,
श्रीनेमिनाथं प्रणमामि नित्यम् ॥ ६ ॥
यदङ्घ्रिपद्मे प्रणतिं दधानो-
भावान्नरः कर्मरजो जहाति ।
विकासतामेति तथैव लोके,
तं नेमिनाथं प्रणमामि नित्यम् ॥ ७ ॥
कुलं यदोरुच्चतमं विधाय,
स्वजन्मना केवलबोधिलुब्धः ।
यो मोक्षमार्गं श्रितवान् विधिज्ञ-
स्तं नेमिनाथं प्रणमामि नित्यम् ॥ ८ ॥

## अर्बुदस्थाविशेषवर्णनम् ।

पूर्णः पुण्यजलाशयः सुसलिलैर्यस्मिन् समीनव्रजो-
लोलच्चित्तहरस्तरङ्गरचनाविभ्राजमानोऽर्बुदे ।
धत्ते नख्यभिधेयमुन्नतरमश्रीरामसद्माश्रितो-
योऽजस्रं जनताप्रमोदजनने साम्राज्यकीर्त्तिं वहन् ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेपुर्यत्र तपस्विनोऽपलमनःसद्मन्यपूर्वां शुभां,
ध्यायन्तस्तपनोज्ज्वलां शिवपयस्यानन्दसन्दोहिनः
मूर्त्तिं शान्तगुणां प्रभोः प्रभुतयाप्रख्यातभावप्रदां,
सायुज्यं प्रभुपादचिन्तनमहो ! दत्तेऽत्र कः संशयः ? ॥२॥

यात्रार्थं प्रभुतायुता जनगणाः श्रीराघवे मन्दिरे,
विश्रम्यैत्र यथेष्टकालमुचितं पूजादिसेवाविधिम् ।
निर्मायोत्सवभासुरा विधितया देवर्षिवृन्दार्चिते,
लब्धस्वास्थ्यपरम्पराः स्फुटयशोराशिश्रिता यान्ति वै ॥३॥

श्रीमन्नेमिजिनेश्वरो विजयते दिव्यप्रभे मन्दिरे,
दीव्यानन्दमये कलाकुशलताशिल्पक्रियाकर्मठैः ।
यस्मिन्नद्भुतनीलकांतिविलसन्मूर्त्तिर्गिरौ निर्मिते,
भव्यानां भवभेदकः सकृदपि प्राप्तोऽच्चिणी भावतः ॥४॥

शान्त्यागारमनर्थदण्डशमनः शान्तस्वरूपः श्रिया,
राजद्भव्यललाटकांन्तिरतुलक्षेमप्रदः पावनः ।
देवेन्द्रैः स्तुतपादपीठ उचितस्तोत्रैरमन्दोत्सवै–
स्त्रैलोक्यं कलयन् करामलकवच्छान्तिर्जिनोऽस्त्वङ्गिनाम् ५

सिद्धानन्दविनोदनैकरसिकः सिद्धार्थवादस्पृहां,
सन्त्यज्य चणतः प्रकामविलसन्मुक्तिप्रियाऽपेक्षिता ।
दुर्भेद्यानि विभिद्य दुष्कृतमहाकर्माणि बोधासिना,
श्रीशान्तिर्जिनपुङ्गवोऽर्बुदगिरौ विभ्राजते शान्तिभाक् ॥६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दुर्दान्ताक्षगणो विचारपटुना येन क्षणान्निर्जितः,
संत्रस्ताः प्रविलोक्य यं बुधगणा अन्ये क्रियावेदिनः ।
तं भुवनत्रयपूजनीयमतुलक्षेमङ्करं शाश्वतं,
लिप्सुर्धर्ममहं स्तवीमि नितरां शान्तिप्रभुं शान्तिदम् ॥७॥

पारुष्यं प्रपलायते विकलता नश्यत्यनर्थप्रदा,
मायामोहकरी करोति विकृतिं न क्रोध उज्जृम्भते ।
मानःस्तम्भनतां भजत्यनुदिनं यद्ध्यानसक्तात्मनां,
स श्रीशान्तिजिनेश्वरो भवतु मे संसारसंतारकः ॥ ८ ॥

कारुण्यं वितनोति दैन्यमपहन्त्यारोग्यमापादय-
त्यौन्नत्यं च ददाति सम्पदमहो विस्तारयत्यञ्जसा ।
बुद्धिं शुद्धतरां करोति विपुलां कीर्त्तिं दिगन्तश्रितां,
यद्ध्यानं विमलं नमामि सततं तं शान्तिनाथं प्रभुम् ॥९॥

यच्छान्ताननपङ्कजं जनयते दृष्टं प्रगे प्रोल्लस-
च्छान्तिं शान्तमनस्विनां प्रकटयत्यानन्दवल्ल्यङ्कुरान् ।
कामान् सान्त्वयते मनोऽभिलषितान् निर्वारयत्यापदं,
तं श्रीशान्तिजिनोत्तमं सुखकरं वन्देऽर्बुदेशं मुदा ॥१०॥

मायाऽपायकरण्डिकावशगतो मोमुह्यते बन्धतः,
क्रोधाऽग्नेःशिखया ज्वलन् नरगणः पापच्यते तापतः ।
मानाऽरेः प्रबलैः शरैर्विनिहतो दोदूयते दुःखतः,
श्रीशान्तिप्रभुदर्शनेन विकलोऽतस्तं भजे भावतः॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यः श्रीशान्तिजिनेश्वरं सकृदहो नन्तुं समुत्कण्ठते,
भव्यो भावतया न संसृतिपथं पश्यत्यसौ पुण्यभाक् ।
साक्षाद् ध्यानविधानतत्परधियां वाच्यं किमत्राधिकं,
तद्यात्राप्रविधानतोऽर्बुदगिरेः कुर्वन्तु पुण्याऽर्जनम् ॥१२॥

---

वाशिष्ठाश्रम औचितो मुनिवरैर्ध्यानाऽधिरूढात्मभि-
र्यस्मिन्नत्तुभितैस्तपोऽधिकतरं तेपे विशुद्धाशयैः ।
केऽपि ज्ञानसुधाम्बुजोगतभया निष्कामभक्तिप्रियाः,
सत्प्रेमाविर्भावभावितधियः कुर्वन्ति सत्सङ्गतिम् ॥ १ ॥
अन्येऽप्याश्रमवासिनो गुणिगणाः सत्सेवनासक्तयः,
सिद्धान्तागमबोधमुन्नतिकरं बोध्धुं यतन्तेऽन्वहम् ।
केचित्कर्मरजोविशुद्धमनसः प्रक्षालयन्तस्तथा,
चारित्रेण यथोचितेन नितरां राजन्ति दीव्यर्द्धयः ॥ २ ॥
राजत्यर्बुदभूधरो गिरिगणे मूर्द्धन्यतामुद्वहन् ,
दीप्यद्दीव्यमहोविराजितमहादेवालयोद्भासितः ।
संवीक्ष्योन्नतसानुमण्डलमहालक्ष्मीं यदीयां जनाः,
शङ्कन्ते किमु नाकिवासभवनं संप्राप्तमुत्साहतः ॥ ३ ॥
सानुन्यम्बरगामिनि प्रथुशिलापट्टेऽन्तरिक्षस्थिता,
देवी दीव्यविभाऽर्बुदा विजयिनी धत्ते सदा मङ्गलम् ।
यस्योर्वीभृत आम्रवृन्दनिकरेऽलक्ष्योष्णरश्मिप्रभे,
श्च्योतन्निर्झरवारिणि प्रतिपदं योगिप्रकाण्डाश्रिते ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्मिन् कल्पलतालतौषधिगणैरङ्गीकृतेऽहर्निशं,
दुर्गोदुर्गतिदारको गुरुशिखः पूज्योऽचलः श्रद्धया ।
कैलासश्चलितो दशाननबलान्नायं चलो विश्रुत-
स्तस्मादेव यथार्थनाम वहते दुर्गाधिपत्याश्रितः ॥ ५ ॥

यत्रास्ते जिनराजराजिरनघा प्रोत्तुङ्गकान्त्यालयः,
सन्तप्ताऽर्जुनकान्तकान्तिमनिशं धिक्कारयन्ती वरा ।
मुख्यस्तत्रचतुर्मुखो जिनवरः प्राच्यादिदिक्षु स्थितः,
श्रेयः सन्ततिमातनोति जगतः साम्यश्रिया राजितः ॥६॥

संप्राप्तानचलेश्वरः सुखयते धाम स्वकीयं शिवो,
नन्दीशेन रिरीमयेन बृहता साक्षात्समाराधितः ।
रूपं गर्त्तमयं दधद्गिरिजया संवीक्षितं सादरं,
दग्ध्वा पञ्चशरं निवृत्तिमभजद्यस्मिन् गिरावर्बुदे ॥ ७ ॥

गोपीचन्द्रनरेशसेवितगुहा तत्राऽस्ति भव्याऽनघा,
केचिद्भिक्षुवरा वसन्ति विरता अद्यापि यत्राऽभयाः ।
भाद्रश्रावणनामधेयसरसी स्वच्छाम्बुनी सेवते,
तत्रस्थे जनता गता तदुपरि श्रीदेविका मन्दिरम् ॥ ८ ॥

---

कामं रम्यं गिरीन्द्रं प्रकृतिसुभगतां धारयन्तं विशालां,
सर्वत्राऽखण्डधारां जनगणसुखदां निर्झरद्वारिधाराम् ।
मुक्तामालां वहन्तं समुचितहृदयेनाऽर्बुदं योगिवासं,
दृष्ट्वा केषां न चेतो विविधसुखरतिं प्राप्नुयात् पुण्यभाजाम् । १

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूपालानां निवासाः प्रतिशिखरगता यद्गिरेदर्शनीया-
दृश्यन्ते दृष्टिचोरा वरतरुलतिकामण्डपभ्राजिदेशाः ।
काले ग्रीष्मे कराले रविकिरणवशाच्छ्रान्तिदानेपटिष्ठा-
भव्या वैमानवारा इव समधिगता यच्छ्रियः प्रेक्षणाय ॥२॥

प्रालेयाद्रेः सुरूपः प्रतिनिधिरचलोऽयं विभाति क्षमायां,
शैत्याधानात्मकाभं तुहिनततिवशादुच्चतातिप्रमाणात् ।
नानारत्नौषधीनां प्रचुरनिधितया दीप्रदीव्यालयैश्च,
भिन्नस्रोतःप्रवाहैर्वरगगनसरिद्भ्रान्तिदानैकदक्षैः ॥ ३ ॥

पीत्वा पीत्वा पयांसि प्रतिपदममलान्युद्धृतश्रीणि जीवाः,
पश्चाद्याः प्रीतिमन्तः सुविहितमनसः स्वस्वमार्गप्रवृत्ताः ।
वैरायन्ते मिथो नो गिरिकुहरगता योगिनां सत्प्रभावाद् ,
यस्मिन् गुप्तस्थितीनां रहसि गुणवतामर्बुदे भासमाने ॥४॥

यस्मिन्नद्रौ धरित्रीं सुरभयति भृशं चम्पकौघः प्रसूनैः,
स्थाने स्थाने चकासद्वरकनकविभैर्देवपूजोचितैश्च ।
अन्ये पुष्पप्रधाना विकसिततरवो यत्रतत्रोल्लसन्तः,
चित्तोत्साहं जनानां सुरभिरतधियां वर्द्धयन्ति त्रिकालम् ।५।

आम्राणामुन्नतानां नवविटपलतामञ्जरीभ्राजितानां,
वृन्दान्येकत्रभागे विजितसुरतरुश्रीप्रकाण्डानि यस्मिन् ।
राजन्ते राजिमन्ति क्षुभितजनमनोमोदमापादयन्ते,
किं किं कर्त्तुं न शक्ताः समुचितविभवा मानवाः स्थावरा वा ।६।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्मिन्नस्ति वराम्बुराशिकलितो मन्दाकिनीकुण्डको-
यत्तीरे महिषत्रिकान्तिकगतः सज्यं धनुर्धारयन् ।
धारावर्षमहीपतिर्नयविदां संमाननीयः सदा,
राजत्यद्भुतशक्तिरुन्नतवपुर्दीव्यालयैर्भूषिते ॥७॥

श्रीमानादिजिनेश्वरोऽत्र भरतार्धीशेन निर्मापिते,
सौभाग्येन समन्वितेन विबुधैर्दीव्यालये संस्तुते ।
तस्मादक्षयसिद्धिसाधनमसौ श्रीरैवताद्रेस्तथा,
श्रीसिद्धाचलतोऽपि नेमिजिनराट् पादाम्बुजेनाऽङ्किते ॥८॥

यच्छृङ्गे परमारवंशविततिर्भव्ये वशिष्ठाश्रमे,
सञ्जाता ज्वलदग्निकुण्डत इति श्रेयस्करः प्रीतिदः ।
नानाकारनदीनदैः सुललितो हंसावलीनादितो-
भव्याऽऽनन्दमयः सुधाशनगणैः स प्राथनीयः श्रिया ॥९॥

## अम्बिकादेवीस्तोत्रम् ।

वैतालीयवृत्तम्

जय जैनमताऽनुरक्तिके ! जय दीव्याम्बरधारिणि ! क्षितौ ।
जय दीर्णकलिप्रभाविके ! जय संपत्तिनिधानकेऽम्बिके ! ॥१॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वदरं विनिपातसंक्षयो-जिनराजप्रभया प्रभाविनि ! ।
करुणालयवासिनि ! प्रियं, कुरु सर्वत्रशरीरिणां सदा ॥ २ ॥

विदितो ललिताम्बिके ! तव, महिमाऽमेयगुणः शुभात्मिके ! ।
विनिवारय मङ्गलेतरं, प्रविधेहि प्रचुरश्रियं नृणाम् ॥ ३ ॥

नरदेवनताङ्घ्रिकेऽम्बिके ! तव दाक्षिण्यमनल्पशर्मदम् ।
शरणं क्रियते त्वदीयकं, चरणं विघ्नविघातकारणम् ॥ ४ ॥

विफलं तव सेवनं न वै, श्रुतदृष्टं च मयाम्बिके ! जने ।
जनतारिणि ! मानहारिणि ! हर संकष्टपरम्परां सदा ॥ ५ ॥

जिनशासनसेविनां नृणां, विकृतिर्नैव कदापि जायते ।
विपदां पदमर्थहारकं, त्वयि गोप्त्र्यां कुत एव संभवेत् ॥ ६ ॥

जय नेमिजिनेन्द्रशासनाऽवननिष्ठे ! वरसिंहवाहने ! ।
करसंस्थितचूतलुम्बिके ! सुतयुगलेन विराजितेऽम्बिके ! ॥७॥

विमलार्थपतेः सहायिका, शुभधर्माऽभिरतस्य गीयसे ।
अचलाऽर्बुदरक्षिकाम्बिके ! श्रुतसम्यक्त्वधरा प्रभाविनी ॥ ८ ॥

गुरुभक्तिरतात्मना सदा, मुनिहेमेन्द्रसुधाब्धिना कृतम् ।
समभावयुजाऽम्बिकाऽष्टकं, जनतात्राणविधानहेतुकम् ॥ ९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# योगनिष्ठश्रीमद्-बुद्धिसागरसूरीश्वरगुणाष्टकम्

( पञ्चचामरच्छन्दः )

अशेषकर्मदारकं विशेषशर्मदायकं,
विषादकोटिहारकं प्रभूतसम्पदाकरम् ।
सुबुद्धिसिद्धियोजकं सुभक्तिनम्रचेतसां,
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागरम् ॥ १ ॥

कलौ मलौघनाशनैकबद्धलक्षलक्षितं,
क्षितीन्द्रलक्षसन्नतप्रफुल्लपादपङ्कजम् ।
जनेषु जैनतत्त्वबीजरोपणैकमानसं,
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागरम् ॥ २ ॥

युगादिनाथसाधितार्थसार्थकत्वसाधकं,
परात्मभेदकाऽऽत्मभेदभिन्नताविकासकम् ।
सुयोगमार्गमार्गणोद्यतप्रचण्डतेजसं,
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागर ॥ ३ ॥

समस्तलोकसंस्तुतं मुनीन्द्रवृन्दलालितं,
गुणिव्रजैः सुचिन्तितं स्वकीयमानसाम्बुजे ।
सुभव्यमानवा भजन्ति यत्क्रमाम्बुजं सदा,
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागरम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जिनाऽऽगमं प्रमाणतः प्रमाणयन्तमुन्नतं,
सदोन्नतिं विवर्द्धयन्तमार्हतीं जनोचिताम् ।
कुमार्गसन्ततिं विनाशयन्तमङ्गिनां सदां,
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागरम् ॥ ५ ॥

समस्तमानमत्तमानवव्रजं निजश्रिया,
सुबुद्धिवृद्धिजातया नितान्तमोदमूलया ।
पवित्रयन्तमन्वहं कलङ्कहीनताजुषं,
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागरम् ॥ ६ ॥

विवेककेकिनादनादितोत्तमात्मधारणं,
धराधरेन्द्रसन्ततिप्रपूजितक्रमाम्बुजम् ।
निरस्तहिंस्रहिंसनप्रथं प्रकृष्टबोधतो–
नमामि सूरिपुङ्गवं मुनीशबुद्धिसागरम् ॥ ७ ॥

विचिन्त्य चिन्तनीयमात्मतत्त्वमात्ममन्दिरे,
नितान्तशर्मसम्पदा समाश्रितं श्रितोदयम् ।
विशिष्टशिष्टमानवा नमन्ति यत्पदाम्बुजं,
नमामि सूरिपुङ्गवं मुनीन्द्रबुद्धिसागरम् ॥ ८ ॥

प्रसिद्धसिद्धिदायकं महासमृद्धिसेवधिं,
नरामरेन्द्रशुद्धिदानदक्षतायुतं सदा ।
हेमदेवताभिधाऽभिगुम्फितं मनोहरं,
पठन्ति ये जनाः सुखाऽभिमाप्नुवन्ति शाश्वतम् ॥९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



( स्रग्विणीवृत्तम् ) ( २ )

बुद्धिमान् सागरः सूरिरीशः कृपा–
सागरो बुद्धिरित्याख्यया ख्यातिभाग् ।
शुद्धशास्त्रप्रवक्ता प्रतापोज्ज्वलः,
सद्गुरुः सर्वदा वन्दनीयो जनैः ॥ १ ॥

( शार्दूलविक्रीडितवृत्तम् )

अध्यात्मैकरसप्रियः प्रियगुणः सन्मार्गगामिप्रियः,
सद्ध्यानस्थितिकप्रियः प्रियदयाधर्मः प्रियो योगिनाम् ।
शुद्धज्ञानविभाविभासिततनुः सिद्धान्ततत्त्वोदधिः,
सूरिः श्रीयुतबुद्धिसागरविभुः कुर्यात्सतां मङ्गलम् ॥ १ ॥

अध्यात्मैकरसाम्बुधिश्रिततटा लब्धज्ञरत्नालयो–
योगाङ्गीयसुतत्त्वनिष्ठितधियः सिद्धान्तसाराऽऽलयाः ।
सर्वत्राऽस्खलितोक्तयः सुललितश्रद्धेयमूर्तिप्रभाः,
श्रीमद्बुद्धिपयोधिसूरिचरणाः कुर्वन्तु नो मङ्गलम् ॥ २ ॥

यत्स्याद्वादवचःसुधास्रुतिपयोद्गारेण भूमण्डले,
तृप्ता भव्यजनाः प्रसन्नमनसा धर्म्यक्रियां कुर्वते ।
यः सम्यग्गुणगौरवैः क्षितितले ख्यातिं परां लब्धवान्,
बुद्ध्यब्धिः सततं क्षितौ विजयतां श्रीपूज्यसूरीश्वरः ॥ ३ ॥

यत्स्वाध्यात्मिकवाक्सुधाश्रवणतः प्रीता न के भूतले,
यत्स्याद्वादरहस्यरक्षणविधेः के नाऽनुमोदे पराः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यो ज्ञानाद्यधिकारिणे प्रतिपलं सज्ज्ञानदानं ददौ,
श्रीसूरीश्वरबुद्धिसागरगुरुर्भूमण्डले राजताम् ॥ ४ ॥

यो वादिप्रतिबोधकः शुभविधिः स्याद्वादविद्यानिधि-
र्नानाशास्त्रविशारदः परिषदो यः शुद्धबोधप्रदः ।
यः सम्यग्विधिबोधको गुणगणैः ख्यातो धरामण्डले,
श्रीसूरीश्वरबुद्धिसागरगुरुर्भूमण्डले राजताम् ॥ ५ ॥

वादीन्द्रं दलयन् स्वयुक्तिवचनैर्भव्यांस्तथारञ्जयन्,
ग्रन्थान्संकलयंस्ततो जिनमतं सद्धेतुभिः साधयन् ।
सभ्यानां पुरतः स्वशास्त्रविषयं सद्युक्तिभिः स्थापयन्,
पूज्यश्रीयुतबुद्धिसागरगुरुः सूरीश्वरो राजताम् ॥ ६ ॥

सुश्रामण्यविराजितो गुणनिधिः सच्छास्त्रशिक्षाप्रद,
आत्मज्ञानपरायणो जितमना यो योगिनामुत्तमः ।
ख्यातः संप्रति भारतादिविषये सर्वत्र यः सद्गुणैः,
सूरीशो गुरुबुद्धिसागरविभुर्भूमण्डले राजताम् ॥ ७ ॥

पञ्चाऽऽचारपरायणां जनततिं विस्तारयन्वस्तुतः,
सम्यक्तान्स्वयमाचरन्विशदधीः पञ्चेषुजिद्धेलया ।
जैनेन्द्रोत्तमधर्मपादपमसौ सिञ्चन्वचोवारिणा,
पूज्यश्रीयुतबुद्धिसागरगुरुः सूरीश्वरो राजताम् ॥ ८ ॥

योगीन्द्रो युगधर्मधारणविधौ यो नित्ययत्नश्रितः,
श्राद्धानस्खलिते सदार्हतमते संस्थापयामासिवान् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हेयाहेयविचारचारुधिषणो यो भारतोद्धारकः,
पूज्यश्रीयुतबुद्धिसागरगुरुः सूरीश्वरो राजताम् ॥ ९ ॥

स्रग्धरावृत्तम्

सम्यज्ज्ञानप्रदाता सकलगुणनिधिर्योगिनां यो वरिष्ठ–
आत्मज्ञानाऽवगाही जिनमतविदितः शुभ्रलेश्यानुयुक्तः ।
नानाऽनर्थप्रभेत्ता विमलमतिगुणैर्भव्यभक्तिप्रियाणां,
बुद्ध्यब्धि सूरिवर्यं प्रणमत सुधियो मानवा ! मानहीनम् ॥१०॥

## श्रीमद्अजितसागरसूरिगुणाष्टकम् ॥

यः सर्वत्र पवित्रपादयुगलाच्छुद्धीकृतोर्वीतलो –
यो दीनानपि दुःखकूपपतितान्सत्तत्त्वरज्ज्वोद्धरन् ।
यो वक्ता प्रविभाति भव्यवचनक्षीरोदधी रम्यधीः,
सूरीशोऽजितसागरो विजयतां सौभाग्यशर्मप्रदः ॥ १ ॥

यः प्रीणाति सदा बुधान्निजवचःपीयूषपूरैः परं,
बाढं बुद्धिबलेन दुर्गमगुरुग्रन्थावगाही च यः ।
योऽनेकान्तमतप्रचारणविधौ वक्ता प्रसिद्धोऽभवत्,
सूरीशोऽजितसागरो विजयतां व्याख्यानवाचस्पतिः॥ २ ॥

यो मोहादिकमुख्यशत्रुदलने प्राप्तप्रतापोच्चयः,
यः क्षान्त्यादिकसद्गुणैर्गुरुगणो लब्धप्रतिष्ठो महान् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीसूरीश्वरबुद्धिसागरगुरोः सेवापरो यः सदा,
सूरीशोऽजितसागरो विजयतां चारित्रचूडामणिः ॥ ३ ॥

यः श्रीसूरिगुणान्वितो गुणभवत्पूर्णप्रतापान्वितः,
श्रीस्याद्वादरहस्यरक्षणपरस्तैस्तैः प्रतापैः पुनः ।
रक्षातो जिनशासनस्य भुवने कल्याणकर्ताऽस्ति यः,
सूरिः सोऽजितसागरो विजयतां सर्वार्थविद्यानिधिः ॥४॥

शान्तः सर्वमतो नतो गुणिगणैस्तत्त्वाऽर्जने यो रतः,
चेतः संयमतः सदात्मनिरतो गीतोऽस्ति यः सज्जनैः ।
प्रीतः प्रेमिजनेऽन्वितो मुनिजनैः शास्त्रेषु यः पण्डितः,
सूरीन्द्रोऽजितसागरो विजयतां स्याद्वादविद्यानिधिः॥ ५ ॥

यो गूढार्थजिनोक्तशासनरहस्यार्थस्य विद्योतकः,
शास्त्राम्भोध्यवगाहनैकरसिको यो वाचनावाक्पतिः ।
नानादर्शनदर्शको भुवि सतां सम्यक्पथाऽऽदर्शकः,
सूरीन्द्रोऽजितसागरो विजयतां काव्येषु काव्योपमः॥ ६ ॥

गम्भीरार्थगरिष्ठतत्त्वगहनग्रन्थावलीभाष्यकृत्,
नानातर्कविचारणोऽतिनिपुणो विद्यावतामुत्तमः ।
यः सर्वाऽऽगमगौरवप्रथनताप्रत्यक्षकर्ता धिया-
सूरीन्द्रोऽजितसागरो विजयतां विद्वन्मनोमोदकः ॥ ७ ॥

सम्यग्ज्ञानगुणादिभूषणभरैर्यः सर्वदा भूषितः,
विद्वन्मण्डलमण्डनं जितमनाः पञ्चव्रताराधकः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्माराधनतत्परो बुधवरः कल्याणमालाकरः,
सूरीन्द्रोऽजितसागरो विजयतां बुद्धिप्रभाभासुरः ॥ ८ ॥

आत्माऽऽनन्दविधायकं रतिप्रदं शश्वद्विशुद्धिप्रदं,
कर्माऽऽलीक्षयकारकं कलिमलक्षोभप्रदानोचितम् ।
आतङ्कोन्मथनैकदैवतमिदं गुर्वष्टकं भावतो,-
हेमेन्द्रग्रथितं पठन्ति शिवशं ये मानवा यान्ति ते॥ ९ ॥

---

( मन्दाक्रान्तावृत्तम् ) ( २ )

कामं कामं भविजनमनःशान्तिदं शान्तमूर्ति,
ग्रामं ग्रामं कृतविहरणं बोधिबीजं वपन्तम् ।
रामं रामं जिनमतमहाम्भोधिपारं प्रयातं,
सूरिं वन्देऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ १ ॥

ध्यायं ध्यायं मुनिगुणगणं शुद्धतत्त्वप्रकाशं,
गेयं गेयं विपुलसुखदं शुद्धसिद्धान्ततत्त्वम् ।
हेयं हेयं विषममतिदं कुत्सितानां प्रवादं,
सूरिं वन्देऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ २ ॥

पेयं पेयं गुरुगुणमयीं वाचनां पावयित्रीं,
स्मारं स्मारं जिनपदयुगं स्वर्गमोक्षैकहेतुम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारं कारं विमलहृदयं प्रेमपीयूषपूर्णं,
सूरिं वन्देऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ ३ ॥

नामं नामं परमशिवदं सद्गुरोः पादपद्मं,
लाभं लाभं गुरुतरगुणं तत्त्वबोधं प्रकाशम् ।
ग्राहं ग्राहं भवजलनिधेस्तारणीं चित्तशुद्धिं,
सूरिं वन्देऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ ४ ॥

वामं वामं विषयविरसं ज्ञानतत्त्वप्रवीणं,
श्रामं श्रामं भवगमनतो लब्धदीव्यप्रदेशम् ।
क्षायं क्षायं व्यसनमनिशं श्रेष्ठचारित्ररत्नं,
सूरिं वन्देऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ ५ ॥

दाहं दाहं विषमभयदं कर्मवृन्दं जयन्तं,
गाहं गाहं कलिमलहरं जैनतत्त्वाऽम्बुराशिम् ।
साहं साहं परिषहचमूं स्वाऽऽत्मरूपैकनिष्ठं,
सूरिं वन्देऽजितजलनिधिं निर्मलात्मप्रबोधम् ॥ ६ ॥

भ्रामं भ्रामं भववनपथे भूरिभाग्यप्रभावाद् ,
धारं धारं जिनवरपदं तावकं मानसाब्जे ।
वारं वारं शिवसुखगतं भव्यबोधप्रवीणं,
सूरिं वंदेऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ ७ ॥

सारं सारं विशदमतितस्तात्त्विकं दर्शयन्तं,
पारं पारं भवजलनिधेर्देहिनः प्रापयन्तम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वारं द्वारं विषमयगतेः संततं रोधयन्तं,
सूरिं वन्देऽजितजलनिधिं निर्मलाऽऽत्मप्रबोधम् ॥ ८ ॥

हेमेन्द्रेण ग्रथितममलं स्तोत्रमेतत्प्रभावं,
शिष्येशोहश्रमणगुणाताभ्राजिना जातभावाः ।
भव्यात्मानः शिवसुखमयं दीव्यधाम प्रयान्ति,
पापठ्यन्ते क्षतकलिमलं तेऽश्रमेण क्रमेण ॥ ९ ॥

---

( त्रोटकवृत्तम् ) ( ३ )

प्रणमामि गुणाकरमार्त्तिहरं, शुभशान्तिकरं गुरुधामधरम् ।
अजिताऽम्बुनिधिं गुणवृन्दयुतं, हृदयस्थतमोहरणैकरविम् ॥१॥

कलिदोषहरं नतसौख्यकरं, परमाऽमृतपानरतं भजत ।
अजिताऽब्धिममेययशोभरितं, जनतारकमुन्नतिदं भवतः ॥२॥

विपुलर्द्धिकरं गतरोषभयं, वरकीर्त्तिकरं शुभबोधगृहम् ।
स्तुतिगोचरमातनुत प्रवरं, प्रवराऽऽशयमाश्रमिणां सुखदम् ॥३॥

सुखकारकमूर्त्तिधरं दमिनां, दमिताऽऽरिचयं निचयं सुमदाम् ।
मदमोहजितं जितलोकभयं, भजताऽजितसूरिमखण्डधियम् ॥४॥

जिनशासनवृद्धिकरं विमलं, विमलाचलभक्तिरतं सततम् ।
गुरुपादरतिं दधतं विमदं, प्रणमन्तु सदाऽजितसूरिवरम् ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुधैर्यधरं धृतधर्मधुरं, मधुरोक्तिसुधाऽशनवृन्दनतम् ।
विधिवादरतं समयज्ञवरं, नमताऽजितसूरिमनल्पगुणम् ॥ ६ ॥

परमोत्तम ! संहर मोह तमो–मम मानसगोचरमाशु विभो ! ।
तव पादसरोजरतिं दधतोऽ–जितसागरसूरिवरप्रवर ! ॥ ७ ॥
परलोकभयं सततं हरता–मनवद्यसुखैकनिधे ! जगति ।
जनतापहर ! प्रभया शुभयाऽ–जितसागरसूरिवर ! प्रबलम् ॥८॥

( द्रुतविलंबितवृत्तम् )

अजितसागरसूरिगुणाऽष्टकं, स्मरति यो मनुजः शिवशर्मदम् ।
दमयिताऽक्षगणस्य मदोज्झितः, स लभते लभनीयसुखाऽऽ–
स्पदम् ॥ ९ ॥

( वसन्ततिलकावृत्तम् )

हेमेन्द्रसागरमुनिप्रथितं स्वभक्त्या,
गुर्वष्टकं निजगुरोः प्रथितप्रमोदम् ।
मेधाविनः प्रतिदिनं प्रपठन्ति येऽत्र,
तेऽमुत्र यान्ति सुखसम्पदमद्वितीयाम् ॥ १० ॥

---

( शार्दूलविक्रीडितवृत्तम् ) ( ४ )

कान्ताकारमनल्पकल्पनकथाव्याख्यानवाचस्पति–
श्चेतोरञ्जकभव्यभाववि‍शदक्षेमार्थवाणीगृहम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संगुप्तार्थविशेषकाव्यरचनाचातुर्यमुख्याऽऽस्पदं,
भव्यं भारतभास्करं मुनिवरं ध्यायन्ति सूरीश्वरम् ॥ १ ।

भव्याऽभव्यगुणानुवादवचनं संशोध्य शङ्कामयं,
भव्यानामुपकारकारणतया व्यक्तीचकार स्वयम् ।
कर्माणि क्रमतश्च यः परिहरन् धर्मक्रियाकर्मठः,
सूरिः सोऽयमचिन्त्यरत्ननिलयो वर्वर्त्ति सर्वोपरि ॥ २ ॥

काम्यानामभिलाषमुन्नतिभिदं यो वर्जयन् कर्मणां,
वाक्यानां कटुतां त्यजन् चयकरीं सर्वात्मना शर्मणाम् ।
बोध्यानां सुखदायिनी प्रविदधत्संसद्गतो वाचनां,
सूरीणां धुरि पूज्यपादकमलः संराजते संयतः ॥ ३ ॥

दुर्धर्षः परवादिनां निजमते लब्धप्रतिष्ठः सदा,
निर्माता करुणामयं जिनमतं व्याख्यानतो निश्चलम् ।
उद्धर्त्ता स्वमताऽङ्कुराऽनलमहादुष्टान्वचोवारिणा,
सोऽयं राजति सूरिशेखरगतश्चारित्रचूडामणिः ॥ ४ ॥

विज्ञानं विमलं यदीयमनिशं विद्योतते भारते,
लोकाऽलोकविकाशकं विजयते चारित्ररत्नं वरम् ।
हेयाऽहेयविचारचारुमननं चोज्जृम्भते मानसं,
सोऽयं सूरिवरोऽजिताब्धिरनघः सौम्याकृती राजते ॥ ५ ॥

दुर्ध्यानाऽद्रिसमूहपक्षपविना येनोन्नतिः साधिता,
अध्यात्मैकरसायनेन कविना व्यावर्णितश्चाऽऽगमः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वाध्यायप्रथनेऽतिपाटवभृता विस्तारितं शासनं,
सोऽयं सूरिवराऽर्णवाऽजितमुनिर्विद्यावतां भूषणम् ॥ ६ ॥

भव्यानां भववारिराशितरणे भव्यं तरण्डं दृढं,
भक्तानां विविधाऽभिलाषशमने दीव्यप्रभावो मणिः ।
भद्राणां वितनोति राजिमचलां यो नित्यमुत्कण्ठितः,
सूरीशः स सतां मतो विजयते पूज्योऽजितःसागरः ॥७॥

श्रीसिद्धान्तमहोदधिं गुणधिया निर्मथ्य तत्त्वाऽमृतं,
लब्ध्वा योऽभयतामवाप्य निजकानुद्धर्त्तुमुत्कण्ठते ।
स्याद्वादी स्वयमेव नोतिनिपुणः सद्धर्मचक्री विभुः,
सूरिः सोऽजितसागरो विजयते क्षोणीन्द्रवन्द्यक्रमः ॥ ८ ॥

सद्गुर्वष्टकमेतदिष्टजनकं गीतं प्रसादाद् गुरो-
र्हेमेन्द्रेण विनेयकेन मुनिना श्रेयस्ततिप्रापकम् ।
सद्बुद्धिर्गुरुभक्तिमग्नहृदयो यः श्रद्धया संस्मरेत्,
सोऽयं संसृतिमापगां सुखतया तीर्त्वा व्रजेत्स्वःश्रियम् ॥९॥

## सुधासिन्धुस्मरणम् ।

( शिखरिणीवृत्तम् )

सुधासिन्धुः सौम्यो निरूपमरसास्वादजनको-
महारत्नौघानां गुणसमुदयानां निधिवरः ।
व्रतानेकाद्रीणां पटुतरमहो शस्तशरणं,
भवेऽस्मिन् केषां नो जनयति वियोगात्कलुषताम् ॥१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मनः पद्मव्रातः परिभवपदं याति कृपणः,
सुधास्रावं चन्द्रं सुखदमनुकूलं सितरुचिः ।
अनालोक्यैव स्राग् धृतमृतकचेष्टो मदकलः,
सतां तामिस्रायां निहतगुणसम्पद्भुवि सदा ॥ २ ॥

सुधाम्भोधिं सर्वे नृजनुरनघं कर्तुमचलाः,
मतेः प्रादुर्भावादनुभवमनुप्राप्य सुधियः ।
विचिन्त्यैतच्चित्रं शिवविभवतृष्णैकतरलाः,
प्रपद्यन्ते शान्त्यै भवदहनसन्तप्तमनसः ॥ ३ ॥

सुधासिन्धुः कुत्र ? स्थित इति महामोहविधुरा-
भ्रमन्तो नैवास्मिंल्लवणजलधिच्छन्नसुधे ।
असारे संसारे विषमविषयार्त्तिप्रतिहता-
न गच्छन्ति स्वास्थ्यं तदधिगमनाऽवाप्तिविषयम् ॥४॥

सुधाम्भोधिं सम्यक् परिणतमनोरत्नसुभृतं,
सदा चित्रोत्फुल्लं मुनिगुणमहाकम्बुकलितम् ।
जनैः कीर्णं सेवाविमलमतिभिः शान्तिजनकं,
न कः सिद्धिं यातः स्वमतिसुखदां प्रेक्ष्य विपुलाम् ॥५॥

धरेयं रत्नानां निधिरनुमता मानकलिता,
इदं व्योमाक्रान्तं हरिचरणमात्रेण सकलम् ।
सुमेरुः स्वर्यातस्तदपि परिमाणाङ्कितवपुः,
परं राशिर्वाराममृतमय एषोऽप्रमितिभाक् ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुधासिन्धुर्लोके वहति समसिद्धिर्निजतया,
समेषां वस्तूनां निरूपमगुणौघं सुरतिदम् ।
कलावन्तो येऽन्ये यदनुकरणं नैव दधते,
शशाङ्काद्याः सौम्याः परगुणविधानैकपटवः ॥ ७ ॥

अहो धैर्यं कीदृग् निरवधिविशालं मतियुताः,
सुधाम्भोधेः सम्यक् परिचयतया दृष्टिविषयम् ।
तदेतत्कुर्वन्तु क्षपितपरपक्षोद्भवभया–
गुणाः सर्वस्मिन्वै पदमभिदधत्यात्मवशगाः ॥ ८ ॥

सदाऽऽह्लादं लोके प्रशमितनिजोर्मिक्रमगणो–
वितन्वन्पीयूषोदधिरतुलभावोपजनकम् ।
स्वकण्ठाऽभिप्राप्तान्नरवरझषादीन्विदधति,
प्रमोदावल्याढ्यान्परिहतपरापेक्षहृदयान् ॥ ९ ॥

अहो लीनामीनाः कृपणमनुजाः शीतविमले,
अगाधज्ञानोदे सुखमनुपमं यस्य दधते ।
तदीयां को दध्याद्गुरुगुणसमुत्पन्नपदवीं,
न शोभां सैहीं श्वा धृतकनकमालो हि लभते ॥१०॥

सुधासिन्धुं शुक्लं प्रथितगुणरत्नालिविततं,
निजोन्नत्यै काले सततसुखदं मानसमपि ।
सदा हंसश्रेणी स्फुटमतिधराः स्नेहबहुलाः,
सुधाभं तत्यक्त्वा हतभवभयागन्तुमनसः ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विना तं पीड्यन्ते दितिजवसुदेवा अपि बुधाः,
समुत्कण्ठन्ते ये ह्यभिनवमहालब्धिवशगाः ।
न तच्चित्रं तस्मिन्नमृतजलधौ विस्मयपदं,
सतामृद्धिः शश्या त्रिभुवनतले शुद्धिजनका ॥ १२ ॥

सुधासिन्धुः पूर्णोऽप्रमितविमलज्ञानमणिभि-
स्तथाऽप्युन्नत्यै यो निजहृदयसंभूतसुमुदा ।
सदा मानुष्याणामनवरतलासं जनयते,
परेषां कृत्येषु भजति हि महान्को विमुखताम् ॥ १३ ॥

सुधासिन्धुः क्षीणो भवति हि कदेति प्रमितितां,
व्रजत्येषोऽस्मिन्नो जगति विदधन् धैर्यमनघम् ।
विजेतॄणां सिद्ध्यै शिवसुखसमाच्छादितधियां,
लघुं भावं त्यक्त्वा गुणिगण इहैवातिरसिकः ॥ १४ ॥

सुधासिन्धुः कामं जनयति कमप्यत्र विशदं,
प्रमोदं जन्तूनां निकटमधिकं वासं हि जुषताम् ।
सतां संभूतानां शमितभुवनाऽनेकविपदां,
समासाद्यैतामनघपदवीं को भुवि जनः ॥ १५ ॥

न चादिर्मध्यान्तो-न पुनरनघस्यास्य विहितो-
दकज्ञानौघस्य प्रमितविषयोऽन्तः सुकविभिः ।
तथाऽप्येतद्भेदं समुपगतवानेष सकलो-
महान्तोऽप्येतस्मिन्विधिजनिततन्त्रार्थसुमुखाः ॥ १६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुधासिन्धौ मग्नः परिभवपदं नैति कृपणो-
भवोद्भूतोद्घाताः प्रशमितमहाशान्तिनिचयाः ।
जनानां चेतांसि न विभव इदं क्रान्तमनसां,
समाहर्त्तुं स्पष्टं विषयगमनोत्कण्ठितधियाम् ॥ १७ ॥

सुधासिन्धौ सारे करणनिचयातीतमहसि,
कुलीनाः संलीनाः सुमतिसमताशालिमतयः ।
दृशां पारे याते शिवसुखसमभ्यर्थनपरा-
न नैराश्यं यान्ति भ्रमकुमतवांछाविरहिताः ॥ १८ ॥

सुधासिन्धुश्चन्द्रोदयविपुलमोदं जनयते,
तदुत्पन्नप्रेमाऽतिभरवहनोन्नामित वपुः ।
स्वकीयं कौशल्यं प्रकटयति जीवाति सुखदं,
स कुर्वन्त्यस्मिन्वै विभवसहिताः के न विजयम् ॥१९॥

सुधाब्धौ भोक्तारस्त्रिदशपतयः प्राप्य विपुलं,
प्रमोदं पीयूषं तदभिमतपीलादिभुवने ।
समाङ्गीकुर्वन्तामृतिपथमतीत्यैव विभवो-
विराजन्ते नित्यं गतपरसुखाशाः स्ववसतौ ॥ २० ॥

तदेतत्पीयूषं समवगतमासीद्विधिवशा-
ज्जनानां पुण्यौघैस्ततसुगुणवृन्दैरिव फलम् ।
समाकृष्टं पूर्वं सितकिरणवंशं समगम-
न्महद्भाग्यं लोके भवति हि फलोद्रेककलितम् ॥ २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः सम्यक् श्रेयो विभवपददानैकरसिकः,
समस्त्यत्राम्भोधिर्गुरुगुणनिधिर्भावविमलः ।
समाकर्ण्येत्थं सै-तमधिगतवानन्यमनसा,
सतां सिद्धे कार्ये हृदयशुभशान्तिर्हि भवति ॥ २२ ॥

कियत्कालं प्राप्यै-तदनुमतयोगं भवमिदं,
स्वकार्यं संसाध्य प्रमितसमयेनेष्टजनकम् ।
पुनः स्वीयस्थाने गमनमकरोच्चैतदनघं,
न तिष्ठन्त्यक्षीणा-विहितपरकार्याः क्षणमहो ॥ २३ ॥

दिवं याते तस्मिन् विधुरितजनाः संशयजुषो-
वितर्कं कुर्वन्तो-विधुफणिमुखाम्भोधिविषयम् ।
समासाद्यैतद्वै विलसति समुद्भूतकरुणं,
तथालापान्मूढावितथमनुकुर्वन्ति विवशाः ॥ २४ ॥

तयोर्योगाभावं, समनुगतसम्यक्त्ववचनाः,
सहन्ते के विज्ञाः परिचितमहाऽनर्घ्यमणिवत् ।
सतां मैत्री सौम्या किमपि नवनीतार्थजनक-
मखण्डं सौभाग्यं जनयति हि पुण्यौघसुलभम् ॥ २५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only